
कविकुलगुरू - कालिदास - संस्कृत - विश्वविद्यालयः

रसत॰ टी॰
१

॥श्रीगणेशायनमः॥ ॥गौरीत्रिलोकजननीजननीजनकंज गत्याः शंभुंशशांकक
लयाचविराजमानम्॥ कृत्पुंडरीककुहरेस्थिरभावयोगगम्यंनमामिनगवानहसमर्थ
सिध्यै॥१॥ श्रीमद्दाशाधरगुरोःप्रसादात्क्रियतेमया॥ तरीरसतरंगिण्याष्टीकेयंनाति
विस्तरा॥२॥ ॥अथात्रभवानभानुदत्तनामाकवीरसतरंगिण्याख्यंग्रंथंचिकीर्षुस्तन्निर्विघ्नसमाप्त्यर्थंशिष्टाचारार्थंचात्रादौमंगलमाचरति॥ ॥लक्ष्मीमिति॥ पीतेवासोयस्यसपीतवासाः॥ पीतांबरः॥ अत्रविशेषणमात्रप्रयोगात्विशेष्यस्यविष्णोःप्रतीतिः॥ प्रसिध्यारूढित्यस्यैवबोधादन्यस्यसर्वोक्तविषणविशिष्टत्वाभावाच्च॥
॥मांपातुरक्षतु॥ ॥प्रार्थनायांलोट्॥ ॥श्रीकृष्णायनमः॥ ॥श्रीरामचंद्रायनमः॥

तरंग॰१

राम
१

Acc. No. 2972 M-1703
Title - रसतरङ्गिणी सटीका॰
टी॰ तरी or नूतनतरी.
Author - भानुदत्त॰
टी॰ - भगवद्भट्ट. (शके 1707)

Date - ?
Subject - अलंकारशास्त्र॰
folio - 130 (पत्रक्र॰ 15 दोनवेळा॰
129 + 1 = 130
Xerox -

1

लक्ष्मीरमामालोक्य हृष्टा ॥ ॥ अब्धिमंथनसमये इत्तिशेषः ॥ एवमन्यत्रापि यथायोगं कालवि
शेषाध्याहारो बोध्यः ॥ जृंभयन् ॥ जृभि गात्र्ये इति धातोः कालसामान्ये लट् ॥ तथा च भाष्ये ॥ का
लसामान्ये लट्प्रयोग इति ॥ पुरस्तादप्येवं ज्ञेयं ॥ तथा निगमं वेदं उपहसन् ॥ त्रयो वेदस्य क
र्तारो मुनिभांड निशाचरा इत्यादि वाक्यै बुद्धावतारे स्वरूपहासं कुर्वन् ॥ यद्वा किंवायं मम मा

॥ श्रीगणेशाय नमः ॥ ॥ लक्ष्मीमालोक्य जृंभन्निगममुपहसन् शोचयन्
यक्षजंतून् क्षत्रं शोणाक्षि पश्यन् समितिदृशा मुखं वीक्ष्य रोमांचमंचन् ॥

हात्म्यं सामग्र्येण निरूपयितुं समर्थ इत्युपहासं कुर्वन्नित्यर्थः ॥ पुनः कीदृशः ॥ यक्षस्य
जंतवः ॥ अज्ञानध्वा इयं पशावस्तान् ॥ शोचयन् ॥ जनैरिति शेषः ॥ शुच शोके इति धातोर्हे
तुमणि चिरूपं ॥ तथा शोणाक्षि ॥ शोणे अक्षिणी यस्यां क्रियायां यथा तथा ॥ क्षत्रं ॥ क्षतं रसं
वरणे क्षतं हन्तीति क्षत्रं ॥ यद्वा क्षततात् त्रायते इति प्रसिद्धमु मन्त्रौ तु पृषोदरादित्वात्तकाराका

रसत॰ टी॰ २

रजोपः॥ जातित्वादेकवचनम्॥ पचपन्॥ तथा समितिसंग्रामे रणमुखं रावणं॥ वीक्ष्य दृष्ट्वा॥ रोमांचं॥ अंचन् गच्छन्॥ ॥ तथा हैयंगवीनं नवनीतं॥ हैयंगवीनं संज्ञायामिति निपातनात्साधुः॥ ॥ हृत्वा चोरयित्वा॥ ॥ चकितं सभयं यथा तथा॥ अपसरन्॥ पलायमान इत्यर्थः॥ म्लेछानां रक्तैः॥ रुधिरैः॥ दिगंतान्॥ दिग्प्रांतान्॥ सिंचन्॥ तथा हंतेन हंत्र्या॥ भूमीं दृष्ट्वा॥

तरंग॰ १

हृत्वा हैयंगवीनं चकितमपसरन्म्लेछरक्तैर्दिगंतान्सिंचन्दंते
नभूमिं तिलमिव तुलयन्पातु मां पीतवासाः॥ १॥ ॥ ३॥ ॥

तिलमिव तुलयन्॥ तिलतुल्यां गणयन्॥ तुल्यार्थैरतुलोपमाभ्यामिति ज्ञापकात्सादृश्यपर्यायात्तुलाशब्दात्तत्करोति तदाचष्ट इति णिजंताल्लटः शत्रादेशः स्यानि कश्चावात्तगुणेन॥ अत्र छभिः श्रथमां तविशेषणैर्यथानुक्रमं शृंगारादयः षटू रसा अभिव्यज्यंते॥ त्रयधराद्वत्तम्॥ १॥

२

अत्रपूर्वश्लोकाभिव्यक्तान्शृंगारादिरसान्विविच्यनिरूपयितुंकविश्चिकीर्षितंप्रतिजानीते
॥भारत्याइति॥ ॥शास्त्राण्येवकांतारंवनंतत्रश्रांतायाःभारत्याःवाग्देव्याःशैत्यकारिणीसुख
कर्त्री॥ अत्रशैत्यशब्देनतज्जन्यसुखेलक्षणा॥ वनश्रांतस्यशीतवजलक्तनिर्झरोवर्जनेनश्र

भारत्याःशास्त्रकांतारश्रांतायाःशैत्यकारिणी॥
क्रियतेभानुनाभूरिरसारसतरंगिणी॥२॥ ॥

मापनोदात्सुखंभवतीतिभावः॥ तथाभूरयःरसायस्यांसा॥ भूधातोरौणादिकः। क्विन्प्र
त्ययःएकत्रभूरयः। अष्टौरसाःशृंगारादयःअन्यत्रबहुलजाचेत्यर्थः॥ एतादृशी॥ रसाए
वरसाइतिश्लिष्टरूपकम्॥ तरंगिणीएवतरंगिणीश्लेषनयत्रापिवृत्तौसाध्यवसानाल

क्षणा॥ भानुना पंडितेन क्रियते॥ विरच्यते॥२॥ ॥वाणीति॥ ॥ एषा बुद्धिस्था॥ रसतरं
गिणी॥ ग्रंथरूपा सरित्॥ वर्त्तत इति शेषः॥ एवं यत्र यस्य प्रयोजनं तस्य तत्राध्याहारः
कर्त्तव्यः॥ वाक्यैकवाक्यतासिद्धैकदेशोद्धरणमध्याहारः॥ तत्र भानोर्वाणी॥ कमलिनी वर्त्त
ते॥ अत्र वाणीग्रंथयोर्भेदाभावेपि चमत्कृतिरूपा वाणी बोध्या॥ तत्र कृतधियः हंसाः॥

वाणीकमलिनी भानोरेषा रसतरंगिणी॥ हंसाः कृतधियस्तत्र युक्तमत्र प्रनीयतां॥३

अत्र युक्तं योग्यं॥ तेषामिति शेषः॥ प्रतीयतां भासतां॥ यथा हंसानां नीरक्षीरादिविवेकप
टुत्वं तथा कृतधियामपि प्रकृतग्रंथनिरूपितनानारसविवेकपटुत्वमस्ति नान्येषामि
ति भावः॥ यद्वा वाणी सरस्वती सैव कमलिनी तस्याः भानोः सूर्यस्य॥ प्रकाशकस्येत्यर्थः॥
श्लिष्टरूपकं॥ तत्संबंधिनी॥ कृतिरिति शेषः॥ एषा करिष्यमाणा रसतरंगिणी॥ कालिंदी

सहृदयीतिभावः॥ शेषं स्पष्टवत्॥३॥ ॥गिरामिति॥ ॥हे गिरां देवि॥ वाग्देवि॥ तरंगिण्यां प्रकृ
तग्रंथरूपायां सरितीति॥ क्रूरा रसज्ञान विधुरास्त एव वारणा हस्तिनस्तान् निवारय॥ दूरीकुरु
॥यद्यस्मात् क्रूरप्रवेशादित्यर्थः॥ रसः शृंगारादिः जलं च॥ लोकानां रसज्ञानां॥ आविलः क
लुषः॥ विरसो गतरसास्वाद्य॥ भविष्यति॥ लिङ् चोर्ध्वमौहूर्तिके इति लृट् प्रयोगः॥ अत्र नि

गिरां देवि तरंगिण्यां वारय क्रूरवारणान्॥ यन्न भविष्यति लोकानामाविलो विरसो र
सः॥४॥ हेतोः पूर्ववर्त्तित्वनियमादतः पूर्वमेव तस्योपन्यासः समुचितः॥ ॥

पातस्य यच्छब्दस्योत्तरवाक्यगतत्वात्तच्छब्दापेक्षा नास्ति॥ उक्तं च काव्यप्रकाशे॥ उत्तरवा
क्यार्थगतो यच्छब्दस्तच्छब्दोपादानं नापेक्षते॥४॥ हेतोरिति॥ हेतोः कारणस्य॥ पूर्ववर्त्तित्व
नियमात्॥ कार्यापेक्षया पूर्वकालवर्त्तित्वसिद्धांतात्॥ तथा चोक्तं तर्कशास्त्रे॥ कार्यनिय
तपूर्ववर्त्तिकारणमिति। अतस्तस्य कारणस्य पूर्वं प्रथममुपन्यासो निबंधनं समुचितो
योग्यः॥

रसस्येति॥ रसस्य शृंगारादेः हेतवः कारणानि भावाख्यो भवंति॥ तेन हेतुना तेभ्यो रसेभ्यः
पूर्वं प्रथमं भावा हृदय एव निरूप्यंते॥ निरूपकर्त्तौ रा हिकस्य रूपरूपक्रियायामिति धातोः॥ क
र्मण्यात्मनेपदं॥ रसेति॥ ॥ रसस्य अनुकूलो विकारो भाव इत्युच्यते॥ विकारोऽन्यथाभावः

रसस्य हेतवो भावादयस्तेन रसात्पूर्वं भावा हृदय एव निरूप्यंते॥ रसानुकूलो विका
रो भावः॥ विकारोऽन्यथाभावः॥ विकारश्च द्विविधः॥ आंतरः शारीरश्च॥ आंत
रो द्विविधः॥ स्थायिभावो व्यभिचारिभावश्च॥ शारीरस्तु सात्विकभावः॥ पूर्वम
नो विकारो भावस्तथा चदेहविकारस्वेदादी भावपदप्रयोगो गौण इति तत्वं॥

प्रकारांतरेण भवनमित्यर्थः॥ विकारप्रकारमाह॥ द्विविध इति॥ आंतरो मानसः॥ शारीर
श्च॥ आंतर इत्यादि स्पष्टम्॥ यत्विति॥ ॥कस्यचिन्मतामिति शेषः॥ तद्दूषयति॥ ॥

तुल्यवति॥ तुल्येषि विवेति तुल्यवत्॥ यथा इयर्थिहृदयः शशः शशांकविम्बादिषु स्वातंत्र्येण प्र
वर्त्तते तथा भावशब्दो गौणमुख्यत्वमनपेक्ष्यैव मनोविकारे देहविकारे देहविकारे च प्र
वर्त्तते॥ तद्धि निर्गमनाविरहादिति भावः॥ एकत्र पक्षपातिनी बुद्धिर्विनिर्गयुना तथा
च कोत्राभावो नी नाक्रियाचेष्टा भूत्यभिप्रायजंतुषित्यमरः॥ तत्रैषा नाही नांदेह विका

तुल्यवद्भूमपत्र भावपदस्य प्रयोगेण विनिर्गन्तुमशक्यत्वात्॥ लक्षणानुरोधेन लक्ष्या
व्यवस्थितेः॥ इतरभावस्यात्मभावत्वोपनायकत्वे सति सजातीयविजातीयभावा
नभिभाव्यः॥ प्रथमं परानभिभाव्यो मनोविकारो वा॥ रत्वं॥ अभिप्रायस्य च मनोवि
कारत्वमिति विवेकः॥ लक्षणेति॥ लक्षणानुसारेण लक्ष्यव्यवस्थायोगादित्यर्थः॥ स्था
यिलक्षणमाह॥ इतरेति॥ इतरभावस्य स्वव्यतिरिक्तभावस्य॥ स्वस्मिन्नंतर्भावकत्वे स
ति सजातीयाः अंतराः विजातीयाः शारीरास्तैरविरनभिभाव्यस्तिरोहितुमशक्यः॥ ॥ १

प्रथमः स्थायीसर्गः॥

पक्षांतरमाह॥ स्पष्टम्॥ सकलेति॥ प्राधान्यंतु रसावस्थानपर्यंतं विद्यमानत्वादिति ज्ञेयं॥ नचेति॥ स्पष्टम्॥ चरमेति॥ तिष्ठति रसपर्यंतमिति स्थायी॥ उक्तंच॥ यावद्रसं वर्त्तमानः सस्थायी लवणाकर इति॥ सचस्थायी॥ अष्टभिः प्रकारैर्वर्त्तत इत्यर्थः॥ रतिरित्यादि॥ सकलप्रधानो मनोविकारो वा॥ इति स्थायिभावः॥ नचान्यभावेति व्याप्तिः॥ तस्येतरसंभावस्यात्मभावत्वोपनायकत्वाभावात्॥ चरमसमयपर्यंतस्थायित्वादस्यस्थायित्वव्यपदेशः सचाष्टधा॥ तत्राह भरतः॥ रतिर्हासश्च शोकश्च क्रोधोत्साहौ भयं तथा॥ जुगुप्साविस्मयश्चेति स्थायिभावाः प्रकीर्त्तिताः॥ तत्र इष्टवस्तुसमीहाजनितामनोविकृतिरपरिपूर्णा रतिः॥ साचक्वचिद्दर्शनेन॥ क्वचित्श्रवणेन॥ क्वचित्स्मरणेन॥ ॥

नानालक्षणानि मूलएवस्पष्टानि॥ चक्षुरिति॥ हे सखि॥ सच पूर्वोक्तप्रकारविशिष्टः॥ पुनरितिपाठांतरं॥ एषमनसि—संभावितः कोमलस्तत्कालोत्पन्नत्वान्मृदुः॥ ॥छ॥ ॥

प्रेमद्रुमः स्नेहरूपो वृक्षः कृतः ॥ तरुणार्कविम्बाज्जार्कबिम्बकर्कशा तीक्ष्णा रुचिर्दीप्तिर्यस्य तं संतापं ॥ पश्चा
त्तापरूपं सम्यक्तापं स्तूर्यो यस्मिन्नंते जः ॥ अत्राध्यवसानेनारोपः ॥ तथा निश्वासस्य वात एव वातो वा
युस्तस्मादिति राघो तस्मात्कस्माद्धेतोः सहिष्यतो ॥ यस्य द्रुमस्य ॥ चक्षुर्नेत्रं ॥ कृषीवलः कृषुकः ॥ रजः
कृष्येत्यादिना वलच्प्रत्ययः ॥ वले चेति दीर्घः ॥ निगदितं कथितं ॥ अत्रानुवादप्राधान्यान्नपुंसक
निर्देशः ॥ पीयूषं ॥ अधरामृतं स एव पाथोधरो मेघः ॥ पीयूषेण धरामृतस्यारोपः पूर्ववत् ॥ य

यथा ॥ चक्षुर्यस्य कृषीवलो निगदितं पीयूषपाथोधरो भ्रूसंज्ञा परिचारिका समजनि स्फीतं स्मितं
दोहदं ॥ संतापं तरुणार्ककर्कशरुचिं निश्वासवाताद् इतिं कस्माद्देषसहिष्यते स च सखि प्रेम
द्रुमः कोमलः ॥ ५ ॥ ह्यानिगदितं वचनं ॥ नपुंसकेनावोक्तः ॥ तदेवामृतमेघः ॥ तथा भ्रूसंज्ञा भ्रूकु
टीनर्त्तनक्रिया ॥ परिचारिका रक्षणकर्त्री दासीत्यर्थः ॥ समजनि ॥ इह सर्वत्र योज्यं ॥ स्फीतं प्रहृष्टं ॥
स्मितं हास्यं ॥ दोहदं ॥ पुष्पाहिजनकमौषधविशेषः ॥ यस्येत्यत्र सर्वत्रान्वयः ॥ अत्र कोमलपदाद

णरितिः॥ यत्र स्मणरितिस्तत्रतुरस एवेतिसिद्धांतात्॥ अत्रतुनतथेतिभावः॥ शार्दूलविक्रीडितं वृत्तं॥५॥
॥हासस्या यिलक्षणमाह॥ ॥कुतूहलमित्यादिस्पष्टम्॥ ॥आगच्छन्निति॥ नगरोपकंठेमिलितैर्बालि
कैरावेष्टितोयुक्तः सन्नागच्छन्॥ तथाश्रुत्वांतेऽतःपुरेपरिचारिकाभिर्हसीभिः॥ अचिरंस्मत रंतथासो
त्रासंसहर्षंययातथा॥ एतद्ध्यंक्रियाविशेषणं॥ आवेदितोनिवेदितः॥ तथासाकूतंसाभि ायं॥ स

कोमलपदाढ्यपूर्णता॥ कुतूहलकृतवचनवेषवैसादृश्यपकृतोमनोविकारोः परिहृदं हासः
वचननेत्रवेषवैसाहस्रेपनकृतेनयेक्रोधेवानातिव्याप्तिः॥ तत्र कुतूहलकृतत्वामन्यात॥
यथातातचरणानाम॥ आगच्छन्नगरोपकंठमिलितैरावेष्टितोबालकैःश्रुत्वांतेप रिचारि
काभिरचिरंसोत्प्रासमालोकितः॥ साकूतंसकुतूहलंबलिवधूवृंदेपुरोदापयत्सन किंचि
दुदंचितस्मितलवःपायात्सवोवामनः॥६॥ कुतूहलंसाश्चर्यंचययातथा॥ बलि हैत्यस्त्रीस
मूहे॥ बलतीतिबलिः बलप्राणनइतिधातोरौणादिकेइत्सयेरूपं॥ पुरोऽग्रेऽन्नंहापयतिर ति॥ सेव
वकैरितिशेषः॥ अत्रहेतुमतिचेतिणिच्॥ किंचिदीषत्उदंचितउत्पन्नः स्मितस्यलेशोयस्य॥ एताहशो
ल

वामनः तद्रूपी विष्णुर्वो युष्माकं पायात्॥ रक्षतु॥ शार्दूलविक्रीडितं वृत्तम्॥६॥ ॥अत्र जवप्रहारः एणति॥
शोकस्यायिनमाह॥ ॥इष्टइति॥ इष्टवियोगउत्पन्नो रत्या अनालिंगितअव्याक्षेोऽपूर्णो मनोविका
रः॥ शोकइति॥ ॥नचेति॥ ॥इष्टवियोगजनितस्य विप्रलंभशृंगारस्य करुणरसत्वापत्तिर्न भवति॥ कुत्त

जवप्रहारक्ष्णति॥ इष्टविश्लेषजनितो रत्यालिंगितो मनोविकारोऽपरिपूर्णः शोकः॥ नः इष्ट
विश्लेषजनितविप्रलंभशृंगारस्य करुणरसत्वापत्तिः॥ तस्य रत्यालिंगितत्वात्॥ नव
रतिः प्रीतिस्तया विना शोकोपि नोत्पद्यत इति तथा चासंभव इति वाच्यम्॥ इष्टसम
हाजनितमनोविकृते रतेरुक्तत्वात्॥ ॥
तस्य विप्रलंभशृंगारस्य रत्या आलिंगितत्वात्॥ अत्र
तु न तथेति फलितोर्थः॥ नचेति॥ रतिः प्रीतिस्तया विना शोकोपि नोत्पद्यत इति एवं सति — । —
लक्षणस्यासंभव इति न वाच्यम्॥ इष्टवियोगजनितायां मनोविकृतिस्तस्या एव रतेः स्वीकारात्॥ ॥

कुमारसंभवादिषु ग्रंथेषु रत्यादिप्रलापेषु करुण एव रसो ऽनुभूयते ॥ तत्र तत्र बाधस्य नाशस्य निश्चया
दतो हेतोरिष्टवस्तुसमीहाया अभावात् ॥ यत्र यस्मिन्मृते सति पुनर्जीविताशा अस्ति तत्र शृंगार रस
एव रसो भवति ॥ बाधेति ॥ बाधस्य मृत्युरूपस्य संदेहो निश्चयाभावस्तस्य ग्राह्यसंदेहे भोग्यत्व भो

कुमारसंभवे रत्याः कादंबर्यां महाश्वेतायाः रघुकाव्ये ऽजस्य प्रलापे करुण एव रसः ॥
तत्र तत्र बाधनिश्चयात् इष्टवस्तुसमीहाया अभावात् ॥ यत्र मृते जीविताशा तत्र
शृंगार एव रसः बाधसंदेहस्य ग्राह्यसंदेह पर्यवसिततया समीहाया अप्रतिबं
धकत्वात् ॥ तथा च यूनोरेकस्मिन् मृते प्रलापः करुण एव रसः ॥ ॥१

ग्यत्वसंशये पर्यवसानात्स
मीहायाः रतेरनिवर्तकत्वात् ॥ मृत्युनिश्चये रतिनिवर्तकत्वमस्ति न तु तत्संदेहे इति भावः ॥ तथेति ॥ एवं सति
यूनोः स्त्रिपुंसयोः पुमान्स्त्रिये त्येकशेषः ॥ एकस्मिन्मृते प्रलापः करुणः प्रीतिपरिपोषितशोकालंबनत्वादि
ति भावः ॥

जीवेति॥ जीवतोर्वियुक्तयोः प्रलापः शृंगारः॥ तत्र शोकस्य रत्यंगत्वादिभावः॥ अयीति॥ कुमारसंभवस्यो
यं श्लोकः॥ अयीति संबोधने॥ केचिदिमममपि शाङ्गं मन्यंते॥ हे जीवितनाथ॥ प्रियजीवसि॥ प्रश्नकाकुः॥
इति उक्तप्रकारेण अभिधाय उत्का॥ पुनरुत्थितवाती या रत्या क्षितौ पृथिव्यां॥ पुरुषस्येवाकृतिर्यस्य
तत्॥ पुरुषाकारमित्यर्थः॥ हरकोपानलसंबंधिभस्मके वलं ददर्श दृष्टं॥ अत्र वैतालीयं छंदः॥ त

जीवतोर्विश्लिष्टयोः प्रलापः शृंगार एव रसः॥ अत एव रसरत्नप्रदीपिकायां कौमारसंभवं
करुणारसोदाहरणं अयि जीवितनाथ जीवसीत्यभिधायोत्थितया नया पुनरिति॥ ५॥

याच स्तत्र म॥ वैतालीयं द्वि॥ स्वराच्च युक्पादे युक्पादे युग्वसवोऽन्ते रलगाति॥ व्याख्यातं चैतद्रत्न ध
रत्नदृष्टेः॥ तथाहि॥ प्रथमे च तृतीये च यत्र मात्राश्चतुर्दश॥ द्वितीये च चतुर्थे च पादे मात्राः षोडश॥ १
पादांते रगणो यत्र लघुर्गुरुरपि क्रमात्॥ तच्छंदः शास्त्रतत्त्वज्ञा वैतालीयं प्रचक्षते॥ इति॥ ७॥

स्ये

नन्विति॥ पूर्वपक्षे॥ ॥ पूर्वानुरागे माने प्रवासे च विप्रलंभस्य करुणात्मकत्वात्॥ शोकमयत्वादि-
त्यर्थः॥ जीवतोरपि यूनोर्विप्रलंभस्य करुणरसत्वमतिव्याप्तं॥ शोकमयत्वेन तल्लक्षणाप्रवृत्ते-
रिति भावः॥ इति चेत्सत्यं॥ अत्रोत्तरमाह॥ तत्र जीवातोः पूर्वानुरागादिभेदत्रये करुणस्यांगत्वे

ननु विप्रलंभशृंगारस्य पूर्वानुराग। मानप्रवासकरुणात्मकत्वात्॥
चतुर्धा जीवतोरपि विप्रलंभस्य करुणरसत्वमागमितिचेत्सत्यं॥
करुणरसस्य तत्रांगत्वेन भासमानत्वात्करुणात्मकत्वव्यपदेशः॥

न शृंगारपोषकत्वेन भासमानत्वान्न करुणात्मना व्यपदेश इति॥ करुणशब्देन व्यवहारो नास्तीत्यर्थः॥
प्रकृत शोकस्याप्युदाहरणमाह॥ ॥७॥ ॥

विरहेति॥ विरहः कामना राजन्यो वियोगः स एव ज्वरस्तज्जन्यायां मूर्छितया पतंती॥ तथा नयनेन कर्त्रा। क्व
चनं जात्मनिभ्रायेण॥ स्तनारीनां हित्वविशिष्टा जातिः भ्रायेणेति वामनोक्तो भायग्रहणादत्रैकत्वमवि ऽम्
॥अश्रुजलेन करणेन॥ सिच्यमाना॥ तथा विनिश्वसंती॥ रतीकामभार्या॥ समवेक्ष्य दृष्ट्वा॥ त्रांभोः। शेव

॥यथा॥ विरहज्वरमूर्छया पतंतीनयनाश्रुप्रसरेण सिच्यमानाम्॥ समवेक्ष्य रतीं वि तेष्व
संती करुणा कुड्मलिता बभूव त्र्यंभोः॥ करुणा कुड्मलितेत्यत्र णतो॥ अवज्ञाकृतः प्रम दप्र
तिकूलः परिमितो परिमितोः परिपूर्णोमनोविकारः क्रोधः प्रमोद प्रतिकूलविरोष ग॥
त्रह त्रोमुखदुर्वचनावमानितस्य रामस्य वीररसेनातिव्याप्तिः॥न। ॥

स्य॥ करुणा कुड्मलिता॥ संजातकुड्मला नानातु विकसितेत्यर्थः॥ बभूव॥ अत्र कुड्मलितत्वस्य कुसुमधर्मस्य
करुणायामुपचारः॥ यथा कुड्मलितं कुसुमम संपूर्णं भवतितत तथा करुणा। पीति॥ औपछंहस्तिकं हत्र श॥न॥
क्रोधस्थायिनमाह॥ अवज्ञादीति॥ स्पष्टम्॥ ॥ ॥ठ॥ १

16

र.म.त.टी. १

तरंग १

नाद्यारभ्येति॥ कार्मुकलतायां विन्यस्तं हस्तांबुजं येन स एतादृशोऽहमिति शेषः। अद्य दिनमारभ्य॥ किंचिद्दीषत्पाटलाभा दीप्तिर्यस्य तदेतादृशे लोचनयुगे विषये॥ तावत्कालं निमेषोद्घाटनं करोमि॥ यावत्कालं सायककोट्या बाणाग्रेण पाटिता विदारिता क्ष्मतेरिपुक्ष्मापालाः शत्रुभूतक्षत्रियास्तेषां मौलयस्तेभ्यः स्रवंती या मध्वी॥ मध्व्याः कुसुमनिम ध्वी॥ पुष्पमूलेषु बहुलमित्यणो जुक्॥ जुपियुक्तवध्यक्ति वचने इति स्त्रीत्वमेकवचनं च॥ पुष्पे जातिप्रभृतयः वल्लि

यथा परशुरामस्य वाक्यम्॥ नाद्यारभ्य करोमि कार्मुकलताविन्यस्तहस्तांबुजः किंचित्पाटल
भासि लोचनयुगे तावन्निमेषोद्घाटनं॥ यावत्सायककोटिपाटितरिपुक्ष्मापालमौलिस्रव
न्मध्वीमाल्यपतत्परागपटलैर्नामोदिनी मेदिनी॥ १॥ किंचित्पाटलत्वादपूर्णता॥ ॥ उ॥

गान्धीइयः फलस्यत्वम् रसः॥ तस्याः माला एव माल्यानि॥ चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्॥ माला माल्यं सौमनस्यमित्यम रः॥ तेभ्यः पतंति च तानि परागपटलानि च तैः॥ करणैर्मोदिनी पृथ्वी॥ आमोदिनी॥ लक्षणया गंतुक गंधति सर्पः॥ न जातेति शेषः॥ यावत्कालं मया तातापकारिणः शत्रवो न निहतास्तावन्निद्राभावान्नेत्रनिमिषो नास्ती ति भावः॥ परशुरामवचनमिदं॥ अत्र किंचित्पदोपादानात्क्रोधस्यापूर्णता॥ उदा०॥ १॥ ॥

१

उत्साह॥ लक्षयति॥ ॥शौर्यमिति॥ ॥शौर्येण दानेन दयया वा कृतः परिमितोऽपूर्णो मनोविकार उत्साहः॥ वरि
ति॥ वीररसस्य त्रैविध्यात्तत्स्थायिन उत्साहस्यापि त्रैविध्यमिति भावः॥ क्रमेणोदाहरणानि॥ युद्धेति॥ आ
द्यो यथा॥ सेनामिति॥ जगतां विद्रावणो भीषकः॥ विस्रवेद्भुगतावितिधातोर्णप्रत्ययः कर्तरि स्मृतः॥ राव एणः

शौर्यदानदयाभिस्तत्कृतो मनोविकारः परिपूर्ण उत्साहः॥ वीरस्तु युद्धवीरदानवी
रदयावीरभेदात्त्रिधा॥ युद्धवीरस्योत्साहो यथा॥ ॥सेनां संघटयन्नद्युति द्विगुण
यन् चापं चमत्कारयन्नेत्रस्याभिमुखो भविष्यति जगद्विद्रावणो रावणः॥ ॥

॥नेत्रस्य॥ ममेति शेषः॥ अभिमुखः॥ सन्मुखो भविष्यति॥ भविष्यदर्थे लृट्॥ इत्थं प्रकारेण सा
हविचाराभ्यां सूद्रुदयोजितस्सचित्रः॥ ॥ॐ नमः॥ ॥ छ॥ १२

इत्कच्छ्रासविचारमूढरुहृये इति पाठः साधीयान्॥ अन्यथास्य पदोपादाने दोषश्रवणात्॥ तथाहि न
व्यप्रकारो॥ व्यभिचारिरसस्यायिभावानां शब्दवाच्यता इति॥ तथा सेनांवाहिनीं संघटयन्॥ सं
हां कुर्वन्॥ द्युतिं स्वकांतिं द्विगुणयन् द्विगुणां कुर्वन्॥ तत्करोति तदाचष्टे इति णिच्। शत्रोरेश॥

॥ इत्युत्साहविचारमूढरुहृयो देवो रघूणां पतिर्ज्याविन्यासविधिं विनैव विशि
खान्बाणांस्सनेन्यस्यति॥ १०॥ ॥ अत्र विचारादृक्पूर्णता॥ ॥ ॐ नमः॥ ॥

चापं धनुश्चमत्कारयन्॥ चमत्कारयुक्तं कुर्वन्॥ अथास्त्रियां धनुश्चापौ इति अमरः रघूणां पतिर्देवो रा
घवः॥ बाणासने कार्मुके ज्यायाः मौर्वीविन्यासविधिरारोपणविधिरारोपणविधिस्तं विनैव विशि
खबाणं न्यस्यति॥ आरोपयति॥ अत्र विचारपदादृक्पूर्णता॥ शाङ्कः १०॥ ॥

द्वितीयो यथा ॥ दानेत्यादि ॥ आदृत्यायेति ॥ भृगुनंदनः ॥ परशुरामः ॥ निःस्वो याचकाय ॥ चतुर्थी संप्रदाने ॥ च
तुर्थी ॥ महीमिव पृथ्वीमिव ॥ आदृत्यायि दर्पणं कर्तुं ॥ क्रियार्थोपपदेत्यादिना चतुर्थी ॥ एवमग्नेऽप्येवं गत ॥
इदं शशांकमंडलं चंद्रबिंबं ॥ तथा हर्म्याय गृहं कर्तुं हेमाचलं सुमेरुं दीपाय प्रदीपं कर्तुं द्युमणिं सूर्यं कथ
मिति वितर्के नो दत्तवान् न ददाति स्म ॥ अत्रोत्प्रेक्ष्यते दातुमिच्छा दित्सा तया पल्लविता पल्लवसदृशो ता
दानवीरोत्साहो ॥ यथा ॥ आदर्शाय शशांकमंडलमिदं हर्म्याय हेमाचलं दीपाय द्युमणिं महा मि
वकथं नो निःस्वे दत्तवान् ॥ दित्सापल्लवितप्रमोदसलिलव्याकीर्णनेत्रांबुजो जानीमो भृगुनं
दनः स्तदखिलं न प्राय शो दृष्टवान् ॥ ११ ॥ पल्लवितं न तु फलितमित्युक्षणेतादृशा वीरोत्साह य
॥ अंकुरितइत्यर्थः ॥ प्रमोदो हर्षस्तज्जन्यं सलिलं तं यद्वाष्पजलं तेन व्याकीर्णव्याप्तं नेत्रांबुजं यस्य स एता ॥
दृशः सन् ॥ तत्सर्वो कस्य समग्रं वस्तु ॥ प्रायशः बहुधा न दृष्टवान् ॥ इति प्रतीमः विचारयामः ॥ वयमिति रो
च ॥ शार्दूल ॥ ११ पल्लवितो न तु फलित इति अलक्षणता ॥ तृतीयो यथा ॥ दयेत्यादि ॥ ॥ छ ॥

र॰म॰ग॰टी॰
११

उत्तारेति॥ जनानां दुःखेन तीर्यते सौ उत्तारः स चासौ संसारपयोधिश्च तस्य पारं गंतुं प्रकारं॥ उ[illegible]यं॥ आलोचयतो विचारयतः॥ कैटभारेर्विष्णोर्वक्षस्युरस्थले॥ कौस्तुभस्य मणेः कैतवेन मिषेण॥ रू[illegible]पांकुरः॥ हयांकुरः समुत्थितः॥ उत्पन्नः अत्र कैतवापह्नुत्यलंकारः॥ अत्रांकुरपदाद्दक्षणता॥ उ[illegible]द्रव

दुस्तारसंसारपयोधिपारप्रकारमालोचयतां जनानाम्॥ समुत्थितो वक्षसि कैटभारेः रू[illegible]पांकुरः कौस्तुभकैतवेन॥ १२॥ अंकुरोपन्यासाद्दक्षणता॥ ॥अपराधविकृतसत्वाद्दिजनि[illegible]तोः परिक्षणो मनोविकारो नयम्॥ ॥

ज्ञात्तत्र म॥ १२॥ ॥नयलक्षणमाह॥ अपराधेति॥ अपराधात्वाविकृतरक्तात्॥ विकृतसत्वाद्दि[illegible]मो व्याघ्रादिभ्यो वा जात उत्पन्नः॥ अपरिक्षणो मनोविकारो भयं॥ ॥ ११ ॥ ११

११

यथा॥ ॥तार्क्ष्येति॥ ॥कालियः सर्पविशेषः॥पुराऽग्रे॥तार्क्ष्ये गरुडस्तस्य पक्षयोः पवनेनोपसेवितं यदुनंदनं
श्रीकृष्णं॥वीक्ष्य वीक्ष्य॥आभीक्ष्ण्ये द्विर्भावः॥भीतेभ्यो भीतः॥तादृश इव॥अधिकं भीत इवेत्यर्थः॥अत्र प्रका
रे गुणवचनस्येति सूत्रेण न द्विर्भावः॥इवशब्देन तदर्थावगतौ सादृश्यरूपप्रकारस्य पौनरुक्त्यापत्तेः॥अ
धिकार्थे इवाच्य इति वार्त्तिकस्यापि नात्र प्रवृत्तिः समासेनैवाधिकार्थावगतेः॥विस्तरस्तु मनोरमा॥ दृष्ट

॥यथा॥तार्क्ष्यपक्षपवनोपसेवितं वीक्ष्य वीक्ष्य यदुनंदनं पुरः॥भीतभीत इव तत्र कालियो मंदमं
दमुपसर्त्तुमुद्यतः॥१३॥ ॥ईवोपन्यासादृष्टान्त॥ ॥

व्यः॥मंदमंदं शनैः शनैः॥प्रकारे गुणवचनस्येति द्विर्भावः॥कर्मधारयवद्भावात्पूर्वपदस्य विभक्तिलु
क्॥पुनः प्रातिपदिकसंज्ञायां सुबुत्पत्तिश्च॥उपसर्त्तुं पलायितुं॥उद्युक्तः॥अत्रेवपदाद्दृष्टान्तः पर्यस्य
तिबोध्यम्॥रथोद्धता वृत्तम्॥रो नराविह रथोद्धता लगाविति लक्षणात्॥१३॥ ॥ ० ॥ ॥

जुगुप्सां लक्षयति ॥ अरुच्येत्यादि स्पष्टम् ॥ ॥ शार्दूलेति ॥ रामचंद्रः ॥ कर्त्ता ॥ शार्दूलशावकैः व्याघ्रपोतैः । पृ
थुकः शावकः शिशुरित्यमरः ॥ चटच्चटशब्दं यथा तथा पाट्यमानाश्च ते सारंगाः कृष्णसारमृगास्तेषां शृं
णित इति ॥ चटच्चटत्सत्र द्वित्वविधौ बहुलग्रहणात्तकारलोपः ॥ यच्चाशक्तिजमसाधुशब्दरूपं तदनुक
णं तस्यापि साधुत्वमिष्यत इति भाष्योक्तेः साधुत्वं च ॥ भूभृति भृंगवत्पर्वते ॥ इत्युक्तपर्वतविशेषणे द

अरुच्यदर्शनस्पर्शनस्मरणजनिता मनोविकृतिरपरिस्फूर्णजुगुप्सा ॥ यथा ॥ शार्दूलशावकचटच्च
टपाट्यमानसारंगशृंगवति भूभृति रामचंद्रः ॥ वासं चकार न बभार तपो जुगुप्सां दुःखेषु दुःखमति
रेव न दुःखितानां ॥ १४ ॥ न तथैति पदाहर्णता ॥ न्यर्थतास्य ज्ञेया सारंगशब्दस्य शाकंधादित्वात्प
ररूपत्वं ॥ वासं चकार तया जुगुप्सां मृकं न बभार ॥ जुगुप्सा तु घृणात्मकमित्यमरः ॥ तथाहि ॥ दुःखि
तानां संजातदुःखानां दुःखेषु दुःखहेतुषु दुष्टवासादिषु ॥ दुःखमतिरेव दुःखदायकत्वबुद्धिरेव न भवति
व्यग्रचित्तत्वादिति भावः ॥ न तथैति पदोपादानाहर्णता ॥ अत्र सामान्येन विशेषसमर्थनरूपोऽर्थान्तरन्या
सः ॥ वसंततिलका वृत्तम् ॥ १४ ॥ ॥

विस्मयं जनयति॥ ॥चमत्करोति॥ ॥चमत्कारस्याश्चर्यकरस्य वस्तुनः॥ अत्राकरोमलयतीयः॥ दर्शनस्पर्शनि
स्मरणैर्जनितो हर्षो मनोविकारो विस्मयः॥ अत्र दर्शनादीनां यथासंभवं संयोगः पृथक्त्वं चेति ज्ञेयं॥ उदाह
रणमाह॥ युध्यंतमिति॥ ॥युध्यंतं॥ युद्धं कुर्वंतं॥ अत्रानुदात्तलक्षणमात्मनेपदमनित्यं॥ चक्षिङो ङित्क
रणात्तज्ज्ञापकात्॥ यद्वा युध्यमानमर्जुनमिति पाठांतरं॥ अर्जुनं पार्थं वीक्ष्य दृष्ट्वा के के देवा न विस्मिता अपि

चमत्कारदर्शनस्पर्शनस्मरणजनितो मनोविकारः परिपूर्णो विस्मयो॥
यथा॥ युध्यंतमर्जुनं वीक्ष्य के वा देवा न विस्मिताः॥ न मेने बहु गोविंदो
दृष्टकर्णपराक्रमः॥ १५॥ न मेने बह्विति पदार्द्धपूर्णता॥ ॥ ॐ नमः॥ ॥

तु सर्वे विस्मिता इत्यर्थः॥ वीप्सायां द्विर्भावः॥ दृष्टः कर्णपराक्रमो येन सः गोविंदः श्रीकृष्णः॥ न बहु मेने॥ ना
दृतवान्॥ पदार्थहेतुकं काव्यलिंगमलंकारः॥ १५॥ न मेने बह्विति पदापादानादस्याः पूर्णता॥ ॥

र-त-गटी
१३

तरंग

शृंगेरेतिगतं शृंगारादौ चमत्कारस्य दर्शनात्॥ यत्र मनोविकृतिरंगतया अप्रधानतयाभासते तत्र शृंगारः॥ यत्र प्राधान्येन तत्राद्भुत इति॥ अंगतयोदाहरणमाह॥ वैषम्यमिति॥ तस्या नायिकायाः॥ आनंदजन्यबाष्पोदकं कर्तृ॥ दृशो नेत्रयोः॥ कर्मणि षष्ठी॥ कृतिपंकजात्॥ कर्णावतंसनीरजसकाशात्॥ वैषम्यं भेदं प्रकटयति॥ तस्या इत्यस्याग्रेप्यन्वयः॥ तया पुलको रोमांचः कर्ता॥ अंगश्रियः शारीरशोभायाः सुवर्णभूषणसकाशात्॥ वैधर्म्यं वैसादृश्यं व्यनक्ति प्रकाशयति॥ संजितं नूपुरध्वनिः कर्तृ॥ पादारविंदाश्रियश्चरणांबुज

शृंगारादौ चमत्कारदर्शनाद्यत्र मनोविकृतिरंगतयाभासते तत्र शृंगारादय एव रसाः॥ १६॥

शोभायाः कर्मणि षष्ठी॥ नूपुरपद्मरागमंडसः॥ मंजीरपद्मरागमणिकांतेः सकाशात्॥ भेदं वक्ति। लक्षणया अर्थात् नानामनेकार्थत्वाद्वा व्यनक्ति इत्यर्थः॥ एतदस्मादधिकं विधेर्ब्रह्मणः शिल्पं॥ किं वण्यते इ॥ शील समाधौ शील उपधारणे इति धातोर्वा रिखष्यशिल्पेत्यादिना पप्रत्यायांतो निपातः। शील्यत इति॥ शील्यं क्रियाकौशलं। अत्र चमत्कृतिरूपा मनोविकृतिः॥ प्रकृतरसपोषकतया अंगतयाभासते। तः शृंगार एव रसः॥ अत्रानेकवाक्यार्थगतं काव्यलिंगमलंकारः॥ शार्दूल॥ सूर्याश्वैर्मसजस्तताः सगुरवः शार्दूलविक्रीडितमिति लक्षणात्॥ १६॥

१३

प्राधान्येनोदाहरणमिदं॥१७॥विनासायमिति॥सुरभेरवि:सौरभ्यंसुगंधः॥गुणवचनेत्यादिनाष्यञ्॥तेनसुभगःसुंदरः॥
पद्मिनीमुखस्य सहजसुरभित्ववर्णनादिति भावः॥ज्योत्स्नाधारांकांतिपरंपरांकिरन्॥ज्योत्स्नेतमिस्रेत्यादिनामत्व
र्थीयनकारप्रत्ययेनिपातितः॥प्रसारयन्॥अधिधरणिपृथिव्यां॥विभक्त्यर्थेऽव्ययीभावः॥ध्रियंतेऽस्यांप्राणिन
इतिधरणिः॥धृङ्‌अवस्थानेइतिधातोःअर्त्तिसृधृइत्यादिसूत्रेणअनिप्रत्ययेरूपम्॥कोयंतारापरिवृढ

प्राधान्येनयत्रनासतेतत्राद्भुतएवरसः॥अंगतयायथा॥वैषम्यस्फूर्तिपंकजातप्रकटयात्या
नंदनीरंदृशोःस्वर्णालंकरणाघनक्किपुलकोवैधर्म्यमंगश्रियः॥तस्यान्पूरपयंरागमहस्तः
शरारविंद्श्रियोनेदंसिंजितमेवनक्किकिमतःशिल्पंविधेर्वर्ण्यताम्॥१८॥प्राधान्येनयथा॥
विनासायंकोयंसमुदयतिसौरभ्यसुभगःकिरन्योत्स्नाधारामधिधरणितारापरिवृढः॥

स्वच्छःसायंकालंविनासमुदयति॥सदोदितएवतिष्ठति॥चन्द्रिडोडि:त्करणेनानुदात्तेत्वनिमित्तस्यात्मनेप
दस्यानित्यत्वज्ञापनाद्दयगताविति धातोःपरस्मैपदं॥यद्वाइटकटेतिधातुदंडकेप्रश्लिष्टस्यधात्वंतरूपमे
तत्॥तथास्मारंकामसंबधिधनुःभ्रकुटीरूपंचापंधत्ते॥ ॥१८॥

तथा तमसां केशपाशरूपाणामंधकाराणां प्रसरणं नतिरयति॥ तिरःस्थगितं करोतीति तिरयति॥ शाति पदि काशात्वर्थइत्यादिना णाविष्टवद्भावात्टीलोपः॥ तथा निरातंकः निर्भयः सन्॥ आतंको रुग्रोगयोरिति शाश्वतः॥ अंके स्वोत्संगे॥ अंकः समीपउत्संगे चिह्ने स्थानापराधयोरिति वैजयंती॥ पंकेरुहद्वयुगलं नेत्रद्वंद्वरूपमब्जयुग्मं॥ नटयति नर्त्तयति॥ अत्र कोयं सायं विनेत्युक्त्या प्रसिद्धचंद्राद्भेदस्तद्उत्कर्षश्चाविष्कृतः तत

धनुर्धत्ते स्मारं विकिरति विहारं च तमसां निरातंकः पंकेरुहयुगलमंके
नटयति॥१८॥ ॥इति श्रीभानुदत्तविरचितायां रसतरंगिण्यां स्थायिभा
वनिरूपणं नाम प्रथमस्तरंगः॥१॥ ॥छ॥ ॥ ॥ श्री ॥

स्तद्रूपरूपकातिशयोक्तिरियम्॥ अत्र चमत्कृतिरूपायामनोविकृतेः प्राधान्याद्भुतो रसः॥ शिखरिणी वृत्तम्॥ रसैरुद्रैश्छिन्नायमनसभलागः शिखरिणीति लक्षणात्॥१८॥ ॥इति श्रीमहोपाध्यायावटंकानंदरामभट्टात्मजभगवद्भट्टविरचितायां रसतरंगिणीव्याख्यायां स्थायिभावनिरूपणे प्रथमस्तरंग॥१॥

ख्या

॥अथेति॥ स्थायिभावनिरूपणानंतरमित्यर्थः॥ मंगलानंतरारंभप्रश्नकार्त्स्न्येषु अथेत्यमरः
विशेषेणेति स्पष्टं॥ ते चेति॥ ॥ते विभावा आलंबनरूपा उद्दीपनरूपाश्चेति द्विविधा भवंति ॥इ
दमत्राकूतम्॥ सर्वत्र कार्यकारणभावेन व्यवहारारोपितसिद्धौ विभावानुभावेति संज्ञा ॥२

अथ विभावा निरूप्यंते॥ ॥विशेषेण भावयंति उत्पादयंति रसान् ते विभावाः॥ स च
द्विविधः॥ ॥आलंबनविभाव उद्दीपनविभावश्चेति॥ यमालंब्य रस उत्पद्यते स आ
लंबनविभावः॥ यो रसमुद्दीपयति स उद्दीपनविभावः॥ तत्रालंबनविभावो ॥

करणं रसस्यालौकिकत्वप्रतिपादनार्थम् अविस्तरेणेदं स्फुटीकृतं काव्यप्रकाशे रसविला
से चेति॥ यथेति॥ आलंबनविभावलक्षयति॥ ॥ ॥ २

प्राणस्येति॥ ॥सा सर्वानुभूता॥ या कापि अलौकिकी मम प्राणस्य प्रतिमूर्त्तिः प्रत्याकृतिः रूपांत
रमितियावत्॥ तथा पुण्यरूपलतायाः प्रत्यात्मा॥ प्रतिनिधिभूता॥ पूयतेऽनेनेति पुण्यं॥ पूञ्
पवन इति धातोः पूञो यत् णुट् रूस्वश्चेत्यणादि सूत्रेण यनादौ रूपं॥ नयनयोर्नेत्रयोरधिदै

यथा॥ ॥प्राणस्य प्रतिमूर्त्तिः॥ प्रत्यात्मा पुण्यलतिकायाः॥
अधिदैवतं नयनयोर्या मम कापि सा सैव॥१॥ ॥ ठ॥ ॥

वतं॥ अधिष्ठात्री देवतारूपा चास्ति॥ असौ कीदृशी सा कांक्षायामाह॥ सा नायिका सैव॥ अनिर्व
चनीया वक्तुमशक्येतियावत्॥ अर्थांतरसंक्रमितवाच्योऽयं ध्वनिः सिद्धस्य विधानादिध्यलंका
रश्चेत्यलं विस्तरेण॥ अत्र नायकाश्रयस्य रसस्यालंबनं नायिका तेन तद्रूपो विभावः॥ आर्यावृ
त्तम्॥१॥

शृंगारस्येति॥ तत्र नरकन्नाद्याचार्यः॥ आह स्मेति शेषः॥ स्त्वित्ति॥ ऋतुमाल्यालंकारैः॥ वसंतादिसमयपुष्पा
भरणैः करणेतृतीया॥ तथाप्रियजनस्य॥ इष्टजनस्य॥ गंधर्वस्य॥ गंधर्वकर्मणोनृत्यादेः॥ काव्यस्य कवेः कर्म
णश्च सेवाभिः॥ अत्र सेवापदस्य द्वंद्वांते श्रूयमाणत्वात्प्रत्येकमन्वयः॥ अत्र कविशब्दस्य ब्राह्मणादित्वात्ष्यञि प्राप्ते
मध्यादिं इगंतान्वजघुपूर्वादितिविशेषमण्वणं बाधित्वा कर्मणि ष्यञ्॥ यद्यपि कुधातोरौरादिकः इतिण्प
तिरूपसिद्धिस्तथापि कुद्धस्तेरित्वधितद्वत्रिबली यसीति परिभाषानुरोधात्॥ काव्यजोकोत्तरवर्णनानि

शृंगारस्योद्दीपनविभावस्तत्र नरतः॥ ऋतुमाल्यालंकारैः प्रियजनगांधर्वकाव्यसेवाभिः॥ उ
पवनगमनेविहारैः शृंगाररसः समुद्भवति॥ चंद्रचंद्रनाद्यरुहनीयाः॥ ३॥ ॥ ६

पुणकविकर्मेतिकाव्यप्रकाशेदृष्टत्वाद्वेत्थव्याख्यातमितिदिक्॥ तथा उपवनगमनविहारैः॥ वाटिकान्ति
यानक्रीडाभिः॥ एतैः शृंगाररसः समुद्भवति॥ उद्दीप्यत इत्यर्थः॥ श्रीयते विदग्धैरिति शृंगारः॥ शृंगारत्वं
गाराविरूणादिसूत्रेण आरन्प्रत्यये श्री धातोः शृंआदेशः॥ गुणाभावोनुकुगुकौ चेति निपातनात्सा
धुः॥ अन्येपि प्रकारा हृद्याः पाद्यो दृष्टव्याः॥ ३॥ चंद्रेति स्पष्टम्॥ यथेति॥ ॥ ६

२

उद्दीपनविभावं लक्षयति ॥ संध्येति ॥ सम्यक् ध्यायंत्यस्यां विप्रा इति संध्या ॥ यद्वा संधानं संध्या ॥ अंधकारय
श्चेत्फणादिसूत्रेण निपातनात्साधुः ॥ सैव शोणां बरजवनिका ॥ रक्तवस्त्ररूपा तिरस्करिणी ॥ प्रतीसीरा
जवनिका स्यात्तिरस्करिणी च सेत्यमरः ॥ कामिनोः स्त्रीपुंसयोः पुमान्स्त्रियेत्येकशेषः ॥ प्रेमस्नेहः ॥ प्रेमा
ना प्रियता हार्दं प्रेमस्नेह इत्यमरः ॥ नाद्यं नटकर्म ब्राह्मणादित्वात्कर्मणि ष्यञ् ॥ भ्राम्यद्भ्रमरविरुतं भ्रमद्भ्रम
रगुंजितं नांदी ॥ नाटकारंभे मंगलाचरणं नांदीत्युच्यते ॥ कोपिकालो वसंतादिः स एव मारिषः आर्यः ॥ आर्य
स्तु मारिष इत्यमरः ॥ तारा एव पुष्पांजलिस्तं किरन् ॥ सहतावंजलिः पुमानित्यमरः ॥ किंच ॥ उडुनिष

संध्या शोणांबरजवनिका कामिनोः प्रेमनाद्यं नांदी भ्राम्यद्भ्रमरविरुतं मारिषः कोपिकालः ॥ तारापु
ष्पांजलिमिव किरन्सूचयन्नुष्मकेतोर्नृतारंभं प्रविशति सुधादीधितिः सूत्रधारः ॥ ३ ॥ ॥

मतिहस्ति पाणप्रवित्तातितारालिकलयोऽजलिर्घृणिः ॥ अग्निवक्रिक्रमयोर्घिदीहि विग्रंथयिकु स्थितयोरितिर्ध्व
निरित्येषां सर्वेषां पुंछिंगत्वं बोध्यम् ॥ एतादृशः सुधादीधितिः स एव सूत्रधारः ॥ नाद्याचार्यः ॥ कन्दर्पपुष्प
केतोः कामस्य नृत्तारंभं ॥ सर्वत्र प्रसंगेरूपं सूचयन्निव ॥ सूचयितुमिवेत्यर्थः ॥ इव शब्दो भिन्नक्रमः ॥ अत्र
धनमूर्जयन्नु वसती तिवत् हेत्वर्थे लटः शत्रादेशः ॥ फलमपि हेतुरिति वैयाकरणाः ॥ प्रविशति ॥ इह सावय
रूपकफलोत्प्रेक्षा चेति संक्षेपः ॥ मंदाक्रांतावृत्तम् ॥ मंदाक्रांता जलधिषडगैर्म्भौ नतौ ताद्गुरू चेदिति लक्षणा

१५

२

॥अथेति॥ ॥शृंगारविभावनिरूपणानंतरमित्यर्थः॥विपरीतेति॥ ॥विपरीतालंकारैः॥वैपरी
त्येन धृतैराभूषणैः॥करणे तृतीया॥ तथा विकृतैः॥आचाराभिधानवेषैः॥चापरं॥विकृतैः॥अ
र्थविशेषैर्वस्तुविशेषैः॥हसतीति हेतो हास्यो रसः स्मृतः॥ तत्र हास्ये भवो रसो हास्यः॥अत्रैवं नि

अथ हास्यविभावास्तत्र भरतः॥विपरितालंकारैर्विकृताचाराभिधानवेषैश्च॥विकृ
तैरर्थविशेषैर्हसतीति रसः स्मृतो हासः॥४॥ ॥अंगवैकृत्यादयऊहनीयाः॥ ॥

र्वचनम्॥ हसनं हासस्तत्र भवो हास्य इति॥ यद्वा हासोऽस्त्यस्मिन्निति हास्यः॥अन्येभ्योपि दृश्यते
इति मत्वर्थीयो यः प्र॥अथवा हास्यं हसनमस्मिन्नस्तीति हास्यः॥अकारो मत्वर्थीय इति॥
त्रिधा [illegible]दितां तोऽयम्॥विशेषस्त्वाग्राधरभट्टकृते रसिकानंदे बोध्यः॥आर्याछंदः॥४॥ ॥गेसा
हित्यं छन्दम्॥यथेति॥

हास्यविभावो हाहरणमेतत॥ केयूरमिति॥ केयूरमंगदं॥ केयूरमंगदं तुल्ये इत्यमर॥ घर्घरियम्॥ घर्घरशब्दयुक्तं कुर्वन्॥ तत्करोतीति णिच्प्रत्ययः शत्रादेशः॥ मौलिं किरीटं॥ चूडा किरीटं केशाश्च संयता मौलय स्त्रय इत्यमरः॥ भ्रमयन्॥ घट्यादिषु मं तत्रग्रहणान्मितां ह्रस्वः इति ह्रस्वत्वं॥ बाहूं हस्तौ विवर्तयन्॥ चालयन्॥ तथा नेत्रांचलं॥ अंचतीसंचलः॥ कंबला इत्यस्मेत्कणादिसूत्रेण कलं प्रत्ययेन निपातितः॥ चोपयती त्विच पलः चंचलः तं कुर्वन्॥ चुपेरच्चोपधाया इत्क

॥ केयूरं घर्घरयन् भ्रमयन् मौलिं विवर्तयन् बाहूं॥ नेत्रांचलं च पलयन् नटयति मायाशिशुः छाया॥५

णादिसूत्रेण निपातनात्साधुः॥ एतादृशोयं॥ मायया शिशुर्बालः॥ नृपतिमातरंस्तन्य पानेरुत्वेति शिशुः॥ शोतनुकरणे इति धातोः शः किल्लन्वचेत्कणादिसूत्रेण उप्रत्यये रूपं॥ श्रीकृष्णः नटयति॥ नाट्यं करोति॥ नट अवस्यंदने॥ अवस्यंदनं नाट्यम्॥ संगृहीतकर्मकत्वात्सकर्मकत्वं॥ मायाशिशुश्छायामित्यपि पाठः॥ हास्यस्यैते विभावाः आर्याछंदः॥ ५॥ ॥

करुणेत्यादिस्पष्टम्॥ इष्टेति॥ क्लेशादुपतापात्॥ क्लिशउपतापे इतिधातोर्भावेघञ्॥ व्यसना
त् दुःखात्॥ करुणास्ति अस्मिन्निति करुणः॥ मत्वर्थीयोऽच्प्रत्ययः॥ शेषंस्पष्टम्॥ ६॥ बंधिति॥
व्यक्तं॥ यथेति॥ करुणस्यविभावंदर्शयति॥ त्वामिति॥ युद्धपाशबद्धं मूर्छितं लक्ष्मणं प्रतिराम
स्येयमुक्तिः॥ हेलक्ष्मण॥ यद्यपिसंबोधनेषु हेशब्दप्रयोगविधायकवचनंनास्ति तथापिदे

करुणारसस्यविभावास्तत्राहरतः॥ इष्टजनस्यविनाशात्क्लेशाद्बंधनव्यसनात्॥ एतैर
र्थविशेषैः करुणोरसः समुद्भवति॥ ६॥ बंधुदारिद्र्यादयऊहनीयाः॥ त्वांपश्यतोभुजगपा
शनिबद्धदेहमद्यापिमेयदसवोनबहिःप्रयांति॥ ॥ हेप्रयोगेहेइयोरित्तापकात्तत्प्रयोगोयु
ज्यते॥ भुजगपाशनिबद्धदेहंत्वांपश्यतोमेममअसवः प्राणाः॥ पुंसिभूम्न्यसवः प्राणाइत्यम
रः॥ बहिर्नप्रयांति॥ ननिर्गच्छंतियत्॥ ततइतिशेषः॥ त्वंनेत्रेनिमीलयसि॥ नदीयं॥ आस्य
तातावते॥ मन्मुखंतुनपश्यसि॥ इत्येतद्युक्तमेव॥ ॥

सुरद्रोहिकृतापराधस्य स्वजनस्य मुखं वनपश्यंती तिप्रसिद्धिः॥ अत्र रामनिष्ठायाः करुणायाः लक्ष्मण आलंबनं॥ तत्कथाश्रोतृणां तु रामदैन्योक्तिरिति विवेकः॥ वसंततिलकावृत्तम्॥७॥ रौद्रविभावा नाह॥ तत्रेति॥ आयुधेति॥ आयुधखड्गाभ्यामभिभवात्॥ पराभवात्॥ खंडयतीति खड्गः खडिभे दे॥ स्त्र खडिभ्योगकृल्लक्षणाहित्स्सूत्रेण साधुः॥ खड्गस्य प्राधान्यात् स्पर्थग्रहणं॥ तथा वृकृतभे

नेत्रे निमीलयसि पश्यसि नैव ताव द्धास्यमदीयमिति लक्ष्मण युक्तमेव॥७॥ रौद्रविभावास्त्र भरतः॥ आयुधखड्गाभिभवात् वैकृतभेदाद्विहरणाच्चैव॥ संग्रामसंभवाद्यैर्विभावैः॥ संजायते रौद्रः॥८॥ वैरिहत्त्राननिर्भर्त्सनाद्यरुहानीयाः॥ द्वात्॥ क्रोधजनकचेष्टाविशेषात्॥ तथा विहारणात्॥ अर्थात् हस्त्रादीनामित्यर्थः तथा संग्राम संभवात्॥ अर्थात् सैन्यक्षयादिरूपात्॥ एभ्यो विभावेभ्यो रौद्रो रसः संजायते॥ समस्तेभ्यो व्यस्तेभ्यश्चेति ज्ञापनार्थमेभ्य इति टप्यकृ ग्रहणम्॥ रुद्रो देवताय स्येति रौद्रः सास्य देवतेत्यण्॥ यद्वा रुद्रस्यायं रौद्रः॥ तस्येदमित्यण्॥ आर्यछंदः॥८॥ वैरीति स्पष्टम्॥ ॥

येयेति॥ रौद्रस्य विभावानुदाहरति॥ ॥तन्वंतीति॥ ॥हे भार्गव हे राम॥ तावकीलदीया॥ तस्येदमित्य
णि तवक ममकावेकवचने इति तवकादेशः॥ टिड्ढाणञिति तवक ममकावेकवचने इत्यादिना ङीप्॥ ए
षा निस्त्रिंशधारा निशा॥ खड्गधारारूपा रात्रिः॥ निस्त्रिंशो खड्ग निर्दयौ इति वैजयंती॥ तिमिरं ने
त्ररोगस्तद्वत् तिमिरमंधकार इति श्लिष्टरूपकं॥ तेमति तेमयति वा इति तिमिरं॥ तिमकृद न इति
यथा॥ तन्वंती तिमिरद्युतिं कृतवती प्रत्यर्थिचक्रव्यथा मेषा भार्गव तावकी विजयते निस्त्रिंशधारा
निशा॥
धातोरिषिमदीत्यादि उणादिसूत्रेण किरप्रत्यये रूपं॥ तद्वद्द्युतिं कृष्णछविमिति याव
त्॥ तन्वती॥ तथा प्रत्यर्थी चक्रव्यथा शत्रुवृंदपीडा सैव प्रत्यर्थिचक्रव्यथा॥ प्रति अन्योन्यं लक्ष्मीकृत्य
अर्थिनो ऽभिलाषिणश्चक्रवाकास्तेषां पीडेति पूर्ववद्रूपकं॥ चक्रो गणे चक्रवाके चक्रं सैन्यरथांगयोः॥
ग्रामजाले कुलालस्य भांडे राष्ट्रास्त्रयोरपीति विश्वः॥ प्रत्यर्थी परिपंथिन इत्यमरः॥ कृतवति सति॥ विज
यते॥ विपराभ्यां जेरित्यात्मनेपदं॥

किंच युद्धे कुधायेविपक्षपक्षाः शत्रुबलानि॥ पक्षः पार्श्वगरुत्साध्यसहायबलभित्तिषु इति विश्वः॥ तेषु विदलंति च तानि कुंभींद्रकुं
भस्थलानि करिकुंभस्थलानि तेभ्यो भ्रश्यंति च तानि मौक्तिकानि च तेषां कैतवेन व्याजेन॥ तारावलीं नक्षत्रश्रेणिम्॥ नक्ष
त्रमृक्षं भं तारा इत्यमरः॥ वीथ्यालिरावलिः श्रेणिरित्यमरः॥ वर्षति॥ विकिरति॥ अत्र शत्रुनिष्ठक्रोधस्य रोमरव
द्भावलोकनमालंबनविभावः॥ कैतवापह्नुतिरलंकारः॥ त्र्याद्यः॥ ९॥ वीरेत्यादि स्पष्टम्॥ उत्साहेति॥ उत्साहस्य

युद्धक्रुद्धविपक्षविदलत्कुंभींद्रकुंभस्थलभ्रश्यन्मौक्तिककैतवेन परितस्तारावलीं वर्षति॥ ९॥ वी
रस्तरस्य विभावास्तत्र भरतः॥ उत्साहाध्यवसायाद्विषादित्वाद्विस्मयान्मोहात्। विविधादर्थ
विशेषाद्वीररसो नाम संभवति॥ १०॥
अध्यवसानाद्धार्यनिश्चयात्॥ तथाविषादित्वात्॥ अखेदित्वात्
अविस्मयात्॥ विस्मयोऽद्भुतमाश्चर्यमित्यमरः॥ मोहात्। सारासारादिज्ञानवैचित्यात्। तथा विविधात्। बजोदा
यदिप्रकारात्। वीरो नाम रसः संभवति॥ वीरयंती विक्रामतीति वीराः॥ शूर वीरविक्रांताविति धातोः पचाद्यचिरू
पं॥ आश्रयीभूतास्तेसंत्यस्येति वीरः॥ अर्शआदिभ्योऽच् इत्यकारो मत्वर्थीयः॥ शूरो वीरश्च विक्रांत इत्यमरः॥ १

यथेति ॥ ॥ वीरविग्रावोराहरणमाह ॥ लंकापतिरिति ॥ एषरामः रघुनाथः ॥ कर्त्ता ॥ संयति संग्रामे ॥ जंभनाम्नो
दैत्यस्यारिः ॥ शत्रुः इंद्र इति यावत् ॥ जंभभेदी हरिहयः स्वराट् नमुचिसूदनः इत्यमरः ॥ इंद्रमापहं लक्षणया
हर्षहरं बाहुवीर्यं यस्य स एतादृशो लंकाधिपो रावणः ॥ शंकनीयः न तु पेक्षणीयः ॥ इत्यनेन प्रकारेण जल्पंतं

विनयबलाद्यरूहनीयाः ॥ लंकाधिपः संयति शंकनीयो जंभारिदर्पापहबा
हुवीर्यः ॥ इत्यालपंतं हनुमंतमेष रामः स्मितैरुत्तरयांचकार ॥ ११ ॥ ॥

हनुमंतं ॥ आंजनेयं ॥ प्रति ॥ गम्यमान प्रतिशब्दयोगे द्वितीया ॥ स्मितै हसितैः ॥ उत्तरयांचकार ॥ उत्तरमाचचक्षे
॥ तत्करोति तदाचष्ट इति ण्यंतात् लिटि रूपं ॥ अत्र रामकृतं स्मितं विभावः ॥ इंद्रवज्राहृतम् ॥ स्यादिंद्रवज्रा य
दि तौ जगौ गः इति लक्षणात् ॥ ११ ॥ ॥ १ ड ॥ ॥ १ ॥ ड ॥ ॥ १ ॥ श्रीराम ॥ ॥

यथेति॥ दानवीरस्य विभावो हरिश्चन्द्रादिः॥ वपुषेति॥ ॥ केचित्संतः वपुषा शरीरेण विनयमार्जवं वहंति॥ द
धति॥ अत्र धारणार्थत्वाद्वहतेर्न द्विकर्मकत्वं॥ शिरो वहति पुष्पाणीत्यादिवत्॥ केपि संतः वचसा वचने
न॥ चारुचर्या साधुचर्या॥ गद्गदमित्यादिना यत्र चरंति कुर्वंति॥ तथा केपि संतः॥ अतिथिः॥ नास्ति ति
थिर्यस्य स तथोक्तः॥ अध्वनीनोऽतिथिर्ज्ञेय इति याज्ञवल्क्योक्तेः॥ यद्वा अतति सातत्यगमनं करोति

दानवीरस्य विभावो यथा॥ ॥ वपुषा विनयं वहंति केचिद्वचसा केपि चरुचर्यां
॥ अतिथौ समुपागते सपर्यां पुलकैः पल्लवयंति केपि संतः॥ १२॥ ॥

इति अतिथिः॥ अतोरिथिन्नृ इत्युणादिसूत्रेण इति प्रत्ययः॥ तस्मिन् समुपागते सति॥ पुलकैः॥
रोमांचैः सपर्यां पूजां पल्लवयेति॥ पल्लवो विस्तारस्तद्वतीं कुर्वंति॥ णाविष्टवत्प्रातिपदिकस्य इत्युक्तेः॥ औ
पच्छंदसिकं वृत्तं॥ पर्यंते यौ तथैव शेषमौपच्छंदसिकं सुधीभिरुक्तमिति लक्षणात्॥ १२॥ ॥

यथेति॥ स्थायी रविभावलक्ष्यति॥ कथमिति॥ निशायां रात्रौ॥ दुरवगाहे ऽप्रवेशे॥ तमसि॥ अंधकारे॥ ताम्यतीति तमः॥ अस्यविचमित मित्याद्युणादिसूत्रेण असन्प्रत्यये रूपं॥ अविरलं निरंतरं भक्तिभाजस्सेवाकरिणः॥ अथान्मिमेत्यर्थः॥ इदृशाः प्राणिनो भक्ताः कथं वीक्षणीयाः॥ वीक्षितुं योग्या इतिहेतोः॥ मुरारिः॥ विष्णु

स्थायीरस्यविभावो॥ यथा॥ ॥कथमविरलजाग्रद्भक्तिभाजो निशायां तमसि दुरवगाहे प्राणिनो वीक्षणीयाः॥ इति खलु समुदंचद्दीपलेखाभिरामद्युतिमुरसि मुरारिः कौस्तुभं संबभार॥१३॥ ॥

उरसि वक्षस्थले॥ सम्यगुदंचत्योयाद्दीपलेखाः दीपराजयः॥ लेखास्तु राजय इत्यमरः॥ तद्वदभिरामा मनोहरा द्युतिः कांतिर्यस्य सं॥ कौस्तुभं मणिं संबभार॥ धारयामास किमु॥ अत्र कौस्तुभधारणं न भक्तजनवीक्षणार्थमिति अफले फलोत्प्रेक्षणादस्तिखास्य दीप लोत्प्रेक्षा॥ ॥अत्र कौस्तुभधारणं विभावः॥ मालिनी वृत्तम्॥१३॥ ॥ १९

रस॰ग॰टी॰
२०

अत्र भरतकारिकायां वर्णनीयनायकनिष्ठानामुत्साहादीनामुद्दीपनविभावत्वं विवक्षितं॥ अलंबनविभावत्वं नायकप्रतिनायकयोरितितत्रानुपपत्तिमाशंक्य समाधत्ते॥ नन्वति॥ यथा शृंगारे नायिकासौंदर्यादीनां नायकनिष्ठरसोद्दीपकत्वं नायकगुणादीनां च नायिकानिष्ठरसोद्दीपकत्वं तथात्रापि परनिष्ठानामुत्साहादीनामुद्दीपकत्वं भवितुमर्हतीति न स्वनिष्ठानामिति विप्रतिपत्तिरिति सर्वपक्षाभिप्राय॥ अ

ननु स्वनिष्ठ उत्साह नायक यमुद्दीपनविभाव इति चेत्सत्यम्॥ उद्दीपनविभावो ज्ञातमात्र एव गमकः॥ तस्यानुमापकत्वेन पक्षवृत्तित्वनियमादिति॥ ॥

भीतरमाह॥ सत्यमिति॥ यथा शृंगारे न जस्य दृष्टा निषधागतागुणा नित्यादौ ज्ञायमानानां नजगुणानां दमयंती निष्ठरसोद्दीपकत्वं तथात्रापि ज्ञायमानानामुत्साहादीनां वीररसोद्दीपकत्वं॥ तत्र परबुद्धेरप्रत्यक्षत्वात्स्वगतानां स्वकीयानां संभवति क्वचित्परकीयानामपि इंगितादीनां तथात्वे बाधो नास्तीति समाधानमिति॥ भावः॥ ॥

तरंग॰२
२०

41

अत्रविशेषमाह॥अनुभावइति॥ ॥अनुभावोरोमांचादिस्तत्स्वनिष्ठएवगमकोज्ञापकः॥तस्यानुभा
वस्यधूमादेरिवअनुमापकत्वेनरसानुमितिज्ञापकहेतुत्वेनपक्षवृत्तित्वनियमात्॥पर्वतीयवन्ह्या
दिवत्रससामानाधिकरण्यनियमादित्यर्थः॥इदंचस्थूलदृष्ट्याबालबोधनार्थमुक्तं॥वस्तुत

ननुदयावीरएवकथंनकरुणरसएवांतर्भवति॥निरुपाधिपरदुःखप्रहाणेच्छादया॥साचकरु
णांविनानसंभवतीतिचेन्न॥करुणस्यस्थायिभावःशोकः॥वीरस्यस्थायिभावउत्साहइतिस्थायि
भावभेदेनभेदात्॥ननुदयावीरेकरुणरसप्रतीतेःकागतिरितिचेत्सत्यम्॥करुणायाविना
दयावीरस्यानजुनेवाहिति॥तत्रकरुणायाअनुभावकत्वाहिति॥ स्त॥रसस्यालौकिकत्वेन
कार्यत्वंज्ञाप्यत्वंवानास्तीतिनिएतिंकाव्यप्रकाशे॥नन्विति॥निरुतिपाधिनिर्व्याजं॥निरु
पाधापाधेनिर्निमित्तं॥शेषंस्पष्टम्॥ ॥ ११

विकृतेति॥ ॥विकृतैरवात्॥ घोरशब्दात्॥ तथा सत्वदर्शनात् व्याघ्रादिदर्शनात्॥ तथा संग्रामे ऽरण्ये शून्यगृहे च गमनात्॥ आकस्मिकप्रवेशादित्यर्थः॥ गुरुनृपयोरपराधात् प्रतारणात्॥ एभिर्हेतुभिः॥ कृत एव कृतकः स्वार्थे कन्॥ भयानकरसो ज्ञेयः॥ विभेत्यस्मादिति भयानकं

भयानकस्य विभावास्तत्र भरतः॥ ॥विकृतरवसत्वदर्शनसंग्रामारण्यशून्यगृहगमनात्॥ गुरुनृपयोरपराधात्कृतकश्च भयानको ज्ञेयः॥ धाटिकाबंधुर्बंधनश्रवणश्मशानदर्शनादयश्च ऊहनीयाः॥ १४॥ ॥ ड॥ ॥ ९८

॥अत्र ञिभी भये रक्षणादिसूत्रेण नकप्रत्ययः॥ भयानकं भीषणं शास्त्रादितः साधनभूतमस्यास्तीति तथोक्तः॥ अत्राकारो मत्वर्थीयः॥ १४॥ यथेति॥ भयानकविभावोदाहरणमाह॥ ॥

उद्यदिति ॥ ॥ उद्यंत्यः कांतयो येभ्यस्ते तथाभूता ये कडारकेसराः कपिनस्कंधकेशास्तैर्जितो ये पाथो
धरा मेघास्तेभ्यः स्ववल्लत्यो या विद्युतस्तासां दीधितिभिः कांचनीकृताः सुवर्णवत् पिशंगीकृताः जग
ति पृथिव्यां निःशेषभूमिधराः समग्रपर्वता येन स तथोक्तः । कडती कडारः । कडि कृच्छ्रजीवने इति धा
तोः कडिचकीत्यादिसूत्रेण आरप्रत्ययः ॥ केसरोऽस्त्रियामित्यमरः ॥ तथा स्फूर्जन् प्रस्फुरन् यः कंब

यथा ॥ उद्यत्कांतिकडारकेसरदलत्पायोधरप्रस्रवज्जद्विद्युद्दीधितिकांचनीकृतजगन्निःशेषभू
मीधरः ॥ स्फूर्जित्कंबनिनादभिन्नवसुधामार्गप्रविष्टद्विजश्रेष्ठाशीर्वचनप्रहर्षितबलिर्व्यालोकि
मायाहरिः ॥ १५ ॥ निनदः कंबुध्वनिस्तेन भिन्नाया वसुधा पृथ्वी तस्या यो मार्गस्तेन प्रविष्टा ये द्विजास्ते
षां श्रेष्ठानि यानि आशीर्वचनानि तैः प्रहर्षितो हर्षं प्रापितो बलिर्येन स तथोक्तः ॥ मायाहरिः कपट
सिंहः नृसिंह इति यावत् ॥ मातिमिमीते मायते वेति माया ॥ माछेत्यादिसूत्रेण यप्रत्ययः ॥ हरति
जिहरिरिति वा इति हरिः ॥ हृपिशीत्यादिसूत्रेण इन्प्रत्ययः ॥ अनेकार्थत्वेनोक्तं मया हरशापाद्या
म ॥ ॥

रस॰ टी॰
२२

॥तथाहि॥ विस्मोराखामृगेशके सिंहहऊरवाजिषु। दिवाकरे च कपिजे हरिशब्दः प्रयुज्यत
इति॥ व्यलोकि। विलोकितः॥ जनैरिति शेषः॥ ॥अत्र नृसिंहदर्शनं विभावः॥ त्रासः॥१५
॥अनभिमतदर्शनेन॥ अश्लीलवस्त्ववलोकनेन॥ गंधे पृथ्वीगुणे॥ रसे जलघृतादौ॥ नि

बीभत्सरसविभावास्तत्र भरतः॥ ॥अनभिमतदर्शनेन च गंधरसस्पर्शदोषैश्च॥
उद्वेजनैश्च बहुभिर्बीभत्सरसः समुद्भवति॥ अहृद्यवस्तूनां श्रवणस्मरणादय
ऊहनीयाः॥१६॥ ॥ घृणिवस्तुस्पर्शे च ये दोषास्तैः॥ तथा बहुभिरनेकैः उद्वेगजनै
नैनः चित्तासंतोषजनकैः वस्तुभिरिति शेषः॥ एतैः समस्तैर्व्यस्तैर्वा बीभत्सरसः सं
भवति॥ बीभत्सं जुगुप्सितं वस्तु हेतुरस्येति बीभत्सः॥ अकारो मत्वर्थीयः॥ बीभत्सं विकृतं
त्रिष्विदं द्वयमित्यमरः॥१७॥ ॥

तरा॰२
२२

यथेति॥ बीभत्सरसोदाहरणं॥ योधानामिति॥ प्रेतानां भूतजातीनां बहुभिर्बलिकैः॥ कर्तरि तृती
या॥ योधानां संग्रामहतानां वीराणां॥ अधरैः ओष्ठैस्तैरेव अशोककुसुमैः॥ वंजुलोऽशोके इत्य
मरः॥ अक्षते इत्यशोकः शोकनाशनत्वादशोकः॥ अहव॥ अशोकः शोकनाशश्च विचित्रः
मरः॥ अक्षते इत्यशोकः... एवमग्रेपि तृतीया करणे ज्ञेया॥ तथा नेत्रैरेव सितैरं
...

यथा॥ ॥योधानामधरैरशोककुसुमैर्नेत्रैः सितैरंबुजैर्दन्तैः कुंददलैः
करैः सरसिजैः संपाद्य पुष्पांजलिं॥ ॥ ॥४॥

बुजैः श्वेतकमलैः गतासुजननेत्राणां रुक्मत्वापायात्सितत्वाभिधानं॥ तथा दन्तैः रदैरेव कुंद
दलैः॥ माघ्यकुसुमपवित्रिकाभिः॥ माघ्यं कुंदमित्यमरः॥ पत्रं पलाशं छदनं दलं पर्णं छदः पुमा
नित्यमरः॥ तथा करैरेव सरसिजैः॥ रक्तकमलैः पुष्पांजलिं॥ पुष्पैर्भृतोऽजलिः॥ करद्वयसंयो
गः॥ अनक्ति॥ अंज्यतेऽनेनेति रचापाद्यांचजधातोः त्रिप्रत्यये भुता हितः॥ तं विधाय कृत्वा॥ त

घाकरिणां गजानां कर्णयुगं कर्णद्वयं॥ ॥शिंजितं झंकारी॥वाद्यविशेषस्येयं संज्ञा॥ विधायः॥ र
क्तावसिक्तांगकैः॥ रुधिरदिग्धांगकैः॥ सद्भिः॥ अत्रात्यार्थेकवत्॥ पुरभिदः शिवस्य पुरोऽग्रे नृ
त्यं नर्त्तनं॥ समारभ्यते क्रीयते॥ अत्र रूपकालंकारः॥ अत्राधरादिदर्शनमुद्दीपनम्॥ प्रेतवद
व आलंबनमितिविभावनीयम्॥ श्रा॰ह॰॥ १७॥ यत्त्विति॥ यत्त्वाक्यं पदसमुदायात्मकं॥ शि

शिंजितं कर्णयुगं विधायकरिणां रक्तावसिक्तांगकैः प्रेतानां बहुभिः पुरः पुरभिदो नृत्यं समा
रभ्यते॥ १७॥ अद्भुतविभावास्तत्र भरतः॥ यत्त्वतिशयार्थयुक्तं वाक्यं शिल्पं कर्मरूपं च॥
तत्संबंधैरथै रसोऽद्भुतो नाम संभवति॥ मायेंद्रजालार्थलोभादयऊहनीयाः॥ १८॥ ॥

ल्पं चातुर्यं॥ कर्म कार्यं॥ रूपं स्वरूपं॥ अतिशयार्थयुक्तं॥ अतिशयोक्तिविशिष्टं॥ तेनातिशया
र्थेन संबद्धैः संबंधं प्राप्तैः अर्थैः पदार्थैः॥ अद्भुतो नाम रसः संभवति॥ अद्भूयते अद्भवतीति अ
द्भुतमाश्चर्यं तदस्यास्मिन्निति मत्वर्थीयोऽकारः॥ अदस्सर्वस्य भूधातोः॥ अदि भुवो डुतच् इति सू
त्रेण रूपसिद्धिः॥ १८॥ मायेति स्पष्टम्॥ यथेति॥ अद्भुतविभावोदाहरणं॥ ॥१

उद्दामेति॥ ॥अधिकं उद्दामा न इति उद्दामोद्दामानः॥आधिक्ये द्वेवाच्ये इति वार्त्तिकेण द्विर्भावः
॥तथाभूता माद्यं तो ये प्रतिभटाः शत्रवस्तेषां इलने उरस्यो महान् जाग्रत्स्वभावो महिमा यस्य

॥यथा॥ ॥उद्दामोद्दाममाद्यत्प्रतिभटदलनोदग्रजाग्रत्स्वभावः
सोयं देवो मुदे वो भवतु नरहरिस्तारिताशेषविश्वः॥ ॥ ॥

स तथोक्तः॥तारितमुद्धारितं अशेषं समग्रं विश्वं जगत् येन स तथोक्तः॥विशति अस्मिन् सर्वं
इति विश्वं॥अश्मप्रुष तत्कणा हिस्तत्रेण क्तत्वत्सयः॥एतादृशः सोयं नरहरिः॥नृसिंहो देवः॥
वो युष्माकं मुदे हर्षाय।भवतु।तादर्थ्ये चतुर्थी किंच॥ ॥

यस्य नृसिंहस्य प्रौढो योयः प्रतापस्तेन उद्भटा उद्धता विकटा करालाया सटा ॥ सटा जटा केसरयो रित्यमरः ॥ तासां कोटयः अग्राणि तैः पाटितानां मंभोधराणां मेघानां मंत्राणि ॥ अमरगत्यादिषु ॥ अमत्यस्मिन्नन्तरस इत्यंत्रं ॥ अमिवमीतिसूत्रेण क्त्रप्रत्ययः ॥ अंत्रं पुरीतदित्यमरः ॥ विद्युतां ॥ विद्योतते इति विद्युत ॥ क्विप्प्रत्ययः ॥ कैतवेन व्याजेन बहिः निरगुरिव ॥ निर्जग्मुरिवेत्यर्थः ॥

यस्य प्रौढप्रतापोद्भटविकटसटाकोटिभिः पाटितानां मंत्राण्यंभोधराणां बहिरिव निरगु विद्युतां कैतवेन ॥ १९ ॥ सा ॥ अपह्नुतिश्च ॥ अत्र इव शब्देन निन्लक्रमः ॥ यद्यपीवशब्देन सह नित्यसमासो वार्त्तिककृतोक्तस्तथाप्यन्वययोग्यतारूपसामर्थ्याभावान्न नित्यसमासः ॥ तथा च समर्थः पदविधिरिति सूत्रेण सामर्थ्ये सत्येव समासो भवतीति फलितोऽर्थः ॥ अत्र सटावलोकनमुद्दीपनं स्ववेक्तिविशेषणविशिष्टो नृसिंहस्त्वालंबनमित्यवगंतव्यम् ॥ स्रग्धरावृत्तम् ॥ १९ ॥ ॥

यथेति॥ इंद्रजालमुदाहरति॥ व्योम्नीति॥ पंचाशुगः पंचबाणः स एव मायिक ऐंद्रजालिकः
॥ व्योम्नि गमनरूपायां श्रांगणसम्नी अजिरस्ती मायां॥ रंगभूमावित्यर्थः॥ डाबुभाभ्या मन्यत
रस्यामिति डाबभावपक्षे मन इंद्र सूत्रेण ङी प्रतिषेधः॥ सांध्यकिरणसायंकालसंबंधिकि
रणरूपं चेलांचलं वस्त्रांचलं॥ चेलांचलेत्राष्टौ केवलादिभ्यश्चेत्यणादि सूत्रेण मुत्पादितो॥ वि

इंद्रजाले॥ यथा॥ ॥ व्योम्नि श्रांगणस्ती निसांध्यकिरणं विस्तीर्य चैलां
चलं ध्वांतैः कार्मणपांसुभिस्त्रिजगतां नेत्राणि संमोहयन्॥ ॥ ११

स्तार्य प्रसार्य॥ ध्वांतैरेव कार्मणपांसुभिः॥ अंधकाररूपैर्वशक्रियोरजोभिः॥ करणेतृ
तीया॥ जगती नेत्राणि॥ त्रिलोकलोचनानि संमोहयन्सन्। समोहयितुमित्यर्थः॥ अत्र
धनमर्जयन्वसतीतिवत्तहेत्वर्थे लटः शत्रादेशः॥ चेलं चैलं च मुख्यमूरितित्राष्ट्रभेदभाका
शे॥ वशक्रियासंवननं मूलकर्मतु कार्मणमित्यमरः॥ ॥

विहगश्रेणीनां पक्षीपंक्तीनां यो स्वच्छ इत्यस्य स्वच्छघना मिषेण ॥ जिंजिं इति शब्दं कृत्वा ॥ ताराः रू
पाणि शौक्तिकमौक्तिकानि ॥ शुक्तिसुद्भवमुक्ताफलानि ॥ बहिः करोति निःसारयति ॥ इ
ति मन्ये इति गम्यते ॥ तेन गम्योत्प्रेक्षा ॥ रूपकं कैतवापह्नुतिश्च ॥ यत्रातिशयोक्तिस्तत्राद्भु
तरस इत्सवगंतव्यम् स्मरणीयं ॥ २० ॥ ॥ इति श्रीमहोपाध्यायावटंकानंदराम महात्मजे

ता राशौक्तिकमौक्तिकानि विहगश्रेणीरवच्छघनाजींजीकृत्यबहिःकरोतिव
दनात् पंचाशुगो मायिका ॥ २० ॥ ॥ इति श्रीभानुदत्तविरचितायां रसतरंगि
ण्यां विभावनिरूपणं नाम द्वितीयस्तरंगः ॥ २ ॥ ॥ अथानुभावा निरूप्यंते ॥ ॥

नगवद्भट्ट विरचितायां रसतरंगिणीव्याख्यायां नूतनतरीसमाख्यायां विभावनिरूपणो
द्वितीयस्तरंगः ॥ २ ॥ ॥ अथेति ॥ विभावनिरूपणानंतरं ॥ विभावानुभावव्यभिचारिसंयोगा
द्रसनिष्पत्तिरिति भरतसूत्रोक्तक्रमप्राप्तमनुभावनिरूपणं क्रियत इत्यर्थः ॥ ॥

यइति॥ स्पष्टम्॥ करणत्वेनेति॥ करणत्वेन॥ रसोत्सोदस्येति शेषः॥ अनुभावकता॥ अनु
भावानामित्यनुवर्त्तते॥ करणं लक्षयति॥ करणत्वं च॥ फलस्वक्रियाकृतविशेषस्य॥ अयो

॥ ये रसाननुभावयंति अनुभवगोचरतां नयंति ते ऽनुभावाः॥
कटाक्षादयः॥ करणत्वेनानुभावकता॥ करणत्वं च फलायो
गव्यवच्छेदेन संबंधित्वं॥ ननु रसे कथमनुभावापेक्षेति चे
त्सत्यं॥ स्थायिभावोऽपरिपूर्णो रसः॥ ॥८॥ ॥१८

गव्यवच्छेदेन योगेनेत्यर्थः॥ अभावाभावरूपत्वात्॥ संबंधित्वं संबंधवत्वं॥ उक्तं च वाक्य
पदीये॥

क्रियायाः परिनिष्पत्तिर्यद्व्यापारादनंतरं विवक्ष्यते यदा यत्र करणं तत्र दास्मृतमिति॥ नन्विति॥ रसे कथमनुभावापेक्षा विभावमात्रेणैव तत्सिद्धेरिति भावः॥ ज्ञापकेनेति॥ वाद्येन हि

तस्य चांतरत्वात् ज्ञापकेन विना कथं ज्ञानमित्यनुभावस्यापेक्षणीयत्वात्॥ ननु कटाक्षादयः कथमुद्दीपनविभावा न भवंति॥ दृष्टे कटाक्षादौ कामिनो मनोविकारः परिपूर्णो भवति॥ अनुभवसिद्धमपनेतुमशक्यत्वात्॥ किंच॥ प्राचीनसंपतिरपि॥ ॥

कटाक्षाद्यनुभावेन विनांतर्वर्तिनो रसस्याभिव्यक्त्यनुपपत्तेरिति।
भाव॥ नन्विति॥ स्पष्टम्॥ संमतिरिति॥ ॥ २९ २॥

कटाक्षादीनामुद्दीपकत्वे इति शेषः॥ ईषदिति॥ हे सुंदरि॥ ईषत्किंचित् वक्रिता वक्रकृता याः
पक्ष्मपंक्तयस्ताभिः॥ तथा अनाकृतस्मितैः॥ अकारणहास्यैः॥ स्वभावतो हासैरित्यर्थः॥ त
या वीक्षितैः॥ स्वभावत इति शेषः॥ एतैरेव हेतुभिः कृत्वा॥ जगल्लोकः॥ अद्य इदानीं॥ तव कर

ईषद्वक्रितपक्ष्मपंक्तिभिरनाकृतास्मितैर्वीक्षितैरेतैरेव
तवाद्य सुंदरि करक्रोडे जगद्वर्त्तते॥ ॥७॥ ॥१॥

क्रोडे हस्तमध्ये वर्त्तते॥ यद्यपि क्रोडो भुजांतराले स्यादित्यमरोक्तेः क्रोडशब्दो भुजयुगलांतरा
लवाचीतथाप्यत्र लक्षणयांतरालमात्रे वर्त्तते॥ किंच हे कूरे चंडि॥ इहलोके पुनरतः परं तु॥
पुनरप्रथमे विशेषे चेति गणव्याख्याते॥

अंतर्मध्ये पांसुलानि रजोयुक्तानि हेमकेतकदलानि सुवर्णसदृशानि केतकपत्राणि तानि शोणप्रवेतःक्षपमितसमासः॥ शोणीकाष्ठांबुवाहिनी स्यमरः॥ अत्र क्षीरस्वामी॥ काष्ठमित्कपनृस्वेत्कपमितसमासः॥ शोणीकाष्ठांबुवाहिनीत्यमरः॥ अत्र क्षीरस्वामी॥ काष्ठमिति प्रकारोणे। काष्ठान्माहिमयी जलधारिणी शोणी॥ एवं त्वं भोः स्मिन्निति मुस्सते इति॥ विधप्रकारो

अंतः पांसुलहेमकेतकदलश्रोणीदुरापश्रियोरोर्मूलस्य
विभावनारहितपुनः क्रूरे किमाकांक्षसि॥ १॥ ॥ छ॥ ॥

आढकानां चतुष्के च शोणी स्यान्नीवृदंतरे॥ शोणीकाष्ठांबुवाहिन्यां गवां वासे नुजन्यपि ताविति च॥ तस्या दुरापा दुर्लभा श्रीर्यस्य तथोक्तस्य दोर्मूलस्य बाहुमूलस्य विभावो नास्ति कारणान्न किं माकांक्षसि॥ किमिच्छसि॥ ॥ शार्दू०॥ २॥ ॥

सि

इत्यादयः स्मितवीक्षणादयउद्दीपकतयादृष्टाइतिएवंपक्षःक्रियतेचेत्॥ अत्रसमाधान
माहसत्यमिति॥ नायकस्यात्मनिरसानुभवकेरणत्वेननायिकाप्रतिकृताःक टाक्षादयो

इत्यादयइतिचेत्सत्यम्॥ कटाक्षादीनांकरणत्वेनानुभावकत्वं॥
विषयत्वेनोद्दीपनविभावत्वं॥ तथाचात्मनिरसानुभवकरणत्वेनना
यिकानांप्रतिकटाक्षादयोअनुभावाः॥ तेचदृष्टिगोचरीभूताःकामिनोः
मनोविकारयंतोविषत्वेनोद्दीपनविभावाइति॥ सचानुभावः॥ ॥

नुभावाभवंति॥ नायिकयाकृतास्तेस्वदृष्टिगोचरीभूताःसंतोमनोविकारंजन त्यतोवि
षयत्वेनोद्दीपनविभावाभवंतीतिव्यवस्थास्तेयं॥ सेचानुभावइति॥ ॥९

आहार्यं कल्पिताः॥ शेषं सुगमं॥ नयनेति॥ ॥ स्मितं च मधुरवचो धृतिश्च प्रमोदश्च तैः॥ धृतिर्योगांतरे धैर्ये धारणाध्वरतुष्टिषु इति विश्वः॥ प्रमोदो हर्षः॥ अंगविकारैः कटाक्षादिभिः

कायिकमानसाहार्यसात्विकभेदाच्चतुर्धा॥ कायिका भुजाक्षेपादयः॥ मानसाः प्रमोदादयः॥ नाट्ये चतुर्भुजत्वादानमाहार्यः॥ सात्विका रोमांचादयः॥ शृंगाररस्यानुभावास्तत्र भरतः॥ नयनवदनप्रसादैः स्मितमधुरवचोधृतिप्रमोदैश्च॥ विविधैरंगविकारैस्तस्यानुभवः प्रयोक्तव्यः॥ कटाक्षभुजक्षेपादय ऊहनीयाः॥२॥

॥ तस्य शृंगाररस्याभिनयो व्यंजकव्यापारः॥ व्यंजकाभिनयो समाविति भरः॥ प्रयोक्तव्य॥२॥ यथेति॥ शृंगारविभावोदाहरणं॥ ॥ ॥ १

स्तनेति॥स्तनौकलशाविवेत्युपमितसमासः॥तयोर्विषयेयोमुक्ताहारः॥तयाकर्णयोर्विषयेकर्णि
कारं॥निर्गंधिकर्णिकारवृक्षकुसुमं॥द्रुमोत्पलःकर्णिकारइत्यमरः॥व्याख्यातंचैतत्क्षीरस्वामि
ना॥द्रुमस्यास्यउत्पलानीवपुष्पाणीतिद्रुमोत्पलःसुरभिश्चायं॥अन्योनिर्गंधिःकर्णिकाइत्यत्री
तिकर्णिकारइतिघर्थेऽयंप्रवर्त्ततिइति॥तथामौलौमस्तकेमाला॥एतत्सर्वंपरिभवभयात्स्मरा
नवभयादेवदूरेण्यवारिनिवारितं॥अत्रावतानवाचित्वाभावान्नपरोनुवावत्तानइतिघन्त्र

ययाः॥मुक्ताहारंस्तनकलशयोःकर्णयोःकर्णिकारंमौलौमालापरिभवभयादेवदूरेण्यवा
रि॥दृष्टेःमौष्टेसमजनिपुनःसुभ्रुवोभूषणायप्रातर्वातप्रचलकमलश्रेहइस्रैःकटाक्षः॥२॥

दुःखेनकृच्छ्रेणईयतेइतिदूरं॥दुःखस्येणोऽउरीणोलोपश्चेतिसूत्रेणरकप्रत्ययः॥अत्रदूरांति
कार्थैमश्चतस्रोविभक्तयःफलेनताइतिसिद्धांतात्प्रातिपदिकार्थमात्रेसप्तमी॥नायिकयेतिशे
षःकिञ्च॥अमीष्टेस्वामिनिदृष्टेसतितुपुनस्तस्यैसुभ्रुवःनायिकायाःप्रातःप्रातःकालेवाते
नतत्अधिकंतरलंचंचलंयत्कमलंतस्यश्रेइहइस्रैः॥लक्षणयातत्सदृशाइत्यर्थः॥अत्रकुध

58

कुहेतिसूत्रेयंप्रतिकोपरत्फक्रे॥ कटाक्षस्यकमलंप्रतिकोपाभावान्नचतुर्थीसमासः॥ एताद्दृ
शः कटाक्षः॥ अक्ष्णतेव्याप्नोतिरूपमिति। अक्षि॥ कटंविकटंअक्षियस्मिन्प्रसारेसकटाक्षः॥ व
क्रीकृतचक्षुप्रसारः॥ बहुव्रीहौसक्थ्यक्ष्णोः स्वांगात्षजितिसमासांतः॥ कटाक्षोपांगदर्शने
इत्यमरः॥ भूषणायअलंकरणायसमजनि॥ संजातः॥ दीपजनेत्याहिनाकर्त्तरिचिणूतस्य

हास्यानुभावास्तत्रभरतः॥ ॥विकृताकारैर्वाक्यैरंगविकारैश्चविकृतै
र्वेषैश्च॥ हास्यंजनयेद्यस्मात्तस्मात्ज्ञेयोरसोहास्यः॥ ४॥ ॥ ॥

लुकः॥ अत्रनायिकाश्रयस्यशृंगारस्यकटाक्षोऽनुभावः॥ मंदाक्रांतावृत्तम्॥ ३॥ विकृतेति॥ ॥वि
कृताकारैर्वाक्यैः विकृतस्वराक्षरपदसमुदायैः॥ अंगविकारैर्बाधियादिभिः विकृतवेषैः॥ वि
परीतवस्त्रादिधारणैः॥ कृत्वा॥ यस्मात्कारणाद्धास्यंजनयेत् प्रकाशयेत्तस्माद्धेतोर्हास्योरसोज्ञेयः॥ ४

ओष्ठेति॥ ॥ओष्ठविवरणदर्शनेन॥ अधरप्रकाशनदर्शनेन॥ नासिकाकपोलयोर्ध्मानेन॥ दृष्ट्या व्याकोशाः॥ व्याकोशा विकचस्फुटा इत्यमरः॥ कुंचनं संकोचस्ताभ्यां चकृत्वा हास्यो भवती निस्वयं विज्ञायं॥ ५॥ यथेति॥ हास्यविभावोदाहरणं॥ पात्रीकृतेति॥ शिशोः स्कंदेगणपतेर्वा॥ कपालमंडलमं उल्लाकारं शिवस्य निसाकपालम्॥ कपरतिसौत्रोधातुः कप्रतीतिकपालं॥ तमिविडीतारिस्मृत्ये

अंष्ठाधरविवरणदर्शननासाकपोलस्पंदहृष्टिवाकवेषकुंचदयऊहनीयाः॥ ५॥ यथा॥ पात्रीकृत्य कपालमंडलमिदं पीयूषभानोः कलां वत्रीकृत्य फणामणिं फणिपतेः संपाद्य तस्मिन् शिखाम्॥

एकाल्लन्प्रत्ययः॥ मंड्यते मंडयतीवा मंडलं मडि भूषायामिति धातोः कलप्रत्ययः॥ पात्रीकृत्य शरावं कृत्वा॥ पीयूषभानोश्चंद्रस्य कलां॥ कला तु षोडशो भाग इत्यमरः॥ वर्त्तीकृत्य॥ दशां कृत्वा॥ तस्यां वर्त्तौ॥ फणिपतेः शेषस्य फणामणिं शिखां संपाद्य संयोज्य॥ ॥सायंसायंकाले॥ सायं सायं प्रगे प्रातरित्यमरः॥ दीपविधिं दीपनिर्माणं॥ वितन्वति कुर्वति सति॥ मंदं यथा तथा॥ अत्र

क्रियाविशेषणत्वादेकवचनम्॥ ॥क्रियाविशेषणानां क्लीबत्वमेकवचनं चेति भाष्यवार्त्तिकव्याख्याने
एकवचनं द्वितीयायाएवेति माधवः॥ क्रियानां कर्मत्वात्तद्विशेषणानामपि कर्मत्वमिति फलितान्वयप
क्षः॥ रत्नाकरस्तु प्रथमातिक्रमे कारणाभावात्प्रथमायाएवेति व्यापारान्वयपक्ष इति॥ हसन्त्या हासं कु
र्वन्त्या उमया पार्वत्या॥ किंचिदीषत् कुंचितो नतो अपांगो नेत्रान्तो यस्यास्तयोः भंगेन तरंगेण॥ अपांगो नेत्रयोरंतौ

सायं दीपविधिं वितन्वति शिरोभं रेह संतो मया किंचित्कुंचदपांगभंगकुटिला दृष्टिः समारोपिता॥ क
करुणारसस्यानुभावास्तत्र भरतः॥ निःश्वसितेन च रुदितेर्मोह प्रलाप परिदेवनैश्च॥ अभिनेयः क
णाख्यो देहाभिघातादिभिश्चैव॥ मुखशोषप्रलापवैवर्ण्यादियऊहनीयाः॥७॥ विस्मर रः॥ भंगस्त
रंगऊर्मिर्वा स्त्रिस्मरः॥ कुटिला वक्रा दृष्टिः समारोपिता॥ अत्र पार्वत्याश्रयस्य हास्यरसस्य तदवलोक
नेदृष्ट्यारोपणमनुभावः॥ न्याइ॰॥६॥ निश्वासेति॥ ॥निश्वासो निश्चैः श्वासः श्वसनं उच्छ्वासः निश्वास
वायुनेति वा र्थः॥ तथा रुदितैः॥ क्रंदितैः॥ रुदितं क्रंदितमित्यमरः॥ परिदेवनैः विलापैः॥ विलापः
परिदेवनमित्यमरः॥ अभिनेयो व्यंजनीयः॥७॥ ॥८॥

यथेतिकरुणरसोदाहरणम्॥ तातेति॥ ॥गणानांजनसंघातानां पतिःरक्षकस्तस्मिन्॥ संघातेश्च
मथेगणइत्यमरः॥ तातेपोषकत्वात्तातःतुल्ये॥ तातस्तुजनकःपितेत्यमरः॥ नाकंस्वर्गंनिगच्छ
तिशास्त्रवतिसति॥ भावेसप्तमी॥ तस्यादेव्याःमहिष्याः॥ देवीकृताभिषेकायामित्यमरः॥ दो
र्भ्यांहस्तयोःसंबंधिशिथिलमपिकंकणवलयंवाञ्चाशाष्टनैवत्यजति॥ वाञ्चाशाष्टआबंतः॥ दा

॥यथा॥ ॥तातेयातेबतगणपतौनाकमद्यापितस्यावाञ्छं
देव्यास्त्यजतिशिथिलंकंकणंनैवदोर्भ्यां॥ ॥७॥ ॥ ॥

पंचेवहस्तंतानामिस्फक्केलोकेशिथिलोजनःशाष्टंनकरोतिइदंतुशिथिलमपिसशाष्टमित्यपि
शाष्टार्थः॥ नेत्रेनयनेनिर्यत्स्ययस्मिन्निर्गच्छदश्रुजलेसति॥ निष्पर्वस्येणोलदः शात्राहेत्राः॥ कु
चयोर्विषये॥ पाटीरपंकश्चंदनपंकः॥ पटपुटेतिदंडकेपठितस्यचौरादिकस्यपटधातोःअन्ये
भ्योपिदृश्यतेइतिकीरप्रत्ययः॥ ॥१०॥

अद्यापि नाशी न भवति॥ कुचयोरुपरि नेत्राश्रुधारापातेपि नाशी न भवतीति विरोधः॥ अंतः शोकाग्निप्रादुर्भावात् उपरि पतितानामपि नेत्राश्रुजलानां शोषण संभवान्नोद्वलमित्यविरोधः॥ तु पुनः कज्जलं नेत्रांजनस्थैर्यं स्थिरत्वं न एति॥ अश्रुधारया तन्नाशादिति भावः॥ कस्यचिद्राजपुरुषस्येयमुक्तिः॥ अत्र करुणाश्रयाया नायिकायाः कज्जलास्थैर्यमनुभावः॥ मंदाक्रांतावृत्तम्

आद्यापि प्राप्नी न भवति कुचयोर्नापि पाटीरपंको नेत्रे निर्यत्सयसि न पुनः कज्जलं स्थैर्यमिति॥ ८

रौद्रानुभावास्तत्र भरतः॥ नानाप्रहरणसंकुलशिरस्कंपैः कराग्रनिष्पेषैः॥ घोरैरर्थविशेषैस्तस्याभिनयः प्रयोक्तव्यः॥ ९॥

॥ ८॥ नानेति॥ नानाप्रहरणैः अनेकप्रहारैः संकुलं व्याप्त यत् शिरस्तस्य कंपैः कृत्वा॥ कराग्रनिष्पेषैः॥ हस्ताग्रमर्दनैः॥ तथा घोरैरुग्रैः अर्थविशेषैः हंतपीडनादिभिरित्यर्थः॥ तस्य रौद्रस्य अभिनयः॥ व्यंजकव्यापारवाचिना अभिनयशब्देनाभिव्यक्तिर्लक्ष्यते॥ प्रयोक्तव्यः प्रयोज्यः॥ ९॥ ॥ यथेति॥ रौद्रानुभावं लक्षयति॥ ॥ ९

पेयइति॥ ॥भीमेनभीमसेनेन॥ बध्नभ्रूकुटियस्यांक्रियायांयथातथा॥ सकोपभ्रूविकारेस्यात्भ्रू
भ्रूकुटिर्भृकुटिः पराकुटिरितिहेमः॥ तथा घनरवंनिविडशब्दं॥ तथा दंतैर्निष्पिडितओष्ठोयस्यांक्रियायां
चटुलश्चासौविंध्याचलश्चेतिविंध्याचलचटुलःजंगमोविंध्याद्रिरित्यर्थः॥ अभूतोपमेयम्॥ विशेष
णंविशेष्येणबहुलमित्यत्रबहुग्रहणाद्विशेष्यस्यविशेषणेनसहकर्मधारयः॥ तस्ययेचमत्का

भ्रूकुटीदंतौष्ठपीडमानाद्यकुहनीयाः॥ यथा॥ ॥ये ये भीमेन बध्नभ्रूकुटि घनरवं दंतनिः
पीडितौष्ठं विक्षिप्ता व्योम्नि विंध्याचलचटुलचमत्कारभाजः करीन्द्राः॥ ॥ठ॥ ॥१

रस्तंमजंतीतितयोक्ताः॥ पदार्थवृत्तिनिदर्शनियम्॥ येयेकरीन्द्राःगजेन्द्राः व्योम्निगगने विक्षि
प्ताः भ्रास्ताः॥ तेषांएषांसर्वेषामितिशेषः॥ अत्रयेयेइतिवीप्सयासर्वात्मिकत्वमुक्तंतदेवतच्छब्देन
परामृश्यते॥ वीप्सात्मस्यार्थस्यवीप्साभिन्नत्वात्तच्छब्दस्यनित्यवीप्सयोरितिद्वित्वंन॥ यत्रतुतच्छ
ब्देनवीप्सैवपरामृश्यतेतत्रतुतच्छब्दस्यद्वित्वंभवत्येव॥ यथाविवर्णभावंसससभूमिपालःसासा
क्रियानसुखसुखीबभूवेत्यादौ॥

तयोक्तं काव्यप्रकाशे॥ ॥येनकेनचिद्रूपेणस्थितंसवत्विकंवस्त्वास्तितत्याभूतमेवतदृष्टेन परामृष्यतइति॥ वीरसाल्लक्षणंनुमहाभाष्यादेरवगंतव्यंविस्तरभियात्रनोप्रदर्शितं॥ नयविधुतात्कनीतिकंपितात्॥ कपोलात्॥ जातित्वादेकवचनम्॥ उड्डीयउत्पत्य॥ एषाकाचिन्मधुकरपटली भ्रमरपंक्तिः॥ पटलीशब्दस्यापचयविशिष्टत्वेनविवक्षितत्वात्स्त्रीत्वंस्त्रीस्यात्काचिन्मणात्वादिविवक्षाप

तेषांमेषाकपोलादिवनयविधुतात्काचिडुड्डीयलग्नाबिंबेपीयूषभानोर्मधुकरपटलीलांछनस्यछलेन॥१०॥ ॥वीरसानुभावास्तत्रभरतः॥ ॥ ४॥ ॥

चयेयदीत्यमरः॥ मधुकरपटलेभ्रमरांकां तनोतीत्यत्रतूपचयस्याविवक्षितत्वात्पुंस्त्वमितिबोध्यम्॥ लांछनस्यछलेनव्याजेन। पीयूषभानोश्चंद्रस्यबिंबेमंडले॥ लग्नेवेत्युत्प्रेक्षा। नयविधुतत्वपिपाठः॥ बिंद्यतेरूप्यते वाइतिबिंबंबिंबिअवयवेवारूपरूपक्रियायामित्यस्यउच्चारयत्वेत्कणादिसूत्रेणवन्नप्रत्ययेनिपातितः॥ अत्रभीमसेननिष्ठरौद्ररसस्यगजोत्क्षेपणादयोऽनुभावाः॥ इयंसापेक्षवोत्प्रेक्षेत्यलंकारसर्वस्वकारः॥ स्रग्धरावृत्तम्॥१०॥

शौर्यैरिति ॥ शूरवति संग्रामं मन्यते रिपुभिरिति शूरः ॥ शूर गतौ ॥ सुसितिचीत्यादिसूत्रेण क्रन्प्रत्ययो दीर्घ
श्च ॥ दधातेः स्तापत्सु चित्रमिति धीरः ॥ धा धातोः सुसूधेत्यादिसूत्रेण क्रन्प्रत्ययः ॥ ब्राह्मणादेराकृतिग
णत्वात्स्वार्थीरश्राष्टयोः कर्मणि ष्यञ् ॥ तेन शौर्यं शूरकर्मभिः संग्रामाभिगमनादिभिः ॥ धैर्यं रणस्थै
र्यादिभिः ॥ वीरयते पराक्रमं कंपयते इति वीरः ॥ विक्रान्ता रगतौ कंपने चेति धातोः ष्वाद्यच् ॥ चौरादिक
स्य विक्रान्तस्यार्थस्य वा ॥ तस्मिन् यानि साधूनि सत्वानि कर्माणि तानि वीर्याणि तैः ॥ वीर्यं बले प्रभावे चेत्यमरः

शौर्यैर्वीर्यैर्धैर्यैरुत्साहपराक्रमप्रभावैश्च ॥ वाक्यैराक्षेपकृतैर्वीरः रसः सम्यगभिनेयः ॥ ११ ॥

चत्वार्यष्टाङ्गे तो वीरकर्मवेति क्षीरस्वामी ॥ शुक्रं तेजोरेतसी च बीजवीर्येन्द्रियाणि चेति श्लोकान्तरे तेन
वीर्यं शुक्रं बु ॥ भक्तिः साधर्म्ये उक्ता ॥ कर्मणि तु युवादित्वादणि वैरमिति रामाश्रमः ॥ तथा उत्साहे
न । पराक्रमेण प्रभावेण चेत्यर्थः ॥ तत्रोत्साहः ॥ युद्धादिसंरंभः ॥ कार्यारंभेषु संरंभः स्थेयानुत्साह उच्य
त इति काव्यप्रदीपोक्तेः ॥ तत्र पराक्रमः ॥ शत्रुपराजयः । पराक्रमोऽरिविजय इति रामाश्रमः ॥ प्र
भावः क्षात्रं तेजः ॥ स्यात्प्रतापः प्रभावश्च यत्तेजः कोशदण्डजमित्यमरः ॥ तयाक्षेपेण निंदया कृतैर्वी

केयूरस्तु स्वचनैः अस्य श्लोकस्य मुनिवचनत्वात् न स्वक्तिर्नोद्भावनीया॥ शेषं स्पष्टम्॥ ११॥ ॥ ॥
नन्विति॥ ॥ अतींद्रियस्य रसस्य शारीरधर्मत्तापकानवितुं युक्ताः कथं मानसो धैर्योत्साहाविति
चेत् उच्यते॥ सत्यमिति॥ धैर्यशब्देन लक्षणया जन्मस्थाचल्याभावः॥ उत्साह शब्देन पुलकादि

नन्वतींद्रियस्य रसस्य ज्ञापकाः शारीरधर्मान्नवितुमर्हंति॥ अत एव सर्वत्र उक्ताः॥ तथा च धै
र्योत्साहेन शारीरधर्मौ इति चेत् सत्यम्॥ धैर्यपदेन चांचल्याभाव उक्तः॥ उत्साह पदेनाश्रु
पुलकादयो लक्षिताः॥ युरानुभावश्च तुर्विधः॥ तत्र मानसोप्यनुभाव उक्तः॥ स च तत्त्यमा
न एव गमकः॥ स च मानसत्वेंद्रियकश्चेति न कश्चिद्विशेषः॥ विनयदाजादयऊहनीयाः
॥१२

यश्चेति॥ य इति पक्षांतरे। अनुभावेति॥ शारीरेंद्रियवाङ्मानसजन्यत्वेनेति भावः।
तस्यानुभावस्य। अनुभावकं॥ बोधकं॥ ज्ञानमेवाच परे सत्तज्ज्ञानं मानस्यं समनोजत्वं॥ ऐं
द्रियकं वास्तु तत्र विशेषो नास्ति॥ १२॥ ॥

॥यथेति॥ ॥युद्धवीरस्याऽनुभावं लक्षयति॥ अग्र इति॥ ॥समग्रा ये समरव्यापारास्तेषां या दीक्षा
नियमग्रहणं तस्या गुरुः गुरुवत् शिक्षकः॥ दीक्षा मौञ्ज्योपनयननियमव्रतादेशेषु इतिधा
तो गुरोश्च हलः इति स्त्रियामङ् प्रत्ययः॥ एतादृशो वासवजित् रावणपुत्रः॥ अग्रे सैन्यात् प्रवर्त्त
त इति शेषः॥ तस्य वासवजितः पार्श्वे समीपे॥ पर्शूनां समूहः पार्श्वं॥ पर्श्वाणि स्युः कक्षयो इ तेणस्

युद्धवीरस्यानुभावो यथा॥ ॥अग्रे वासवजित् समग्रसमरव्यापारदीक्षागुरुः
पार्श्वे तस्य विपक्षपक्षदमनक्रीडाधनो रावणः॥ ॥८॥ ॥१९

स्मितिश्चेति सूत्रेण परत्वात् नसंज्ञानिमित्त ओ गुणो न॥ विपक्षदमनं शत्रुसैन्यपीडनं तदेव
क्रीडा सैव धनं यस्य स तथोक्तः॥ रावणः॥ अस्ति॥ अत्रैकतिङ् वाक्यमिति लक्षणात् सिद्ध
येऽप्रयुज्यमानोऽप्यस्तिर्भवति॥ अस्तिर्भवतिपरः प्रथमपुरुषेऽप्रयुज्यमानोऽप्यस्ती ति भाष्य
कारः॥ तेन क्वचित्स्यात् क्वचित् भवतीति सूत्रवृत्तिषु प्रयुज्यते॥ केचित्तु अस्तिर्भवतिपर इ

तिपठंति॥ भवंतिलटः पूर्वाचार्यणांसंज्ञेतितत्रमूलंमृग्यं॥ ॥स्यादित्यत्रलङभावात्भवतीसत्राप्ते रभावाच्चेति॥ इत्थमनेनप्रकारेणसर्वतः परिजनेहूतात्होजल्पतिसति। संध्यास्मृतिं॥ संध्योपासनांकुर्वतःश्रीरामस्य॥ संध्योपासनांकुर्वतारामेणेत्यर्थः॥ द्वितीयार्थेषष्ठी॥ सतांगतमिसाहिवत्॥ यथाहुःशाब्दिकाः॥ कर्मादीनामपिसंबंधमात्रविवक्षायांषष्ठ्येवेति॥ कुंभकस्यकुं

इत्थंजल्पतिसर्वतःपरिजनेसंध्यास्मृतिंकुर्वतः॥
श्रीरामस्यनकुंभकस्यपवनेक्षुण्णःसकोपिक्रमः॥

भयितुंप्रवृत्तस्य॥ तुमुन्ण्वुलौक्रियायांक्रियार्थायां॥ कृष्णंदर्शकोयातीतिवत्॥ प्राणमित्यर्थलिप्सं॥ पवनेलक्षणयातद्धारणे॥ सकोपिक्रमः॥ आरोहावरोहलक्षणः॥ नक्षुण्णोनाभ्यस्तः॥ नस्मृतइतियावत्॥ उत्साहातिशयादितिभावः॥ अत्ररामनिष्ठवीरस्यप्राणायामक्रमविस्मरणरूपोऽनुभावः॥ शार्दू॰॥ १३॥

वीररसानुभावं दर्शयति॥ ॥ध्वांतेति॥ ॥केशवः श्रीकृष्णः॥ क्लिश्नातीति केशः क्लेशः क्लिशावि
बाधेइति धातोः क्लिशेरन्लोपश्चेति सूत्रेण अन्प्रत्यये लकारलोपे रूपं॥ ते सामुद्रिकोक्त
लक्षणयुक्ताः संत्यस्येति केशवः॥ केशाद्वोन्यतरस्यामिति वप्रत्ययः॥ यद्वा कश्च अश्च ईशश्च
केशास्ते संत्यस्याज्ञाः इति॥ ध्वांतस्तोमधरे॥ अंधकारसमूहदृति॥ तथा जगद्भयकरे॥ पायो

दयावीरानुभावो॥ ॥यथा॥ ॥ध्वांतस्तोमधरे जगद्भयकरे पायोधरे वर्ष
ति क्रोडव्याकुलवत्सगोकुलदयार्दीनेक्षणः केशवः॥ ॥

धरे मेघे वर्षति सति॥ तत्र
मेघर्त्तिर्भयेषु रूढ इति खप्रत्यये भयंकर इति स्यात्तथापि अलंकारः क्षेमकर इति व
तकर्मणः शेषत्वविवक्षायां पचाद्यच्॥ एवं पायोधरशब्देपि ज्ञेयः॥ क्रोडे अनुजांतरालेव्याकुलं
व्यग्रं वत्सानां गवां च यत्कुलं वृंदं तस्मिन्दयार्दयातयार्दीनेकातरे ईक्षणे नेत्रे यस्य स तथोक्तः
॥ ॥

हस्तेन्यस्तोयोमहीधरोगोवर्धनस्तस्यच्युतिभियापतनभयेनहेतुनास्वस्तमधःपतितमपिवेणुवंत्री॥अंगुलीपल्लवैः॥पल्लवोपमांगुलीभिःनोरीकरोत्येव॥एवकारोभिन्नक्रमः॥नांगीकरोतीत्यर्थः। तथातनोःस्वशरीरात्॥स्वस्तमंशुकंवस्त्रं॥नाहरतिनगृह्णाति॥

हस्तन्यस्तमहीधरच्युतिधियानैवांगुलीपल्लवैःस्त्रस्तंवेणुभृत्करोतिनतनोःस्त्रस्तंस्वहस्तंशुकं॥१४॥ ॥ठ॥ ॥ ठ॥ ~

वस्त्रमाछादनंवासश्चैलंवसनमंशुकमित्यमरः॥पदार्थहेतुकंकाव्यलिंगमलंकारः॥अंशुकमित्यत्राश्चोतेरौणादिकउकन्प्रत्ययः॥अमर्ष्यावीराश्रयस्यकृष्णस्यवेणुवस्त्रयोरग्रहणमनुभावः॥चापलं॥ ॥१४॥ ॥

यर्येति॥ ॥दानवीरानुभावमुदा हरति॥औदास्यमिति॥ ॥हे कौत्सकृषे॥ मृन्नाजनं॥नवत्स्जना
र्यस्तानीतंमृत्तिकापात्रं॥वीक्ष्य दृष्ट्वा॥औदास्यंउदासीनत्वंनविधेहिमाकुरु॥गृहात्नगच्छ॥गृहं
विहाय मागाः॥ल्यब्लोपेपंचमी॥किंतुनवं तंत्वांक्षणंक्षम्यतामित्यर्थः॥एतदेवंवक्तुकृया
च॥द्विकर्मकस्ययाचेर्दुहादित्वात्प्रधानेकर्मणिप्रत्ययः॥एतद्रघुनेतिपाठःसाधीयान्॥चे

दानवीरानुभावो॥ यथा॥औदास्यंनविधेहिगच्छनगृहात् संवीक्ष्यमृन्नाजनंयाचेकिंतुनवं
तमेतद्यदिवेजकौत्सक्षणंक्षम्यताम्॥दासस्वेदहमस्मिंचे इसुमतीसर्वैवसंगृह्यतांस्वर्णंचे
ञुरुदक्षिणाधनपतेरानीयसंपाद्यते॥१५॥ त्वयदाइंदासोस्मिनवामि॥चेत्तदासर्वासम
ग्रोववसुमतीपृथ्वीसंगृह्यतांचेद्यदिगुरुदक्षिणस्वर्णमस्ति॥तदपिधनपतेःकुबेरात्॥
आनीयआकृत्य॥संपाद्यतेदीयते॥अत्रदानवीराश्रयस्यरघुराज्ञःकौत्साम्वासनमनुभाव
चागदं१५

करचरणेति॥ ॥करचरणादीनां प्रकंपनैः॥ तथा शुष्कैरोष्टकंठताल्वादिभिः॥ कृत्वा॥ शुषु धातो
रौणादिकः कन्॥ कणयति काण्यते वा कंठः॥ चौरादिकस्य कण निमीलन इति धातोः कणे

भयानकस्यानुभावास्तत्र भरतः॥ करचरणनेत्रमस्तकस
वांगेषु प्रकंपनैश्चैव॥ शुष्कौष्टताल्वकं वैर्भयानको नि नित्य
मभिनेयः॥ रोमांचवदनवैवर्ण्यस्वरभेदादयश्च हनीया
१६

ष्ट इति वप्रत्ययः॥ स्पष्टमन्यत्॥१३॥ ॥यथेति॥ भयानकानुभावान्॥ दर्शयति॥ ॥

व्यस्तेति ॥ व्यस्तमितस्ततः स्रस्तान्यधः पतितानि यानि तृणानि ॥ अर्धाद्वशिष्टानित्यर्थः ॥ तै
रवलीढानि व्याप्तानि यानि वदनानि तेभ्यो व्याकीर्णः फेनोद्भवो यस्यां क्रियायां काकुर्ध्वनिस्तया ध्व
नेर्विकारः तया व्याकुलो घोरो भयकरो घर्घरश्चासौ रूपो रवः शब्दो यस्यां क्रियायां ॥ स्फारीभवंति
लोचनानि यस्यां क्रियायायां ॥ काकुः स्त्रियां विकारो यः शोकभीत्यादिभिर्ध्वनेरित्यमरः ॥ कैश्चि

व्यस्तस्रस्ततृणावलीढवदनव्याकीर्णफेनोद्भवं काकुव्याकुलघोरघर्घररवस्फारीभवल्लोच
नम् । कंपप्रस्खलदंघ्रिवामनतनुश्वासोर्मिनुन्नाधरं विस्तीर्णे नु जगस्य वक्त्रकुहरे कृष्णस्य गावः स्थिताः ॥४७

हृ ॥ कीयते इति काकुरिति क्षीरस्वामी ॥ तथा कंपेन प्रस्खलंतावंघ्री यस्यां क्रि
यायां । वामना तनुर्यस्यां क्रियायां ॥ तथा श्वासोर्मिभिर्नुन्नाः प्रेरिता अधरा ओष्ठा यस्यां क्रिया
यां ॥ एतानि षट् क्रियाविशेषणानि ॥ कृष्णस्य गावः धेनवः विस्तीर्णे विकाशिते ॥ भुजगस्य तद्रू
पिणोऽघासुरस्य । वक्त्रकुहरे मुखविवरे ॥ स्थिताः ॥ अथ कुहरं गुहरं सुषिरं विवरं बिलमित्य
मरः ॥

रस॰टी॰ ३७ | तरंग ३

अत्र भयानकरसाश्रयाणां गवां कंपनादयोऽनुभावाः॥ व्रणई०॥१७॥ ॥आननेति॥ ॥आननानि नेत्राणि च तेषां विघूर्णनेन॥ तथा लोचनानां नासाया मुखस्य चाच्छादनेन। तथा अव्यक्तः उद्वेपारपतनैः॥ मृक्षणा यान्ति हिस्वर्दिजेः कर्त्तरिक्तः॥ ततो नर्त्तत्युरुषः॥१८॥ बीभत्सानुभावं दर्शयति ॥कपटहरेरिति॥ लक्ष्मीः पद्मालया पद्माकमला श्रीर्हरिप्रियेत्यमरः॥ कपटहरेर्नृसिंहस्य विकृ

बीभत्सानुभावास्तत्र भरतः॥ आनननेत्रविघूर्णनलोचननासामुखाच्छादनेनैवः॥ अव्यक्तपादपतनैर्बीभत्सः सम्यगभिनेयः॥ सर्वांगसंहारनिष्ठीवनादयरुद्धनीयाः॥१८॥ यथ॥ ॥कपटहरेर्मुखकुहरे विकृते संवीक्ष्य हि नकरं लक्ष्मीः॥ इतदैत्यपललकवलम्लांता मुखमंशुकेः पिदधे॥१९॥ ते विस्तारिते मुखकुहरे मुखविवरे॥ दिनकरं सूर्यं संवीक्ष्य दृष्ट्वा हतो यो दैत्यो हिरण्यकशिपुस्तस्य पललं मांसं तस्य यो कवलस्तस्य म्लांता॥ पललेति तिपललं॥ पललं गतावित्यस्य कंवल्लारिपुकलप्रत्ययः॥ कवलत्रासोग्रहषाद्विपुत्तेयः॥ अंशुकैर्वस्त्रैर्मुखं पिदधे॥ मा गुरिमतेऽपरका...पः॥ अत्र भ्रांतिमदलंकारः॥ अत्र मुखपिधानमनुभावः॥१६॥

३७

स्पर्शेति॥ ॥स्पर्शेनिग्रहणेनोल्लासेन च॥अद्भुतचित्राद्देरित्यर्थः॥शेषसुगमं॥१३॥यथेति॥अ
द्भुतानुभावं दर्शयति॥ पांडवमिति॥ ॥दोर्दंडाभ्यां दंडोपमबाहुभ्यां खंडितं अरातिमंडलं येन तं॥

अद्भुतरसानुभावास्तत्रभरतः॥स्पर्शग्रहणोल्लासैर्हाहाकारैश्च साधुवादैश्च॥
वेपथुगद्गदवचनैःस्वरभेदैरनिनयस्तस्य निमेषप्रेषणरोमांचादयकद्
नीयाः॥१७॥ यथा॥ ॥पांडवं वीक्ष्य दोर्दंडखंडितारातिमंडलम्॥ ॥ ॥

पांडवं पार्थं वीक्ष्य॥स्थितानामिति शेषः॥तेन समानकर्तृकत्वनिर्वाहः॥ ॥ॐ नमः॥॥

नाकिनां देवानां नेत्रे॥ जातित्वादेकवचनं॥ जात्याख्यायामिति सूत्रानुशासनात्॥ नयतीति नेत्रं॥ औणादिक स्त्रन्॥ निमेषाः नेत्रसंकोचाः॥ अद्यापि नैव जायते॥ धातूनामनेकार्थत्वान्न भवंती त्यर्थः॥१८॥ ॥इति श्री महोपाध्यायावटंकानंदराममहात्मजगवन्दकृ विरचितायां रसतरं

अद्यापि नाकिनां नेत्रे निमेषो नैव जायते॥२१॥ ॥इति श्री भानुदत्तविरचि तायां रसतरंगिण्यामनुभावनिपणं नाम तृतीयस्तरंगः॥३॥ अथ सात्वि कभावा निरूप्यंते॥ तत्र भरतः॥ स्तंभस्वेदोथ रोमांचः स्वरभंगोथ वेपथुः॥ वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्विका मताः॥१॥ ॥ ॥१॥

गिणीव्याख्यायां नूतनतरीसमाख्यायामनुभावनिरूपणे समाप्तस्तृतीयस्तरंगः॥३॥ ॥अथे ति॥ ॥अथेति॥ ॥अनुभावनिरूपणानंतरमित्यर्थः॥ स्तंभेति॥ ॥स्पष्टम्॥१॥ ॥

नन्विति॥ अस्मत्स्तंभादेः॥ शेषं मूल एव स्पष्टम्॥ अत्रेति॥ सत्वशब्देन जीवच्छरीरं तस्य धर्माः सा

नन्वस्य सात्विकत्वं कथं व्यभिचारित्वं न कुतः सकलरससाधारण्यादिति चेत्॥ अत्र केचित् सत्वं
परगतदुःखभावनायामत्यंतानुकूलत्वम्॥ तेन सत्वेन वृत्ताः सात्विका मता इति व्यभिचारि
त्वमनादृत्य सात्विकत्वव्यपदेश इति तन्न गर्निर्वेदस्मृतिधृतिप्रभृतीनामपि सात्विकत्वव्य
पदेशापत्तेः॥ न च परगतदुःखभावनायामष्टावेते समुद्यंते सोयमनुकूलः शब्दार्थः॥ अत एव
च सात्विकव्यपदेशस्तेषामिति वाच्यम्॥ निर्वेदस्मृतिधृतिप्रभृतीनामपि सात्विकापत्तेः॥ अ
त्र प्रतिभाति सत्वशब्दस्य प्राणिवाचकत्वादत्र सत्वं जीवच्छरीरम्॥ तस्य धर्माः॥ सात्विकाः॥ त
थाच शारीरा भावाः स्तंभादयः सात्विका भावा इत्यभिधीयंते॥ त्विकाः स्तंभादयः॥ ॥१

स्थायिनोव्यभिचारिणश्चांतरा इति व्यवस्था ज्ञेया॥ सत्वमस्त्रीतु जंतुषु इति कोशः जंतुवाचकानु
सारेणेदमुक्तं॥ रसविलासेतु॥ रजस्तमोभ्यामस्पृष्टं मनः सत्वमिहोच्यते॥ उभयत्र ये स्थ

स्थायिनोव्यभिचारिणश्चभावाअंतरतया नशारीरधर्माः॥ शारीरधर्म
त्वे सति गतिनिरोधः स्तंभः॥ नच निद्राऽपस्मारादावतिव्याप्तिः॥ शारीरध
र्मपदेन तेषां व्यावर्त्तनात्॥ प्रलयभावेतु चेष्टानिरोधो नतु गतिनिरोधः॥
॥अस्य विभावाः॥ हर्षरागभयदुःखविषादविस्मयक्रोधाः॥२॥ ॥

तद्योगात्स्तंभवंतीति
सात्विकाइत्यक्रमः॥ तथा सति कीदृशं लक्षणमित्यपेक्षयामाह॥ शारीरेति॥ यथेति॥ स्तंभमु
दाहरति॥२॥ ॥ ९

श्रोणीति॥ श्रोणी नितंबभागः॥ यद्यपि कटीनाश्रोणिफलकंकटिः श्रोणिः ककुद्मती त्यमरो
क्तेः श्रोणी शब्दः कटिवाचकस्तथापि लक्षणया नितंबो गृह्यते वीचिः पंक्तिर्मही केलिरित्या
द्या रुः स्वदीर्घयोरिति मेदिनी त्वत्रादिपदात् श्रोणी शब्दोपि तथैव॥ रुदिकारादित्यादिना वि

॥ यथा॥ श्रोणी पीनतरा तनुरुशातरा भूमीधरा त्वीवरा वक्षोजस्य तटी कुतो निजकुटी मातर्मया
गम्यताम्॥ कस्यास्तन्वीषु पीनतरा तनुः शरीरं रुशातरा। तनुधातोरौणादिक उप्रत्ययः वि
स्तरभियास्पत्रं न लिख्यते॥ वक्षोजस्य स्तनस्य तटी॥ भूमिधरा स्पर्वताद्दपि पीवरा स्थूला॥ त
टं त्रिषु त्यमरः॥ हेमातः मया निजकुटी स्वगृहं कुतः केपडाम्यतां प्राप्यतां। संभावनायां लो
लोट्॥ शालाविशेषवाचिना कुटीशब्देन गृहसामान्यं लक्षणा॥ ॥

इतिपूर्वोक्तप्रकारेणोज्ञायोक्ता॥ पक्ष्मलदृशा। कयाचिन्नायिकया॥ करंबकुंजनिकटे ॥निकुंजकुंजौवाक्रीबेलताभिः पिहितोदर इत्यमरः॥ निर्विरूपविरूप॥ तथामंदस्मितंगोविंदंसमुदीक्ष्यदृष्टास्तमनःगतिनिरोधःतिरोधीयतोहेत्वंतरप्रदर्शनेनगोप्यतइत्यर्थः॥अ

इत्युज्ञाव्यकरंबकुंजनिकटेनिर्विरूपमंदस्मितंगोविंदंसमुदीक्ष्यपक्ष्म
लेक्षणास्तनःस्तिरोधीयते॥३॥ वपुषिसलिलोद्गमःस्वेदः॥ तस्यविभा
वाः॥ मनस्तापहर्षलज्जाक्रोधभयश्रमपीडाघातमूर्छाः॥ ॥७॥॥

त्ररुक्षदर्शनजन्यौरागहर्षौगम्यमानौतेनतज्जन्यस्तंभोनायिकायाउत्पन्नइतिभावः॥
शार्दू०॥३॥ ॥स्वेदलक्षणमाह॥ वपुषीति॥ मनइति॥ यथेति॥ ॥स्वेदंदर्शयति॥ ॥

कांतइति॥॥हेकांते॥तवकुचप्रांते॥स्तनतटे॥स्वेदबिंदवः॥रूप्यताम्रसन्नेन॥मन्मथेन॥मनोमथ्ना
तीतिमन्मथइतिपृषोदरादित्वात्साधुः॥मननंमृत्तन्मथ्नातीतिमन्मथइतिवा॥कामेनकृताःकु
सुमवृष्टयइवराजतेशोभते॥अत्रोपमानोपमेयवाचकसाधारणधर्माणामुपादानात्पूर्णोप
मालंकारः॥अत्रनायिकायागम्यमानश्रमजन्यस्वेदरूपसात्विकभावाभिव्यक्तिः॥७॥रोमांच

यथा॥कांतेतवकुचप्रांतेराजंतिस्वेदबिंदवः॥रूप्यतांमदनेनेवकृताःकुसुमवृष्टयः॥७॥विका
रस्समुत्थरोमोल्लासोनरोमांचः॥अस्यविभावाः॥स्त्रीतालिंगनहर्षभयक्रोधाः॥यथा॥बकुलमुकु
लकोशारोपनिर्यन्मधुकरकूजितमाजिकुंजभूमौ॥ लक्षयति॥विकारेति॥यथेति॥रोमा
चंदर्शयति॥बकुलेति॥हेआलिसखिबकुलमुकुलानामशोककुसुमानांकोशोमध्ये
भ्योरोरेणनिर्यतांमधुकराणांयानिकूजितानितानिभजतीतितथोक्तायांकुंजभूमौ॥बकु
लोवञ्जुलोऽशोकेइत्यमरः॥॥

यद्यपि कुड्मलो मुकुलोऽस्त्रियामित्यमरोक्तेर्मुकुलशब्दः कुड्मलवाचकस्तथापि लक्षणया कुसुमपरः ॥ एवं कोशोऽस्त्री कुड्मले खड्गपिधाने ऽर्थौघदिव्ययोरित्यमरोक्तेः ॥ कोशशब्दस्य कुड्मलवाचकत्वे पुनरुक्तिसंभवेपि साहचर्यलक्षणया मन्मथशाणगोलस्यते ॥ स्मितरतिरोषः स्मितसुभगः ॥ नंदसूनुः अद्य कपोलपालिकपोलप्रांते ॥ कथं पुलकयति पुलकवन्तं करोति ॥ एणविष्टवश्रावान्मतपोलुक ॥ अत्र संकेतस्थले कुंजे स्थितस्य रुष्टस्य

पुलकयति कपोलपालिमालिस्मितसुभगः कथमद्य नंदसूनुः ॥ गरुडत्वप्रयोजकीभूतं स्वरभावमेवाजात्यस्वरभंगः ॥ अस्य विभावाः ॥ क्रोधहर्षभयमदाः ॥ ५ ॥ ॥

तीकरोति ॥ एणविष्टवश्रावान्मतपोलुक ॥ अत्र संकेतस्थले कुंजे स्थितस्य रुष्टस्य मदीर्घ्यानिजातहर्षजन्यो यं रोमांचस्तिस्सूचयितुं प्रेमगर्विताया गोपिकायाः स्वसखीप्रतीयमुक्तिः ॥ औपच्छंदसिकं वृत्तं ॥ प्रथमे तृतीये च पादे यत्र मात्राः षोडश भवति तथा द्वितीये चतुर्थे च पादे ऽष्टादश मात्रास्तत्रौपच्छंदसिकमिति सिद्धांतः ॥ लक्षणं वृत्तरत्नाकरे बोध्यम् ॥ ५ ॥

स्वरभंगोदाहरणं दर्शयति॥ व्यक्तिरिति॥ कोपात् कोपं कृत्वा॥ ल्यब्लोपे पंचमी॥ उक्तिर्भाषणं चे
द्यदि क्रियेत॥ तदा स्वरभेदस्य॥ स्वरवैजात्यस्य॥ व्यक्तिः॥ अभिव्यक्तिः स्यात्॥ इति चित्ते विचार्य॥

व्यक्तिः स्यात्स्वरभेदस्य कोपादुक्तिः क्रियेत चेत्॥ इति पत्युः पुरो रा
धा मौनमास्थाय तिष्ठति॥ ६॥ भावत्वे सति शारीरस्पंदो वेपथुः॥ भा
वत्वे सतीति सत्यंतविशेषणदानात् स्वच्छकस्पंदादौ नातिव्याप्तिः॥ शा
रीरपदं चेष्टाश्रयमात्रपरं तेन शारीरावयवकंपे नातिव्याप्तिः॥ ॥७॥

राधा पत्युः कृष्णस्य पुरोऽग्रे मौनं आधाय कृत्वा तिष्ठति॥ अत्र वाक्यार्थहेतुकं काव्यलिंगं॥ आत्मा
न्यासंगिनं स्वगृहमागतं कृष्णं दृष्ट्वा तन्नक्रोधायाराधिकायाः स्वरभंगोऽनुमीयते॥ ६॥ भावत्वे इ
ति॥ स्वाच्छकस्पंदादिबोधक चेष्टा॥ वेपथुमुदाहरति॥ ॥८

कथयेति॥ ॥हे प्रियसखि॥ एष यउ पतिः॥ रुक्मः॥ चंपकानि चंपककुसुमानि॥ उरोजदामहे
तोः स्तनहारहेतोः॥ कथं चिनोतु॥ कथग्रथयुतु॥ कथयद्रांस॥ अत्र संप्रश्ने लोट्॥ जिगर्थे
लोडित्यनुशासनात्॥ अस्य रुक्मस्य॥ करतले॥ हस्तमध्ये कंपो वेपथुर्भवतियत्॥ अत्रम
अस्य विभावाः॥ आलिंगनहर्षनीतयः॥ यथा॥ ॥कथयकथमुरोजदामहेतोर्यउ पतिरेष
चिनोति चंपकानि॥ भवति करतले यदस्य कंपः प्रियसखि मत्स्मृतिरेव मत्स पत्नी॥ ७॥ वि
कारप्रभव प्रकृतवर्णान्यथाभावो वैवर्ण्यं॥ अस्य विभावाः॥ मोहभयक्रोधशीततापश्रमाः॥
त्स्मृतिरेव मम स्मरणमेव॥ मत्स पत्नी सा हृत्सपत्नलक्षणया अप्रियकारिणी॥ जातेति शेषः॥ अ
त्र रुक्मस्य स्मृतिजा हर्षजन्यः कंपरूपः सात्विकभावः॥ औपछंदसिकं वृत्तम्॥ ७॥ वैवर्ण्यमु
दाहरति॥ ॥

कुक्कुट इति ॥ कुक्कुटे कृकवाकौ ॥ कृकवाकुस्ताम्रचूडः कुक्कुटश्चरणायुधः इत्यमरः ॥ कुवं कु
कु इति शब्दं कृत्वा कुटतीति कुक्कुट इति क्षीरस्वामी ॥ तौ हारिकस्य कुटकौटिल्ये इति ॥ धा
तोरिगुपधेत्यादिना कः ॥ क्वणं शब्दं कुर्वति सति ॥ श्लिष्टयोः परस्परालिंगितयोः ॥ तयोर्ना
यिकानायकयोः ॥ आननं मुखं ॥ दिवाकरकरैः सूर्यकिरणैराक्रांतः पराभूतो यः शशी तस्य

यथा ॥ ॥ कुक्कुटे कुर्वति क्वणमाननं श्लिष्टयोस्तयोः ॥ दिवाकरकराक्रांतशशिकांतिमिवा
दधौ ॥ ७ ॥ विसृजनितमश्रिजलमश्रु ॥ अस्य विभावाः ॥ हर्षामर्षजधूमनयनशोकजं नाशीतनि
क्रांतिं ॥ दिवा दिनेत्यादिना टप्रत्ययः दिवाराशस्य सन्नमप्यत्वेपिस्नू निर्निमेषप्रेक्षणानि ॥
त्रेग्रहणसामर्थ्यात्किमर्तिं ॥ तां कांतिं आदधौ बिभर्ति धारेव ॥ इव शब्दो भिन्नक्रमः ॥ अ
त्र क्रियास्वरूपोत्प्रेक्षा ॥ उपाहहाविति पावेतु निस्तनितिबोध्यम् ॥ ७ ॥ ॥ अक्रसंसत्तसात्वि
कभावं दर्शयति ॥ ॥

हे चित्र अयं मुरारिः रुस्नः उपकंठं समीपप्रदेशं ॥ उपागतः प्राप्तः ॥ अतः उरःखधारां खेदपरंपरां विसृज विसृज ॥ आभीक्ष्ण्ये द्विर्वचनं ॥ आभीक्ष्ण्यं तिङंतेष्वव्ययसंज्ञककृदंतेषु चेति नियमात् ॥ इति इत्थं कथयितुं ॥ इवेति गम्यते ॥ तेन गम्याफलोत्प्रेक्षा ॥ यत्र च तु र्थ्यंतिनं तु मते

॥ यथा ॥ ॥ विसृज विसृज चित्र उरःखधारामयं मुपकंठमुपागतो मुकुंदः ॥ इति कथयितुमस्रुबिंदुरक्ष्णो निपतति वक्षसि पक्ष्मलायाताम्याः ॥ शरीरत्वे सति चेष्टानिरोधः प्रलयः ॥ सत्त्वं तु विरोधणात् निशदोना तिव्याप्तिः ॥ १ ॥ ॥ १

ननु वाव्यंजकान्वयस्तत्र फलोत्प्रेक्षेति सिद्धांतात् ॥ पक्ष्मले गाढ पक्ष्मवती आपतेः अक्षिणी यस्यास्तस्यास्तथोक्तायाः ॥ पक्ष्मल इत्यत्र सिध्मादित्वाल्लच् ॥ कस्याश्चित् ॥ अस्रुबिंदुः अक्ष्णोः सकाशात् वक्षसि हृदये निपतति ॥ औपच्छंदसिकं वृत्तम् ॥ १ ॥ ॥ १

स्तंभेति ॥ सहचरितासहचरितयोः सहचरितस्यैव ग्रहणमितिन्यायात् स्तंभादयो यथा शरीरध
मस्तिथा तैः सह पठितस्य प्रलयस्यापि शारीरधर्मत्वमिति भावः ॥ शास्त्रीयं तर्कशास्त्रोक्तमित्य
र्थः ॥ प्रलयाख्यं सात्विकभावमुदाहरति ॥ नोवक्रमिति ॥ राधया ॥ वक्रमाननं नोनमितं ॥ च
परं शिरो न धुतं ॥ स्वाहो रूस्वष्वेति रूस्वत्वं ॥ न कंपितं ॥ किंच वपुः शारीरं नो व्यावर्त्तितं न चालि
स्तंभादयः शारीरधर्माः ॥ तेषां साहचर्यरूपनेन प्रलयोपि शारीरधर्म एव ॥ तेनात्र चेष्टाप
देन शारीरचेष्टाभिमता ॥ मनसस्तु कर्म्म न तु चेष्टा ॥ अत एव चेष्टाश्रयः शारीरमिति शास्त्र
लक्षणं ॥ यथा ॥ नोवक्रं नमितं धुतं न च शिरो व्यावर्त्तितं नो वपुर्वासो न स्रस्तमारुतं निग
हितं नो वनिषेधाक्षरं ॥ तं ॥ तयास्रस्तं शिथिलं वासो वस्त्रं नाकृतम् ॥ गृहीत्वा सम्यक् न नि
वेशितामित्यर्थः ॥ वाशब्दः समुच्चये ॥ वा स्याद्विकल्पोपमयोरेवार्थेपि समुच्चय इत्यमरः ॥ नि
षिद्धानि निष्ठुराण्यक्षराणि यस्यां क्रियायां यथा तथा ॥ न निगदितं नोक्तं ॥ मान दशायां निष्ठु

किंचविलोचनंनेत्रंशोणंरक्तंनविरचितंनकृतंअपिशब्दःसमुच्चये।तर्हिकिंतयाकृतमित्यपेक्षायामाह
।।मधुरिपोःकृष्णस्यआननेमुखविषये।क्रीडाकलायांकातरंदीनंचेतोऽन्तःकरणंकेवलंव्यापारितंप्रसा
रितं।।तथाचस्तुव्यावर्तनात्रहनुमानमितिभावः।।केवलःकृत्स्नएकश्चकेवलश्चावधारितइतिशा
श्वतः।।श्लो॰९०।।जृंभेति।।जृंभापिनवमःसात्त्विकभावःसंभवतिसर्वत्रतथानुभावादितिभावः।।न

शोणंनापिविधेर्लोचनंविरचितंक्रीडाकलाकातरंचेतःकेवलमाननेमधुरिपोर्व्यापारितंराध
या।।९०।।जृंभाचनवमःसात्त्विकोभावइतिप्रतिभाति।।उक्तंभानुमुद्रेणसत्कुचयुगंस्विद्यत्क
पोलस्थलमित्यादिशृंगारतिलकादौसात्त्विकभावसामानाधिकरण्यदर्शनात्।।नचस्वभावा
नुभावइतिविपरीतमेवकिंनस्यात्।।सत्यम्।।अनुभावत्वेभावत्वाविरोधात्।।पुलकादीनांतथादृ
ष्टत्वात्।।

चेति।।साजृंभाभावस्यसात्त्विकभावस्यानुभावःकार्यमितिविपरीतमेवकिमयंनस्यादितिनवात्वं
निषेधेहेतुमाह।।सत्येति।।जृंभायाअनुभावत्वेकार्यत्वेसत्यपिभावत्वाविरोधात्।।पुलकादीनांकार्यत्वेना
नुभावत्वेपियथासात्त्विकभावत्वंतथाजृंभायाअपिअनुभावत्वेसात्त्विकभावत्वंसमानागतमितिभावः।।

वान्नभावत्वापत्तिरितिभा २

नचांगेति॥ भावलक्षणे रसानुकूलोविकारोभावइत्युक्ते रंगारुष्ट्यादीनांतुपुरुषैः स्वेछया विधीयमानाविधीयमानत्वेन रसानुकूलविकारत्वाभाव॥ जृंभातुविकारादेवभवतिविकार

नचांगाकृष्टिनेत्रमर्द्दनादीनामपिभावत्वापत्तिः॥ तेषांभावलक्षणाभावात्॥
रसानुकूलोविकारइतितस्यलक्षणम्॥ अंगाकृष्ट्यादयोनविकाराःकिंतु
शारीरचेष्टाः॥ प्रत्यक्षसिधमेतत्॥ अंगाकृष्टिरक्षिमर्द्दनंवापुरुषैरिछया
विविधीयतेत्यज्यतेच॥ जृंभाचविकारादेवभवति॥ तन्निवृत्तौनिवर्त्ततेच॥

निवृत्तौचविरमतीतितस्याभावत्वमेवसिद्धमितिभावः॥ जृंभामुदाहरति॥ ॥छ॥ ॥९॥

आधायेति॥ ॥ महेशः शिवः॥ रहसि एकांते॥ मानमाधाय कृत्वा॥ स्थितायाः अचलात्मजा
याः पार्वत्याः जृंभा जृंभणं॥ संभाव्य विलोक्य॥ स्मेरमुखः॥ हास्यमुखः सन्॥ करांगुलीभिः॥ चा
टुः प्रियवाक्यं तद्युक्तो ध्वनिरिति मध्यमपदलोपी समासः॥ चटु चाटु प्रियवाक्यमिति त्रिकाण्ड

आधाय मानं रहसि स्थितायाः संभाव्य जृंभाम चलात्मजायाः॥ चाटुध्वनिं स्मेरमुखो महेशः
करांगुलीभिः कलयांचकार॥ ११॥ ॥इति श्रीभानुदत्तविरचितायां रसतरंगिण्यां सात्वि
कभावनिरूपणं नाम चतुर्थस्तरंगः॥ ४॥ ॥अथ व्यभिचारिभावा निरूप्यंते॥ ॥ ९

तः॥ तं कलयांचकार॥ संपादयामास॥ एते न जृंभापि नवमः सात्विकभाव॥ इति व्यवस्थापि
तं॥ इंद्रवज्रावृत्तं॥ ११॥ ॥इति श्रीमहोपाध्यायावटंकानंदरामभट्टात्मजभगवद्भट्टविरचि
तायां नूतनतरीसमाख्यायां सात्विकभावनिरूपणे चतुर्थस्तरंगः॥ ४॥ अथेति॥ क्रमप्रा
प्तं व्यभिचारिभावनिरूपणं क्रियत इत्यर्थः॥ ॥

निर्वेदेति॥ ॥निर्वेदादयस्त्रयस्त्रिंशद्व्यभिचारिभावाभरतोक्तकारिकायांमूलेएवस्पष्टाः॥ ॥

तत्रभरतः॥ ॥निर्वेदग्लानिशंकाख्यास्तथासूयामदश्रमाः॥आलस्यंचैवदैन्यंचचिंतामो
हःस्मृतिर्धृतिः॥व्रीडाचपलताहर्षआवेगोजडतातथा॥गर्वोविषादऔत्सुक्यंनिद्राऽपस्मा
रएवच॥सुप्तिर्विबोधोऽमर्षश्चाप्यवहित्थमथोग्रता॥मतिर्व्याधिस्तथोन्मादस्तथानिधन
मेवच॥त्रासश्चैववितर्कश्चविज्ञेयाव्यभिचारिणः इतस्ततोरसेषुसंचारित्वमनेकरस
निष्ठत्वमनेकरसव्याप्यत्वंवाव्यभिचारित्वम्॥नरोमांचादावतिव्याप्तिः॥ ॥ ७॥ ॥

इतस्ततइति॥ ॥स्पष्टम्॥ ॥नचेति॥ ॥रोमांचादावतिव्याप्तिर्नास्तीत्यर्थः॥ ॥७॥ ॥

तेषां शोभाचारीणां शारीरव्यभिचारित्वं निर्वेदादीनां चांतरव्यभिचारित्वमिति सिद्धांताद्दिति
भावः॥ नन्विति॥ ॥ निर्वेदादेः स्थायित्वं व्यभिचारित्वं चाग्रे स्फुटीभविष्यति॥ एषां रसाव

तेषामपि संग्राह्यत्वात्॥ ते भावाः शारीराव्यभिचारिणः॥८॥ एते चांतराव्यभिचारिणः
यांस्तु विशेषः॥ ननु निर्वेदादेः स्थायित्वं व्यभिचारित्वं कथमिति चेत्र न॥ रसपर्यंत
स्थायित्वमितरस्ततोगामित्वं चोपाधिभेदमादायोभयसंभवात्॥ स्वावमाननं नि
र्वेदः॥ संसारे हेयत्वबुधिर्वा॥ तत्र विभावास्तत्त्वज्ञानापजिहीर्षादयोऽनुभावाः॥
खेदप्रकाशचिंताश्रुपातादयः॥
मानपर्यंतस्थायित्वात् स्थायित्वरूपभेदकधर्ममा
श्रित्य स्थायित्वं॥ इतरस्ततोगामित्वरूपं चाश्रित्य व्यभिचारित्वं चेति व्यवस्था बोध्या॥ ॥

निर्वेदमुदाहरति॥ ॥क्षोणीति॥ ॥क्षोणी पर्यटनं पृथिव्यामितस्ततो भ्रमणरूपं यत्कृतं॥ धना
र्जनार्थमिति शेषः॥ तत्त्वमायैव॥ जातमिति शेषः॥ अत्रद्वयोरपि यत्तच्छब्दयोरध्याहारः
क्वचित्तद्वयोर पीति काव्यप्रकाशकरोक्तेः॥ द्रव्यप्राप्त्यर्थं कृतं पृथ्वी पर्यटनं व्यर्थं जातं न तु किं
चित्फलमिति भावः॥ तादर्थ्ये चतुर्थी॥ विद्या॥ विदुषां॥ वादाय॥ अर्जिता॥ अभ्यस्ता॥ तैः सह वादं

॥यथा॥ क्षोणी पर्यटनं श्रमाय विदुषां वादाय विद्यार्जिता मानध्वंसनहेतवे परिचिता स्तेऽध
राधीश्वराः॥
कर्तुं नित्यात्मबोधार्थं इति फलितोऽर्थः॥ सहार्थं॥ स्यच्छेषत्वविवक्षायां षष्ठी॥ तुम
र्थाच्च भाववचनादिति चतुर्थी॥ तथा एते धराधीश्वराः राजानः परिचिताः सेविता अपि॥ मा
नध्वंसनहेतवे जाताः॥ न तु तेभ्यः किंचिदपि फलमिति भावः॥ अत्रापि तादर्थ्ये चतुर्थी॥ तथा स
रोजसुंदरदृशां स्त्रीणां आस्ये मुखे रुताः व्यापारिताः दृष्टयः विश्लेषाय वियोगाय जाताः॥ न तु ता

सांसमागमरूपं फलं जातमिति भावः॥ मुखमिति जातित्वादेकवचनम्॥ इति हेतोः कुत्ताने
नाल्प। बुद्धिना मया प्रयागनगरे विषये नारायणो विष्णुर्नाराधि॥ कर्मणि चिण्॥ अत्र श्लोके आ
त्राध रत्न द्गुरु युजरामम द्रोक्रोहोघोषोद्धारप्रकारः प्रदर्श्यते॥ तथाहि॥ श्रमायेति तादर्थ्ये च
तुर्थ्यंतस्यौ इन्द्रपकोटावन्वयेऽ विमृष्टविधेयांशाहोषापत्तिः॥ न हि कश्चिन्महोपि प्रयोजनमनु

विश्लेषाय सरोजसुंदरदृशामास्ये कृतादृष्टयः कुत्तानेन मया प्रयागनगरे नाराधि नाराय
णः॥१

इत्रपभूमिभ्रमणादौ प्रवर्त्तते॥ न च श्रम एव प्रयोजनमिति वाच्यं लोके तथात्वाप्रसिद्धेः॥
न व्यायामे प्रसिद्धिरस्तीति वाच्यम्॥ तत्र मल्लादीनां बलवर्द्धनस्यैव प्रयोजनत्वात्॥ तस्मा श्र
मायेत्यस्य जातमित्यध्याहृत्य विधेने सदान्वये दूषणं नास्तीति। धनार्जनार्थं कृतस्य तस्य तद
लाभे भागवते श्रमस्तस्य श्रमफलं इतीत्यादिषु विलक्षणया व्यर्थत्वस्यैव प्रतिपादनात्॥

विदुषांवाशयेत्यस्यतूर्ईश्वरपत्वेबाधोनास्ति॥मानधंसनहेतवइत्यत्रजाताइत्यध्याहारेणपूर्ववद्दोषो
द्धारः॥विदुषांमानधंसनहेतवइतिवायोजना॥ परकीयमानधंसनार्थराजसेवाप्रवृत्तिर्दर्शनात्
॥विश्लेषायेत्यत्रापिपूर्ववत्समाधानम्॥कुज्ञानेनेति॥नारायणाराधनलक्षणसुज्ञानरहितेन
तद्भिन्नधनलाभादिफलककुत्सितज्ञानेनवतेत्यर्थः॥एवंचपूर्वोक्तचतुर्थ्यंतानांवैयर्थ्याभावेपिध
नादिलाभस्यतुच्छफलत्वेनतद्विरक्तस्येयमुक्तिः॥तेनशांतस्थायिनोनिर्वेदस्यापीदमुदाहर
णमितियदुरामचरोषैरेवसमर्थितं॥स्यांस्तुविशेषः तन्मतेश्रमायेत्यत्रधनायेतिविश्लेषा
येत्यत्राश्लेषायेतिपाठांतरंकल्पनीयं॥पूर्वव्याख्यानेतुधनालाभेनापञ्चमोनिर्वेदोव्यभि
चारिभावः॥सर्वदापर्जन्यज्ञानस्यस्थिरत्वासंभवात्॥इतिव्याख्यानद्वयेननिर्वेदस्यस्थायि
त्वंव्यभिचारित्वंचेत्युभयमपिसिद्धमितिभावः॥ पूर्वव्याख्यानेद्रव्यालाभजन्यापद्रूपोविभावः
खेदप्रकाशनमनुभावोनिर्वेदस्य॥द्वितीयेतुतत्त्वज्ञानंविभावः पश्चात्तापोऽनुभावस्तास्येत्यव

धेयमिति दिक् रागाद्द्वं ॥१॥ ॥ग्लानिं दर्शयति ॥ ॥व्याहर्तुमिति ॥ ॥ हरौ कृष्णे ॥ प्रातः ॥ तल्पं श
य्यां ॥ तल्पं शय्या दृढारे षित्यमरः ॥ अपास्य त्यक्त्वा गच्छति सति ॥ तस्या राधिकायाः गिरो वाचः
॥ पुनरीक्षणाय व्याहर्तुं ॥ पुनर्दर्शनं कदा भविष्यतीति वक्तुं ॥ कं वा तद्बहिः न निःसृताः न निर्ग

ग्लानिर्निर्बलता निःसहता वा ॥ ॥ तत्र विभावा रत्यायासतृट्क्षुधादयः ॥ अनुभावा मुख
म्लान्यादयः ॥ यथाः ॥ ॥ व्याहर्तुं पुनरीक्षणाय न गिरः कं वा बहिर्निःसृताः शेषाश्लेषवि
धिं विधातुमपि वा नैवोन्नता दोर्लता ॥ प्रातस्तल्पमपास्य गच्छति हरौ चंडांशुचंडातपक्लि
ष्टक्लिष्टकुरंगभंगुररुचस्तस्याः स्थिता दृष्टयः ॥२॥ ताः ॥ तथा शेषाश्लेषविधिं ॥ अवशिष्टा
विधिं ॥ अवशिष्टालिंगनविधिं विधातुं कर्तुं ॥ दोर्लता पीनोन्नता ॥ जाता इति शेषः ॥ चंडांशोः
सूर्यस्य चंडोऽत्यसह्यो य आतपस्तेन क्लिष्टः खिन्नः क्लिष्टः संकुचितो यः कुरंगो मृगस्तस्येव भंगु
रा शिथिला रुक् यस्ते स्यो स्तस्या राधिकाया दृष्टयः स्थिताः ॥ रागाद्द्वं ॥२॥ ॥

शंकालक्षणमाह ॥ ॥उत्कटेति॥ उत्कटकोटिकं प्रकटोत्कर्षं॥ अनुभावाभिव्यक्तमित्यर्थः॥
कोद्युत्कटकोटिनी संख्यास्ति यस्मिन्नेकार्थेहि मः॥ तादृशं यदनिष्टप्रतिसंधानं अप्रियाप्तिसंभा
वनं । शंका॥ इष्टहानिविषयो वा शंकेति लक्षणांतरम्॥ यथेति॥ शंकामुदाहरति॥ एत
इति॥ एते गुरुजनाः श्वशुरादयः चित्रमेव विलोचनं नेत्रं येषां ते तथोक्ताः॥ स्वबुध्या परदृष्ट्या
यथा॥ ॥उत्कटकोटिकानिष्टप्रतिसंधाने इष्टहानिर्विचारो वा॥ शंका॥ तत्र ऊर्नयपरक्रूरता
दयो विभावाः॥ अनुभावाः कंपक्रियाप्रस्थानादयः॥ यथा॥ एते चित्रविलोचना गुरुजनाजि
ह्माग्रदोषाः खलाः पौराः क्रूरवचःप्रपंचवचनागात्वश्वश्रूश्च चक्षुःश्रवाः॥ ॥ तत्तादृत्यर्थः॥ खल
त्वाद्गुर्जनाः जिह्माग्रदोषाः॥ दोषमात्रवादिन इत्यर्थः॥ पौरा नगरवर्तिनो जनाः॥ क्रूराणां वच
सां प्रपंचेन विस्तरेण यशो येषां ते तथोक्ताः॥ परममर्मोद्घाटनेन प्रसिद्धा इत्यर्थः॥ तथा श्व
श्रूः श्वशुरस्य पत्नी। श्वशुरस्योकाराकारलोपश्चेति पुंयोगलक्षणङीषं बाधित्वा ऊङ् प्रत्ययः॥

चक्षुःश्रवाः फणिरूपा वर्त्तते ॥ कुण्डली गूढपाच्चक्षुःश्रवाः ॥ काकोदरो फणीत्यमरः ॥ इत्यमने
न प्रकारेण सर्वमनर्थबीजं ॥ अनर्थहेतुरस्ति ॥ हेतुर्नाकारणं बीजमित्यमरः ॥ ममेति शेषः
किस्यात्किं भविष्यतीति असकृत्वारंवारं संचिंत्य विचार्य ॥ वामनयना नायिका ॥ वक्षोरुहि
हृदये ॥ स्फूर्जंतियानि किंशुकानि पलाशकुसुमानि ॥ पुष्पमूलेषु बहुलमिति सूत्रेण कुसु

॥ किंस्यादित्यमनर्थबीजममसकृत्संचिंत्य वक्षोरुहे स्फूर्जत्किंशुकदामवामनय
ना निःश्वस्य विन्यस्यति ॥ ३ ॥ परोत्कर्षासहिष्णुता परानिष्टचिकीर्षा वाऽसूया ॥ तत्र
विभावा मन्युदौर्जन्यादयः ॥ अनुभावाः कोपचेष्टा दोषोद्भावनादयः ॥ ॥ मार्यस्याणोलुकू ॥
पलाशे किंशुकः पर्णइत्यमरः ॥ किंचित्शुक इवेति किंशुक इति क्षीरस्वामी ॥ वस्तुतस्तु ॥ किंशु
क इति संशयः किंशुकः सुसुपेति समासः ॥ सोस्मिन्नस्तीति मत्वर्थीयोऽच् ॥ तेषां दाम स्रजं ॥ नि
श्वस्य विन्यस्य नि । आरोपयति ॥ अत्र उर्जनपरकीयादयो विभावाः । किंशुकदामधारणे ननख

हस्तप्रच्छादनमनुभावः॥ त्रासेर्ष्ये॥ असूयां दर्शयति॥ ॥हरशिरसीति॥ भवानी पार्वती॥ मयापि
प्रेमणा त्रासेर्ष्याहरयापि॥ अलब्धवासे अप्राप्तनिवासे हरशिरसि॥ शिवमस्तके॥ तुषारभानो
श्चंद्रस्य काप्येका कला॥ कलास्यान्मूलरैवृद्धौ शिल्पादावंशमात्रके॥ षोडशांशेपि चंद्रस्येति वि
श्वः॥ निवसतीति दृष्टी ति विचिंत्य॥ प्रतिभवनं गृहं गृहं प्रति॥ तथा प्रति भूधरं॥ भूधरं भूधरं प्र
ति॥ निवसतीति इति विविच्य॥

हरशिरसि मयाप्यलब्धवासे निवसति कापि कुडाला तुषारभानोः॥
इति लिखति विधुंतुदस्य मूर्तिं प्रतिभवनं प्रति भूधरं भवानी॥ ५॥

ति॥ उभयत्रापि वीप्सायामव्ययीभावः॥ विधुंतुदस्य राहोः॥ तमस्तु राहुः स्वर्भानुः सैंहिकेयो
विधुंतुद इत्यमरः॥ मूर्तिं आकृतिं लिखति॥ अत्र भवानी निष्ठाया असूयाख्यं शोत्कर्षे दर्शनिजन्यो
मन्युर्विभावः॥ कोपेन राहुलेखनचेष्टानुभावः॥ औपछंदसिकं वृत्तम्॥ ५॥ ॥ ॥ ब॥ १

मदलक्षणमाह॥ हर्षोत्कर्ष इति॥ क्वचन स्खलनादिपर्यन्तमूले स्पष्टं॥ यथेति॥ मुदोद्गाहरणं॥ रसनेति॥ समस्तं इतीन्द्रियं॥ तत्र हीन्द्रियाधिष्ठितं चक्षुर्गोलकादिकमित्यर्थः॥ इन्द्रस्यात्मनो हर्षोत्कर्षो मदः॥ दुःखासंभिन्नसुखानुभवउत्कर्षः॥ तत्र विभावाः पानं॥ अनुभावा उत्तमानां निद्रा॥ मध्यमानां हसितम्॥ अधमानां रोदनम्॥ इन्द्रियसंमोहो निद्रा। तस्मादिन्द्रियसंमोहनयनघूर्णनसाम्येन निद्रैव निद्रा॥ न च हर्षव्यभिचारिणा केतिव्याप्तिः॥ तत्र हर्षमात्रस्य सत्वात्॥ न तु तत्रोत्कर्षनिष्ठा जातिविशेषः॥ किंच तत्र मनोमोहः॥ अत्र च मनःप्रसाद इति स्वरूपभेदात्॥ तत्र निद्रारोदनादयोत्र पुलकादयो ऽनुभावा इत्यनुभावभेदाच्चानुत्तिष्ठति इष्टसणामूढमधु यावत् पिबाम्यहमित्यादौ मदेवीरर सेपि दृष्टोस्ति तत्र निद्रारोदनं वा कथमनुभावो न हि निद्रा तिरोहितिवा संयति योध इति चेत् सत्यं॥ ॥ ७॥ ॥

लिंगंत्तापकमिन्द्रियं॥ इन्द्रलिंगे सादि सूत्रेण साधुः। कर्त्री तथा असौ रसना जिह्वा स्वयं। मधु॥

रमयति॥ स्वयं मद्यमास्वादयतीत्यर्थः किं चास्माकं त्वनु जन्मि॥ अनर्थकं व्यर्थं॥ मधुरवादानु
पलब्धेरिति भावः॥ इति विभाव्य॥ तत्र मधुनि विषये॥ प्रतिबिंबस्य मिषेण व्याजात्। मज्ज
ति। किमिति गम्यते तेन गम्योत्प्रेक्षा॥ अन्यथा कथं तथा सति तद्व्यापाराभावः स्यादिति भावः

रसभेदेनानुभावभेदः॥ शृंगारे तेऽनुभावाः॥ वीरे च नयनारुण्यचमत्कारादयः सा
मान्ये च मदे नयनघूर्णनवचनस्खलनादयश्चेति॥ ॥यथा॥ ॥ रसनारसः स
सो मधु स्वयमस्माकमनर्थकं जनुः॥ इति तत्र समस्तमिद्रियं॥ प्रतिबिंबस्य मि
षेण मज्जति॥ ५॥ आयासश्रमवः पराभावः श्रमः॥ ॥ ८॥

स्यादिति भावः॥ अत्र मधुपानं विभावः॥ समस्तेंद्रियव्यापाराभावोऽनुभावः॥ आसां मदोऽ
वगम्यते॥ वैतालीयं छंदः॥ ५॥ श्रममुदाहरति॥ ॥ ॥८॥ ॥

सरामेति॥ सरामचंद्रः॥ सह निर्गताया अयत्त्विनसहेत्यर्थः॥ स्वेदांबुभिः प्रस्वेदजलैः संसक्तौ पयोधरौ यस्यास्तस्याः॥ मिथिलात्मजायाः जनकात्मजायाः सुखादयः दर्शः राष्ट्रजनपदवचनात् क्षत्रियमाचक्षत इतिभाष्यान्मिथिलोपलक्षितजनपदस्वामी जनकक्षत्रियो बोध्यः॥ मिथिलाराष्ट्रस्य जनपदवाचकत्वं तु येन लिंगेन योदेशो युक्तः स मम निजस्यते। तेनैव नाम्नातं देशं वाच्यमा

॥ तत्र विभावा रत्यध्वगत्यादयः॥ अनुभावाः स्वेदादयो॥ यथा॥ ॥ सरामचंद्रः सह निर्गतायाः स्वेदांबुसंसिक्तपयोधरायाः॥ अपांगभंगैर्मिथिलात्मजायाः श्रमानशेषान्शिथिलीचकार॥ ६

ऊर्मनीषिणः इति महाभारतवचनादवगंतव्यम्॥ यद्वा जनकात्मजायाः इति पाठांतरं॥ तस्या जशेषान्श्रमान्॥ अपांगपातैः सादरावलोकनैः॥ शिथिलीचकार अपनुनोद॥ अत्र सीताश्रयस्याश्रमस्य अध्वगतिर्विभावः स्वेदांबुप्रादुर्भावो अनुभावः॥ उपेंद्रवज्रा वृत्तम्॥ ६

आलस्यमुदाहरति॥ हरमिति॥ गर्भवती गिरेः॥ सुता पार्वती॥ स्तनयोर्विषये हारयष्टिं हारावलीं॥ हरं तं गच्छन्तं हरं शिवं॥ करेण रोधनं कर्त्तुं॥ तावन्न शशाक॥ समर्थानाभूदित्यर्थः॥ किं तु दृगंचलं॥ नेत्रप्रांतान्॥ कातरयांचकार॥ अत्र गर्भधारणं विभावः॥ अवलोकनक्रियाकातरीकरणे अनुभावौ॥

उत्थानाद्यक्षमत्वमालस्यम्॥ विभावा गर्भादयो ऽनुभावाः क्रियाकातर्यादयो यथा॥ हरं हरं तं स्तनहारयष्टिं करेण रोद्धुं न शशाक तावत्॥ गिरेः सुता गर्भवती विडस्य दृगंचलं कातरयांचकार॥७॥ दुःखस्याऽऽतिरेको वा दैन्यम्॥ अनौज्वल्यमिति केचित्॥ तस्य बहिर्मुखत्वेन तदनुमापकत्वात्॥ विभावा विरहदारिद्र्यादयः॥ अनुभावाः कार्श्यस्तुत्यादयो यथा॥ तस्यमनुभावः॥ तेन पार्वती निष्टमालस्यमुपगम्यते॥ कस्मिंश्चित्कल्पे गणपतिर्देवीगर्भादुत्पन्न इति गणपतिपुराणे उत्तरखंडे वर्णनमवगंतव्यं॥ उपेंद्रवज्रावृत्तम्॥७॥ दैन्यमाह॥ ॥

रसः रंगरी·
५२

तरंग·
५

अंसरति॥सुतनोः कस्याश्चिन्नायिकायाः॥अंसेस्कंधे॥स्कंधोभुजशिरोंसोऽस्त्रीत्यमरः॥अस्य
तेभरेणेतिअंसइतिक्षीरस्वामी।कुंतजालानांचिकुराणांचिकुरःकुंतलोवालइत्यमरः॥कुंतांका
रंलातीतिकुंतलइतिस्वामी।तेषांमालिकापरंपरा॥विभक्तिविपरिणामेनलग्नेतियोज्यं॥त
थास्तनतटे॥नेत्रांमनसांनिस्त्रगानहीलग्नास्ति॥मनश्चेतः॥माद्यन्मत्तीभूतोयोमन्मथःका

तानचरणानाम्॥अंसेकुंतलमालिकास्तनतटोत्संगेलवंगंस्रजोमाद्यन्मन्मथकुंजरेंद्रदशा
नप्रांतेविलग्नंमनः॥किंचान्यद्विरहानलेनसरसंसंदह्यमानंवपुर्गंडेपांडिमकेतवेनसु
तनोःफेनोच्चयंमुंचति॥८॥ मःसएवकुंजरेंद्रःकरीन्द्रस्तद्दशानप्रांतेदंतप्रदेशेलग्नं।किंचान्य
दपि।तस्याःसरसंकोमलंवपुः॥विरहानलेनवियोगाग्निना।दह्यमानंसत्।गंडेकपोलेजाति
त्वादेकवचनं॥गंडौकपोलावित्यमरः॥गंडतिसंहन्यतेइतिगंडइतिस्वामी॥पांडिमकेतवेनपांडुत्व
व्याजेन॥फेनोच्चयंफेनसमूहंमुंचति।अत्रनायिकानिष्टदैन्यस्मस्वामीविरहोविभावः॥

५२

105

पंडिमारयोः नुनावकैतवापह्नुतिरलंकारः ॥ श्लो ११ ॥ ॥ चिंतामुदाहरति॥ शंभुमिति॥ हे शैल
राजतनये त्वं किं नाम ध्यायसि॥ चिंतयसि॥ वयं तु शंभुं ध्यायसीति जानीमहे॥ कुतः त्वं पेक्षा
यामाह॥ तव तनौ शरीरे तस्य शिवस्य॥ अस्ति तनूनपाद्दवनेऽग्निरिव॥ तापः ज्वर इव समु
न्मीलति प्रतिभाति॥ अत्रैवकार इवशब्दार्थे भिन्नक्रमः॥ किंच अश्लोः चक्षुर्भ्यामित्यर्थः॥ अ
स्मृतिभावस्य प्रेष्ठस्य
चिंताध्यानं॥ ध्यै चिंतायामित्यनुशासनात्॥ ध्यानं च तत्स्मरणात्मकं॥ अनुभावास्तु पवैवर्ण्य
केन निरूपणात्॥ किंतु॥ चित्तैकाग्रता॥ इष्टानाप्तिप्रभृतयो विभावाः॥ अनुभावास्तु पवैवर्ण्य
बाष्पश्वासादयः॥ यथा॥ शंभुं ध्यायसि शैलराजतनये किं नाम जानीमहे॥ तस्यैवास्ति
तनूनपादिव तनौ तापः समुन्मीलति॥ पाठान्तस्यापि श्रोषत्वविवक्षायां षष्ठी॥ गंगातरंगा
वलिः॥ अश्रुमिषेण॥ अश्रुव्याजेन॥ बहिर्गच्छति॥ किंच चंद्रस्य कलेव कलिकाकलेत्यर्थः
स्वार्थे कन्॥ तस्याः कांतिज्योत्स्ना॥ पांडिम्नः कपटेन॥ पांडुत्वव्याजेन॥ समुन्मीलति॥ ॥

106

प्रसरति॥ समुज्जृंभते इति पाठः साधीयान्॥ पुनरुक्तिदोषापत्तेः॥ नैकं पदं द्विः प्रयोज्य
मिति वामनवचनात्॥ काव्यप्रकाशोक्तकथितपदत्वदोषापत्तिरपि॥ अत्र कामुद्दहना
नंतरं पार्वत्यास्थितो त्यक्तो शिवपरिणयनरूपेष्टानवाप्तिर्विभावः तापाश्रुपातादयोऽनुभा
वाः॥ अत्रासाधारणशिवज्ञापकप्रदर्शनेन ततः प्रवेशः सखीभिरनुमितः इत्यनुमानं का
अक्ष्णोः रक्तमिषेण गच्छति बहिर्गगनात रंगावलिः पांडिम्नः कपटेन चंद्रकलिकाकांतिः समु
ज्जृंभते॥ ए॥ मोहो वैचित्यम्॥ मुह वैचित्ये इति धातोर्मोहनं मोह इति भावव्युत्पत्त्या मोहशब्दा
र्थः॥ वैचित्यं कार्याकार्यापरिच्छेदः॥ रं॥ तस्यापि केतवापकृतिरंगामित्यंगांगीभावेन सं
करः॥ यद्वा हे शैलराजतनये त्वं ध्यायसि किं नामेति प्रश्नः॥ अत्रोत्प्रेक्ष्यते॥ तस्येव शि
वस्येव अस्ति तनुनपात् इव तेत्राग्निः किं तनोति तापः समुज्जृंभते॥ अत्र विरहजन्यतापे नेत्रा
ग्निजन्यतापोत्प्रेक्षणात् उत्प्रेक्षालंकारः॥ उदाहरणम्॥ ए॥ वैचित्यमिति॥ अपरिच्छेदोऽनियमः

मोहमाह॥ ॥अंतरति॥ ॥शंभुःशिवः अंतःस्मेरं विकसितं यत्सुवर्णकेतकं॥सुवर्ण
केतककुसुमं तस्येदलश्रेणिः शुभ्रनौकासदृशं दलमित्यर्थः॥ तस्याद्युतिः कांति
स्तस्याद्रोहिणीतस्प्रतिपक्षभूता॥तत्सदृशीमित्यर्थः॥यस्यमित्रत्वेनशत्रुत्वेनवा

तस्यविभावानीत्यावेगानुचिंतनादयः॥अनुभावास्तंनपातघूर्णनादर्शनिवि
स्मरणादयोयथा॥ ॥अंतस्मेरसुवर्णकेतकदलश्रेणीद्युतिद्रोहिणींलक्ष्मी
वीक्ष्यसमुद्यहिंडवदनांक्षीराबुधेरुत्थिताम्॥ ॥ वर्णनंतंस्मादृश्येपर्यविस्य
तीतिकविसंप्रदायः॥समुद्यडयनयइं उक्तवदनंयस्पास्ता॥तथाक्षीराबुधेः सी
रसमुद्रात्॥उत्थितांलक्ष्मींवीक्ष्यदृष्ट्वा॥स्तंभश्चातेन॥स्तंभारख्यसात्विकभावेवाऽत्य
नाकुलोव्याकुलः॥ ॥

शातं सहस्रं क्रतु विदिति बह्वोः संज्ञेति निघंटौ॥ निघंटुनमिसंग्रह इति हैमः॥ तया शात
मखः इंद्रः कर्तव्यमूढेंद्रियः॥ कार्यप्रतिभाशून्येंद्रियो जात इत्यर्थः॥ किंच सोपि भसि
तोपि॥ त्रिलोकीपतिः विष्णुः अत्र त्रिलोकीति लोक इति वत्समाहार द्विगु गर्भस्तत्पुरु

शंभुस्तं भशाताकुलः शातमखः कर्तव्यमूढेंद्रियः सोप्यशा
न भुजंगपाशपतनोजातस्त्रिलोकीपतिः॥१०॥ ॥

षः॥ अज्ञातमविदितं भुजंगरूपपाशस्य पतनं मंथनकारिणां देवानां हस्तेभ्यः पातो
येन स तथोक्तः एतादृशो जातः॥ अत्र लक्ष्मीदर्शनजन्य आवेगो विभावः॥ महेश्वरादी
नां स्तंभादयोऽनुभावाः॥ शार्दूः॥१०॥ ॥

संस्कारेति॥ उद्बोधकमात्रापेक्षा स्मृतिः प्रत्यभिज्ञा॥ संस्कारोद्बोधकनिरपेक्षं स्मरणमिति भेदः॥
तयोः स्पष्टम्॥ प्रत्यभिज्ञारूपां स्मृतिं दर्शयति॥ कालिंदीति॥ इदं चक्रद्वंद्वं चक्रवाकयुगलं॥
कालिंदीसरसः यमुनाहृदात्॥ समेत्य समागत्य॥ तथापि स्फूर्जितां दीप्यमानां सुधाक

संस्कारजन्यं ज्ञानं स्मृतिः॥ तत्र प्रत्यभिज्ञानरूपं स्मरणरूपं च संस्कारजन्यत्वेनोभयोः
संग्रहः॥ अन्यथा प्रत्यभिज्ञायाः प्रत्यक्षत्वापत्तिः॥ संस्कारोद्बोधकः॥ सदृशादृष्टचिंता
द्यो विभावाः॥ अनुभावाः भ्रूसमुन्नयनादयः॥ प्रत्यभिज्ञा यथा॥ ॥ कालिंदीसरसः समे
त्य नभःसंक्रोडे परिक्रीडते चक्रद्वंद्वमिदं सुधाकरकलामाक्रम्य विस्फूर्जति॥ ॥

रकलां॥ चंद्रकलामाक्रम्य लक्षीकृत्य॥ नभःसंक्रोडे अंतराले॥ यद्यपि क्रोडशब्दो भुजांतरा
लवाचकस्तथापि लक्षणयांतरालमात्रवाचकः परिक्रीडते विहरति॥ क्रीडोऽनुसंपरिभ्य
श्चेत्यात्मनेपदं।

किंचवंशेपियुतः स्मरचापस्यकामकार्मुकस्ययच्चापलंचांचल्यंतस्ययश्चमत्कारस्तमालं
बतेआश्रयते॥ तस्माद्धेतोः साराधैव॥ कदंबकुंजानां॥ नीपजतापिहितप्रदेशानां॥
नीपप्रियककदंबास्तुहलिप्रियेस्यमरः॥ तेषांकुहरेगह्वरे॥ परिभ्राम्यति॥ अत्रकुंज
स्थितांराधिकांविलोक्यगाम्बारयतःकृष्णस्यतत्सौंदर्यप्रशंसनिश्चोत्पत्त्यैववर्णनमिदं॥ त

वंशेपिस्मरचापचापलचमत्कारंसमालंबतेतस्मा
त्सैवकदंबकुंजकुहरेराधापरिभ्राम्यति॥ ११॥॥

त्वरोमावल्यांकालिंदी॥ नाभौसरः॥ हृदयेनभोंतरालं॥ स्तनयोश्चक्रवाकौ॥ मुखेसुधा
करः॥ भ्रुवोःस्मरचापं॥ चाध्यवसितमितिरूपकातिशयोक्तिः॥ अत्रराधिकास्तनमु
खादिसदृशानांचक्रवाकचंद्रादीनांस्मरणंविभावः॥ आलिंगनचालनादिकमनुभावः
॥रणं॥

स्मृतिर्मुरारेरिति॥ वदनांबुजमिति॥ वदनांबुजे राधिकाया मुखकमले लग्नः दृक्निपातो यस्य
तस्मिन्मयि॥ अंसमूले जत्रुणि॥ स्कंधो भुजशिरोंसोऽस्त्री संधी तस्यैव जत्रुणी इत्यमरः॥ अं
समूलं कक्ष्येति तु नव्याः कंधेनोचितमात्॥ बाहूमूले उभे कक्षावितिकोशः कक्षस्य बाहूमूलत्वा
भिधानाद्व॥ अवतंसकर्णपूर॥ पुंस्युत्तंसावतंसौ द्वौ कर्णपूरेपि शेखर इत्यमरः॥ तस्मिं सो
त्तोधातुर्भूषणार्थस्तेन वसतसोपीति क्षीरस्वामी॥ बध्नाति निवेष्टयति सति॥ राधिकायाः
स्मृतिर्यथा॥ ॥ वदनांबुजलग्नदृग्निपाते मयि बध्नत्यवतंसमंसमूले॥ दरकुंचितदृष्टि
राधिकायाः स्मितकिर्मीरितमाननं स्मरामि॥१२॥ दरमीषत्कुंचिता दृष्टिर्यस्मिन्॥ दरोऽ
स्त्रियां भयेश्वभ्र इत्यमरः दरस्त्वीषदर्थेऽव्ययम्॥ दे त्वंपपदं वेति क्षीरस्वामी॥ तथा स्मितेन
किर्मीरितं चित्रितं॥ चित्रं किर्मीरकल्माषशबलैताश्च कर्बुरे इत्यमरः॥ कीर्यत इति किर्मी
र इति क्षीरस्वामी॥ निपातनात्साधुः॥ आननं स्मरामि॥ अत्र संस्कारजज्ञानरूपायाः स्मृतेरु
द्बोधकनिरपेक्षं स्मरणं विभावः तद्वर्णनमनुभावः॥ रसविलासे तु प्रत्यभिज्ञास्मरणयोरवे

लक्षण्यात्स्मृतेरेकमेवोदाहरणमितिदिक्। औपच्छंदसिकं वृत्तम्॥१२॥ धृतिं दर्शयति
॥ नृपेति॥ न स्मरजांसि नृपा अस्ति॥ तथा विपिनं वनं वेश्म गृहं अस्ति॥ तथा वृद्धो वृ
षो वाहनं॥ तथा च मर्गजाजिनं चैलं परिधानवस्त्रं॥ तथापि॥ एवं सत्यपि॥ मन्मथारि
पोः शिवस्य। भोगः सुखं न त्रपति॥ किमु॥ भोगःसुखे स्त्रा रिभृता वद्धैष फणिका यया
धृतिः संतोषो दुःखेप्यदुःखबुद्धिर्वा॥ विभावास्तान्ज्ञानसाराद्यः॥ अनुभावा अव्यग्रभावादयो
॥यथा॥ नृपा न स्मरजांसि वेश्म विपिनं वृद्धो वृषो वाहनं चैलं चर्म तथापि मन्मथरिपो
र्भोगः किमु न त्रपति॥ इत्यात्वं किमु डीयते किमु महादेवेति नो गीयते किं वा तस्य च
देवदेव इति वा संज्ञाजनैस्त्यज्यते॥१३ रितिविश्लेषः॥ किंच॥ तस्मादित्वात्वं प्रभुत्वं॥ डी
यते किमु। तथा महादेवेति नो गीयते किमु। अथवा देवदेव इति संज्ञा जनैर्लोकैस्त्य
ज्यते किमु। अपितु नेत्यर्थः अत्र वर्णिलिंगिनं शिवं प्रति पार्वत्योक्तौ तदीयतत्वज्ञानं
विभावः वर्णिना निंदायारुतायामप्यव्यग्रत्वमनुभावः॥ शार्दू॥१३

५६

व्रीडामुराहरिति॥ ॥भिन्नाविति॥ ॥यत्रायोध्यायांकांतेनायके॥हरितंचेलंनीलंवस्त्रंहर
तिसति॥कमलनयनाकाचिल्लायिका॥भित्तौभित्तौ॥ ॥वीप्सायांद्विर्भावः॥प्रतिफलगतं

स्वछंदरक्रियासंकोचोव्रीडा॥ ॥नचशंकायांत्रासेवातिव्याप्तिः॥तत्रक्रियाविरहएव॥नतु
क्रियासंकोचः॥विभावाडुराचारादयोऽनुभावाःशिरोनमननयनवदनप्रछादनादयाः
यथा॥ ॥अयोध्यावर्णने॥ ॥भित्तौभित्तौप्रतिफलगतंभालसिंदूरबिंदुंदृष्ट्वादृष्ट्वाकम
लनयनाकेलिरीपन्नमेण॥
प्रबिंबितं॥भालसिंदूरबिंदुंदृष्ट्वादृष्ट्वा॥पौनः॥पुन्येद्विर्भा
वः॥केलीरीपन्नमेण॥सुरतरीपन्नात्सा॥ ॥१ ॥७॥ ॥११ ॥ ॥

114

लोलंचंचलंयथातथा॥ लोलश्चलसतृष्णयोरित्यमरः॥ आलोकयंतिसति॥ पाणिपंके
रुहेणहस्तकमलेनपरितःसमंतात्॥ अंगमितिशेषः॥ प्रच्छादयति॥ अत्रपरस्यवस्त्र

कांतेचैलंहरतिहरितंलोलमालोकयंतीनेत्रेप्रच्छादयतिसहसापाणिपंकेरुहे
ण॥ इतरदितरक्रियाकरणंक्रियायाःशीघ्रतावाचपलता॥ ॥ॐनमः॥
मात्सर्यद्वेषादयोविभावाअनुभावावैरिदर्शनवाक्पारुष्यप्रहारादयः॥ ॥

रहितस्यांगदर्शनजन्योदुराचारोविभावः॥ शरीरप्रच्छादनमनुभावः॥ मंदाक्रांतावृत्तम्॥
१४॥ चपलतामाह॥ ॥

लंकेति ॥ ॥ लंकां प्रतिचरतीति तया नूते ॥ आके स्तछीलतद्‌ मति साधुकारिष्ठिति साधुकारिणि कर्त्तरि णि निः ॥ तया सेतुकारिणि अध्वा वितिशेषः ॥ सिन्वंतित मिति सेतुः ॥ षिञ्बंधन इति धातोः सित निगमीत्याद्युणादि सूत्रेण तुन्प्रत्ययः ॥ तया रणक्रीडया ख्यमकारस्तद्‌ इति ॥ चमत्कारो रसोद्रेकः यद्यपि चमत्करोतीति व्युत्पत्या त्रीलायेंणिनिः संभवति तथापि

यथा ॥ ॥ लंकाचारिणि चापधारिणि रणक्रीडच मञ्च मत्कारिणि प्रौढानं रवचप्रसारिणि पुरो रामे धनुर्धुन्वति ॥ रुहूत्रेस्तदित वृत्तिर्बलीयसीति वचनात्त्रीघ्रोपस्थितत्वाञ्च मत्वर्थीय प्रत्ययो युक्तः ॥ प्रौढानंदेन वचांसि प्रसारयतीत्येवंशील स्तया नूते ॥ यद्वा प्रौढ न प्रगल्भ वीरान् आनंदयतिता दृशो यो वचः प्रसारस्त इति ॥ यद्यपि नकर्मधारयात्मत्वर्थीयो बहुव्रीहिश्चेदर्थप्रत्यायक इत्या ऊक्त याप्येकदेशिनेतिनिर्देशात्कष्मसर्पवान् कालिकइति

भाष्यप्रयोगात् इह सचिक्रुड्‌ कुजवानित्यादि महाकविप्रयोगाश्चैवं व्याख्याताः॥ एतादृशोरा
मेरामचंद्रे॥ पुरोऽग्रेधनुष्वा पंथन्वतिसति॥ कर्षतिसति॥ तस्यदशाननस्यरावणस्य॥
करश्रेणयो हस्तपंक्तयः॥ श्रयंत्येतामितिश्रेणिः॥ औवादिकस्यश्रिञ्सेवायामित्यस्यव
हिश्रीत्यादितानिप्रत्ययः॥ कृदिकारादक्तिन इतिङीषभावः॥ समरप्रारंभेन प्रौढिनादनेन
जातास्तस्यदशाननस्यसमरप्रारंभदंभस्फुरत्केयूरक्वणितानुमेयविशिखत्यागाः करश्रेणयः॥१५॥
स्फुरंतियानिकेयूराणिअंगदानि॥ केयूरमंगदं तुल्येइत्यमरः तेषां
क्वणितंशब्दितंतेनानुमेयाअनुमातुंयोग्याः विशिखत्यागाबाणमोक्षायासांतास्तथाभूता
जाताः॥ क्वणशब्दे इतिधातोर्भावेनिष्ठायामिट्‌॥ अत्ररामं प्रतिरावणद्वेषोविभावः॥ विशिख
त्यागोनुभावः॥ नाद्गूढ०॥१५॥

हर्षमुराहरति॥ ॥पुलकितेति॥ ॥राधाराधिका॥ कर्त्री॥ ॥मुकंदमुखेंदुवीक्षणाय॥श्रीकृ
ष्णाननचंद्रंवीक्षितुं॥कुचौकुंभाविवेत्युपमितिंपेत समासः॥तयोःपालिःप्रांतःपुलकिताकु

चेतःप्रसादोहर्षः॥प्रियदर्शनपुत्रजननादयोविभावाः॥अनु
भावाःपुलकस्वेदाश्रुतस्वरभेदादयो यथा॥पुलकितकुच
कुंभपालिराधाव्रजतिमुकंदमुखेंदुवीक्षणाय॥ ॥७॥ ॥

चकुंभपालिर्यस्यांक्रियायांयथातथा॥ व्रजतिगच्छति॥ ॥श्रीरामायनमः॥ ॥७॥

118

किंच॥ मध्यस्योदरमध्यभागस्य योभंगो लक्षणया भंगानि नयस्तस्य भीतिं तज्जन्यचेष्टां न
विस्त्वयति। करोतीत्यर्थः। तथा नितंबगौरवाणि॥ अत्र तज्जन्यचेष्टाबाहुल्याद्बहुवचनं
। नगणयति॥ अत्र गणयतेरकारस्यस्यानिबद्धाबादतदुपधाया इति सूत्रेण प्राप्ताया वृद्धि

विरचयति न मध्यभंगभीतिं गणयति नापि नितंबगौरवाणि॥ १६॥ आक
स्मिके ष्टानिष्टोपपातविवर्त्तः संभ्रमो वा आवेगः॥ वैरिदर्शनप्रियश्रवणो
त्पातादयो विभावाः अनुभावास्त्वराशरीरस्खलनविपर्यासादयो यथा॥

र्न॥ उपधाकाराभावात्॥ अत्र हरतः श्रीकृष्णदर्शनं विभावः पुलकोद्गमोऽनुभावः॥ औपच्छंद
सिकं वृत्तं। यत्र प्रथमे तृतीये च पादे त्रयोदशमात्राः द्वितीये चतुर्थे च पादे षोडशमात्रास्तत्रौप
च्छंदसिकमिति सिद्धांतः॥ १६॥ ॥ आवेगमुदाहरति॥ ॥

आवेगमुदाहरति॥ एक इति॥ ॥ रघुपते रामचंद्रस्य वैरिमृगीदृशां शत्रुवनितानां॥ एकः करो हस्तः॥ रघुपतेः सेनाचरान् रामचंद्रसैनिकान् अवलोक्य दृष्ट्वा॥ विश्लेषे॥ त्वराप्रसरणेन श्लथीभूते वाससि परिधान वस्त्रे॥ वृत्तं इति शेषः॥ तथा द्वितीयः करः सहचरी स्कंधोपस्थितोऽस्ति॥ वैरिवनितानि रेकः करो नयोर्द्वकाछिथिलीभूते वाससि द्वितीयस्तु सौकुमार्यातिशयात्स्वतः पुलायितुं सामर्थ्याभावेन सखीस्कंधस्थापित इति भावः॥ करे विलोकनधर्मोपचारात्समानकर्तृ

एको वाससि विश्लेषे सहचरी स्कंधे द्वितीयः करः पश्चात्प्रछति चक्षुरेकमितरद्वक्तुं मुखिवम्नाम्पति॥

त्वं॥ यद्वा रामसैनिकानवलोकास्थितानामित्यध्याहारेण योजना॥ वैरिमृगीदृशामित्यत्र सापेक्षत्वेपि गमकत्वात्समासः॥ अत्र गमकत्वं नित्यसापेक्षत्वं॥ तथा हि॥ यद्यपि कस्य वैरी साकांक्षायां वैरिशब्दो रघुपतिशब्देन सह साकांक्षस्तथा सति साकांक्षमसमर्थवद्भवतीति वार्त्तिकाद सामर्थ्ये समर्थः पदविधिरित्यस्याप्रवृत्तेः सविशेषणानां वृत्तिर्न वृत्तस्य च विशेषणयोगो नेति भाष्याद्व समासो न स्यात्तथापि भवति वैनित्यसापेक्षस्य पदान्तरेरितेनान्वयोक्तेर्न विघ्यति॥ अत्र कैयटः॥

संबंधिशब्दः सापेक्षोनित्यं सर्वः समस्यते॥ वाक्यवत्साव्यपेक्षाहिवृत्तावपिनहीयतइति। एवंरते
गृहीतानुनयेनेत्यादयः प्रयोगाःसमाधेयाः। सविशेषणेतिवचनं निराकांक्षाविरहितस्यतत्विष
यमित्यलंप्रकृतेदीयताहष्टिः॥ किंच॥ एकंचक्षुर्नेत्रंपश्चात्पृष्ठतोगच्छति॥ इतरत्द्वितीयंचक्षुः
भर्त्तुर्निजस्वामिनः सुखेविषयेभ्राम्यति॥ अत्रापिभयोद्रेकात्तासामेवंचेष्टाजातेतिभावः॥ अ

एकंकंटकविद्धमस्तिचरणंनिर्गंतुमुत्कंवतेचान्यद्वैरिमृगीदृशांरघुपतेराजोक्यसेनाचरान्॥१७

॥सकलव्यवहाराक्षमत्वानवत्वाजडता॥ नचमूर्छापस्मारनिद्रासुप्रेषतिव्याप्तिः॥ तत्रज्ञानवि
रहात्॥ नचालस्यग्लानीतिन्द्रासेषतिव्याप्तिः॥ तत्रतत्रकतिपयव्यवहारस्यसत्वात्॥ इष्टानिष्टदर्श
नादयोविभावाः। अनुभावाःअनवभाषणानिर्निमेषप्रेक्षणेष्टानिष्टापरिच्छेदादयः॥ यथा॥

त्रैकस्यप्राधान्यमाश्रित्यतत्वपदेशाः॥ तथाएकंचरणंकंटकैर्विद्धमस्ति॥ चपरमन्यत्द्वितीयं
चरणंनिर्गंतुमग्रेगंतु॥ उत्कंवते॥ पदंप्रिस्वरणोऽस्त्रियामित्यमरः॥ चरणेउत्कंगत्वारोपा
त्। अत्ररामचंद्रसैनिकावलोकनंविभावः। पलायनत्वराअनुभावः॥ रा॰ ६०॥ १७॥ ॥

६०

जउतामुदाहरति॥ ॥ॐ पारेति॥ ॥कपयः शाखामृगाः॥ कपिप्लवंगप्लवगशाखामृगवलीमुखाः इ
त्यमरः॥ उदारवीर्यं यथा तथा॥ ॐ खेन पार्यते तीर्यते इति ॐ ष्यारः सचासौ वारिनिधिपारः समुद्र
परतीरं। पारावारे परार्वाचीनतीरे इत्यमरः॥ ष्टुङ् पधस्य चांप्रत्ययस्येति षत्वं॥ गत्वेति शेषः॥ आ
गच्छतो हनुमतः॥ प्रत्यागच्छतः॥ आंजनेयस्य हसितं वितेनुः॥ स्वजात्युचितमिदं कर्म किं ॐ स्मा

कृष्यारवारिनिधिपारमुदारवीर्यमागच्छतो हनुमतो हसितं वितेनुः॥ उद्वीक्ष्य नीरनिधिनीरमधी
रवीचिचित्रार्पिता इव पुनः कपयो बभूवुः॥१८॥ आत्मनि सर्वाधिकत्वबुद्धिः॥ सर्वस्मिन्नधमत्वबु
द्धिर्वा गर्वः। बलैश्वर्यादि निजनजाव[?]योर्दयो विभावाः॥ अनुभावाः अवज्ञा भ्रूदृष्टिचेष्टित हसितयो
रूपप्रकाशहयः॥ यथा॥ धर्मिरूपहासं चक्रुरित्यर्थः। पुनः पश्चात् अधीरवीचिं उल्लोलतरंगं नी
रनिधिनीरं पारावारपयः॥ उद्वीक्ष्य दृष्ट्वा। चित्रार्पिता इव बभूवुः॥ अत्र सिंधुदर्शनं विभावः॥ गम्भमा
ननिर्निमेषानवनाषणादयो ऽनुभावाः। अत्र सिद्धास्पदाध मोत्रेसा। वसंतति लकावृत्तम्॥१८

गर्वमुद्दाहरति॥ ॥निष्पीतेति॥ ॥कलशोद्भवेनअगस्त्येन॥जलधौसमुद्रे॥निष्पीतेचलु
किते सति।गंगयासमुद्रकांतयानद्या॥गौरीपतेः शिवस्यललाटदहनेभालनेत्राग्नौ॥इतर
तिखेदे॥वपुर्निजशरीरं होतुं॥यावत्प्रक्रमः उपक्रमः कृतः॥तावत्मयातत्र॥विपक्षनगरी
णां यानार्यस्त्रियस्तासां यानिद्दगंभोरुहाणि नेत्राब्जानि तेषां यानिद्वंद्वानियुगलानि तैः प्रस्रव
त्ततिप्रस्रवंति यानिअस्त्रवारीणि अश्रुजलानि तेषां पटलैः समूहैः कृत्वा॥ पयोराशयः स

परस्तु रामवाक्यं॥निष्पीते कलशोद्भवेन जलधौ गौरीपतेर्गंगया होतुं हंत वपुर्ललाटदहने याव
—तः प्रक्रमः॥तावत्तत्र मयाविपक्षनगरीनारीद्दगंभोरुहद्वंद्वप्रस्रवलहस्रवारिटलैः स्रष्टाः पयो
राशयः॥१९

मुद्राः स्रष्टाः कृताः। स्रष्टः पयो[illegible] पुनरिति।पाठः साधुः॥अन्यथा गंगायाः पतिवा
ऋत्वं स्यात्।अगस्त्यपीतनिजम[illegible]समुद्रविरहासहगमनकर्तुमुद्यतायां गंगायां मयाशत्रुवनि
तावैधव्यतोपादनेन तासां नेत्र[illegible]जलजातपारावारनिर्माणात्पुनः सौभाग्यपदत्तमिति भावः॥शात्रा
स्त्रनिजबलं विभावः पौरुषप्रकाशानमनुभवः॥ शार्दू०॥१९

विषादमुदाहरति॥ ॥प्रत्यावृत्येति॥ ॥यदि चेत्प्रत्यावृत्य परावृत्य॥ नवनं निजगृहं॥ व्रजामि ग
च्छामि॥ तदा वा वांसंकेतगिरां प्रच्यवः प्रच्युतिः॥ मिथ्यात्वमिति यावत्॥ न वेद॥ हेतुहेतुमद्भावात्रि

इष्टसंज्ञायोः निष्टजिज्ञासा वा विषादः॥ इष्टपदेन जीवनधनयशः शरीरपुत्रकल
त्रादयऊहनायाः अपराधधनगमनादयो विभावाः॥ अनुभावाः उत्तमानां सहा
यान्वेषणोपायचिंतादयो मध्यमानां विमनस्कता अधमानां ध्यानधावनमुखशो
षनिद्राश्वासादयः॥ ॥यथा॥ ॥प्रत्यावृत्य यदि व्रजामि नवनं नाचा भवेत्सच्य
वो निर्गच्छामि निकुंजमेव यदि वा को वेद किं स्यादितः॥ उः॥ किंच॥ अहमित्य प्रयुज्य
मानोपि न वर्तते। अस्मद्युत्तमं इति वचनात्॥ यदि वा निकुंजं प्रति निर्गच्छामि॥ ॥

इतोगमनात्किंस्यात्॥ सर्वत्रलिंङ्॥ किञ्चयदिकश्चिदेवंवनतटेवनप्रांतेतिष्ठामि॥ एताव
ताकिंजातंनकिंचिदित्यर्थः॥ वर्त्मनोमध्येइतिमध्येवर्त्म॥ पारेमध्येषष्ठ्यायेतिनिपातना

तिष्ठाम्येवयदिकश्चिद्वनतटेकिंजातमेतावतामध्येवर्त्मकलानिधेःसमु
द्रयोमातःकिमातन्यतां॥२०॥ औत्सुक्यंकालासहिष्णुतासकलेंद्रिया
णामेकदैवक्रियारंभोवा॥ प्रियंस्मरणादयोविभावाअनुभावास्तद्वागा
श्रगौरवादयः॥ यथा॥ ॥

इत्युक्तसमासः॥ कलानिधेश्चंद्रस्य॥ समुद्रयोजा
तइतिशेषः॥ हेमातःमयाकिमातन्यतां॥ संप्रश्नेलिंङ्॥ शंकात्रविभावःचिंतानुभावः
॥शंका६०॥२०॥ ॥औत्सुक्यमुदाहरति॥ ॥१

आद्य इति ॥ हे सुंदरि सखि ॥ आद्यो याम: प्रथम: प्रहर: ॥ कैरपि कतिपयैः ॥ केलिकौतुकानि च मनोराज्यानि च तैः ॥ करणे तृतीया ॥ नीत: ॥ मयेति समाप्तिमिति च शेषः ॥ मेनयते र्द्विकर्मकत्वं ॥ प्रसिद्धे र्गम्यमानत्वादप्रयोगः ॥ यद्वा निर्गमनार्थस्य नयते र्नद्विकर्मक

आद्यः कैरपि केलिकौतुकमनोराज्यैर्द्वितीयः पुनर्मल्ली
केसरचारुचंपकनवांभोजस्रजां गुंफनैः ॥ ८ ॥ ॥ ॥

त्वमित्यपि केचित् ॥ किंच ॥ द्वितीयो यामः ॥ मल्लीनां केसराणां चारुचंपकानां नवां भोजानां च याः स्रजस्तासां गुंफनैर्ग्रथनैः यद्यपि गुंफनानंतरं स्रगित्युच्यते तथापि सर्वप्रसिध्यनुरोधादवश्यंभाविनिभूतवदुपचार इति परिभाषया वा तद्व्यवहारः ॥ नीत: ॥ ततोऽनंतरं ॥ ॥

काञ्ची च कुंडले च हारश्च हेमवलयानि च तेषां न्यासे धरिणीः तृतीयो यामो नीतः॥ अतः परं वासरस्य दिवसस्य चरमश्चतुर्थो यामः कथं केन प्रकारेण यास्यति॥ अत्र प्रियस्मरणं

कांचीकुंडलहारहेमवलयन्यासैस्तृतीयस्ततो नीतः सुंदरि वासरस्य चरमो यामः कथं यास्यति॥ २१॥ ॥ इतरहिंद्रियम् अपहाय मनसश्चियदा वर्त्तते तदा निद्रा॥ सुप्तस्य कारणत्वात् सुप्तात्प्राक् निद्रा भरतेनोक्ता॥ स्वप्नवहनाडिकायां मनो यदा वर्त्तते न तदा स्वप्न दिसंभवः॥ तत्र विभावाः श्रमावचिंतालस्यक्लमादयः॥ अनुभावाः पार्श्वकरचरण नयनभ्रूचलनविभ्रमवचनस्खलदर्शनादयः॥ ॥

विभावः कालाक्षमत्वम् अनुभावः॥ प्रौढोत्का नायिका॥ २१॥ शार्दूल॰॥ निद्रामुदाहरति॥

गछन्निति॥ ॥तपनदुहितुः सूर्यतनयायाः॥यमुनाया इतियावत्॥कछं जलप्राय
प्रदेशं॥ भोवारिकस्य कचदीप्तिबंधनयोरितिधातोः कचेश्छः॥जलप्रायमनूपंस्या
त्पुंसिकछस्तथाविध इत्यमरः॥गछन्॥तथापिछानां वर्हाणां यो गुछः॥सम्हूहः स ए

यथा॥ ॥गछन् कछं तपनदुहितुः पिछगुछावतंसः
पत्रपन्नस्मद्दनं मसकृच्च क्षुषा कुंचितेन॥ ॥१९

वावतंसो यस्य स तथोक्तः॥तथा स्मद्दनं॥असकृत्पुनः॥कुंचितेन वक्रीकृतेन॥च
क्षुषा नेत्रेण पत्रपन्॥ तथा स्निग्धो मसृणः अपांगो नेत्रप्रांतो यस्य स तथोक्तः॥ ॥ ॥१९

128

तया शिथिलचरणः मंथरपादन्यासः ॥ स्तोकईषत्‌विस्पष्टः प्रकाशो हासो यस्य स तथो
क्तः तथा कमलकलिकया विनोदार्थं हस्तधृतकमलकुड्मलेन मंडितो भूषितः ॥ इदृशो
मेघरवंडः मेघशाकलसदृशः श्रीकृष्ण इत्यर्थः ॥ स्वप्ने दृष्टः मयेति शेषः ॥ अत्र मेघरव

स्निग्धापांगः शिथिलचरणः स्तोकविस्पष्टहासः स्वप्ने दृष्टः कमलकलिकामंडितो
मेघरवंडः ॥ २२ ॥ ग्रहाद्यावेशोऽपस्मारः ॥ तत्र विभावाः अपवित्रस्थलस्थितिधातुवैष
म्योत्कटदुःखभयादयः अनुभावाः कंपफेननिःश्वासभूपतनविपर्यासजिकालोलना

दयः ॥
उक्तपूर्वोक्तविशेषणविशिष्टत्वाभावात् श्रीकृष्णस्याधिक्यस्योक्तेरधिकाभेदरूप
कातिशयोक्तिः ॥ प्रेमजन्यास्मिं ता अत्र विभावः श्रीकृष्णस्य स्वप्ने दर्शनमनुभावः ॥ मंदा

कांतादृतं ॥ २२ ॥ ॥ अपस्मारमुदाहरति ॥ ॥ १

उद्भेदन्नित्ति॥ ॥भूरुहा वृक्षाः कपेः सकाशान्निपातितं निपतंतं शैलं पर्वतं॥ प्रेक्ष्य दृष्ट्वा॥ अ
पस्मारं व्याधिविशेषं॥ दधुरिव॥ इव शब्दस्य गम्यमानत्वात् गम्योत्प्रेक्षा॥ कीदृशाः॥ उद्भेदं
तं श्च च जायेन व पल्लवास्त एवाधरा उच्छ्रास्तेषां रुचो येषां ते तथा भूताः॥ पुनः कीदृशाः॥ प
र्यस्ताः पुनः क्षिप्ताः शाखा एव भुजा यैस्ते तथाभूताः॥ स्फूर्जंतो ये कोरकास्त एव फेन

॥यथा॥ ॥उद्भेदन्नवपल्लवाधररुचः पर्यस्तशाखभुजाः
स्फूर्जत्कोरकफेनबिंदुपटलव्याकीर्णदेहश्रियः॥ ॥१०

बिंदुपटलानि येषां ते तथाभूतास्ते च ते व्याकीर्णदेहश्रियो विक्षिप्तशरीरशोभा इति वि
शेषणसमासः॥ स्फायतीति फेनः॥ स्फायी वृद्धौ॥ फेनमीनावित्युणादिसूत्रेण फी
भावो गुणश्च नक् प्रत्यये निपात्यते॥ ॥ ॥ठो॥ ॥१०

रस·रंगि·
६५

तरंग·५

तथाभ्राम्यंतो ये भृंगास्तेषां कलापाः समूहास्त एव कुंतला अलकास्तान् जुषंति सेवते तथाभू
ताः॥ भरति बिभर्त्ति वा भृंगः॥ भृञ्धारणे भौवादिकस्य जौहोत्यादिकस्य डुभृञ्धातो वन्हि
ञः किंत्तु इच्चेति सूत्रेण न कप्रत्यये रूपं॥ तथाश्वासानिलोत्कंपिताः॥ भयमत्र विभावः
भ्राम्यद्भृंगकलापकुंतलजुषश्वासानिलोत्कंपिताः शैलेंद्रस्य कपोलनिपातिन मय
स्मारं दधुर्भ्रूरुहाः॥ २३॥ मूर्छा चात्रैवांतर्भवति त्वचमपि विहाय मनःस्फुरीतति यदावत्रे
तेतदासुप्तं॥ निद्राविभावः अनुभावा नेत्रनिमीलनप्रलयश्वासोच्छ्वासादयः॥ ॥ठ॥

६५

फेनकंपादयोऽनुभावाः॥ अत्र हृत्सेषु पुरुषधर्मारोपणादपस्मारोत्प्रेक्षणमविरुद्धं॥ रू
पकानुप्राणिता चेयं तेनांगांगीभावसंकरः॥ व्या हू०॥ २३॥ सुप्तमुदाहरति॥ ॥ ॥

131

श्वासेति॥ ॥कापि गोपी तपनदुहितुः कालिंद्याः॥ क्रीडाकुंजे॥ श्वासोच्छ्वासेन प्रचलन् धरोपांतः उष्ठप्रांतो यस्यां क्रियायाम्॥ तथा आमीलिते ईषत्संकुचिते अक्षिणी नेत्रे यस्यां क्रियायाम्॥ तथा निभृतनिभृतं गूढं यथा तथा॥ कर्णावतंसं कर्णाभरणं॥ मूर्ध्नाति इ रति॥ यद्यपि पुंस्युत्तंसाव

॥यथा॥ ॥श्वासोच्छ्वासप्रचलदधरोपांतमामीलिताक्षं क्रीडाकुंजे तपनदुहितुस्सुप्पलः श्री मुरारेः॥ अंतःस्मेरं निभृतनिभृतं कापि कर्णावतंसं कांचिद्दाहोः कनकवलयं दाममुष्णाति काचित्॥२४॥ तंसौ द्वौ कर्णपूरेऽपि शेखरे इत्यमरवचनादवतंसपदेन गतावपि कर्णपदोपादानात् सोऽनरुक्तापत्तिस्तथापि करिकलभकर्णावतंसादिषु प्रतिपत्तिविषये कर्णपदोपादानात्सो न रुक्तापत्तिः कर्णविशेषक रेषु न दोष इति वामनवचनात्समाधेयमिति॥ तथा चोक्तं काव्यप्रकाशे॥ कर्णावतंसादिपदे कर्णादिध्वनिनिर्मितिः॥

सन्निधानाद्विबोधार्थस्थितेष्वेत समर्थनमिति॥ किन्त्वकापिगोपी॥ बाहोर्हस्तात्॥ अपादानेपंचमी॥ कनकवलयंहेमकटकम्॥ मुष्णाति॥ तथाकाचित्॥ रामममाजं मष्णाति॥

इंद्रियाणां प्रथमः प्रकाशो विबोधः॥ निद्राच्छेदोविभावः॥ अनुभावाः अंगाकृष्टिकृष्टिजृंभाक्षिमर्दनांगुलीमोटनादयः॥ ॥७॥ ॥

निद्राः त्रविभावः॥ नेत्रमीलनश्वासोच्छ्वासादयोनुभावाः॥ अत्रस्वरव्यंजनसमुदाययोरेकदावृत्त्याछेकानुप्रासः॥ ॥मंदाक्रांता॥ २४॥ ॥विबोधमुदाहरति॥ ॥ ॥

राधायाः इति॥ ॥दृग्भ्यां दृष्ट्या॥ नभोंतराले॥ कुवलयश्रेण्या विषये॥ हरिद्रं कुर्वत्या॥ सुप्ता
या इति यावत्॥ नेत्रसंकोचेन तन्नांतरालाभावादित्यर्थः॥ यद्वा नभो दृग्भ्यां संयुक्तं कुर्वत्याः
प्रातः प्रबुद्धाया इति यावत्॥ रौत्रौ कमलस्येरिवापयस्य च संकोचात्तदंतर्वर्त्तिनभसो द्द

यथा॥ राधायाः सहसा दृग्भ्यां कुवलयश्रेणी हरिद्रं नभः कुर्वत्याः कलकं
ठकंठनिनदैः सांकेतिकैर्जाग्रतः॥ अंगाकृष्टिविवर्त्तमानवपुषो देवस्य
कंसद्विषो जोजापांगतरंगभंगचतुरं नेत्रांबुजं पातु वः॥ २५॥ ॥

रिद्रत्वमिति योजना॥ राधायाः सांकेतिकैः संकेतस्थले कुंजे भवैः॥ कलकंठनां पिका
नां कंठनिनदास्तैः॥ कंठग्रहणं माधुर्यातिशयद्योततनार्थं॥ कलकंठः परभृतस्ताम्रा
क्षः कोकिलः पिक इति हैमः॥ सहसा अकस्मात्॥ जाग्रतः अत एव अंगाकृष्टेः राधिकां गा

स्तेषाय विवर्तमानवपुषः॥ परिवृत्तमानस्वशरीरस्य यद्वा अंगानामाकृष्टिरामोदनं
यस्य तथाभूतं विवर्तमानवपुर्यस्येति॥ कं सद्दिषो देवस्य श्रीकृष्णस्य॥ लोलोयावपांगो
नेत्रप्रांतो तयोः सारंगनंगच रंतु वीचिभंगि सुंदरं नेत्रांबुजं॥ वोयुष्माकं॥ पातु रक्षतु॥ आ
शिषि लोट्॥ निद्राविच्छेदोऽत्र विभावः अंगाकृष्टिरनुभावः॥ अत्र कंठकंगेति द्वयोः स्वर
व्यंजनसमुदाययोः सकृदावृत्त्याच्छेकानुप्रासः॥ गकारस्य सकृदावृत्त्या वृत्त्यनुप्रास
इत्यनयोः संसृष्टिः॥ अनुस्वारबाहुल्यान्माधुर्याख्यो गुणः॥ अनेकस्य व्यंजनस्य स
कृत्साम्यं छेकानुप्रासः॥ एकस्यानेकस्य वा व्यंजनस्य द्विबहुकृत्वो वा साम्यं वृत्त्यनु
प्रास इति काव्यप्रकाशलक्षणात्॥ तथा च किरातार्जुनीयकाव्यप्रारंभश्लोके वने
वनेव नेचर इत्यत्र मल्लिनाथेन वृत्त्यनुप्रासो भवतीत्युक्तं तत्र मूलं मृग्यं॥ सुप्तायाइ
तिवक्तव्ये भंग्यंतरेण तत्कथनात् पर्यायोक्तमलंकारः॥ अंगाकृष्टिं प्रतिनिनेदजाग्रि

तइतिवाक्यार्थस्यहेतुत्वात्काव्यलिंगमलंकारइत्यनयोरर्थालंकारयोः सर्वंशशालंकारयो
रिवतिलतंडुलवत्संसृष्टिः ॥ अथ अमर्षमुदाहरति ॥ ॥अद्येति॥ ॥भर्तुः॥ रामचंद्रस्य
अद्य आज्ञा नैव अस्ति ॥ अन्यथा ॥ सरसिजनयनाः स्त्रियः सूनवः पुत्राः सेना च एतैः स
मेतं सहितं ॥ स परिमिवारति यावत् ॥ दशमुखं रावणं ॥ लांगूलमूले पुच्छमूले ब

पराहंकार प्रशमनोत्कटसमीहा अमर्षः ॥ विभावा अवमानाधिक्षेपादयः ॥ अनुभा
वाः स्वेदशिरःकंपनयनारुण्यादयः ॥ यथा ॥ ॥अद्याज्ञा नैव भर्तुः सरसिजनयनाः सू
नुसेनासमेतं बद्ध्वा लांगूलमूले दशमुखमभितो भूतले भ्रामयामः ॥ ॥

ध्वा ॥ अभितः समंतात् ॥ भूतले विषये भ्रामयामः ॥ वयमिति शेषः ॥ भवत इति मूल ॥
भो बारिकस्य मूढः बंधन इति धातोर्मूढ्वा कथ विभ्रमः क्त इत्फणादि सूत्रेण क्त प्रत्यये रूप ॥

किंच॥ ॥अथवाचाञ्चल्यत्लंमार्गविलोकेनराममार्गनिरीक्षणेनप्रचलेचंचलेनयने
यस्यास्तयासीतयासाकंएतांलंकां॥ एनामित्यपपाठः॥ अन्वादेशलक्षणस्याप्रवृ
त्तेः उत्ताद्य॥ उन्मूल्यारघुपतिचरणांभोजयोः॥रामचरणकमलयोर्विषयेयोजया

चाञ्चल्यमार्गविलोकप्रचलनयनयासीतयासाकमेतांलंकामुत्पाद्यकिंवारघुपति
चरणांभोजयोर्योजयामः॥२६॥आकारव्यवहारसंगोपनमवहित्थं॥विभावाः भी
डाधर्ष्टकौटिल्यगौरवाहवादयः॥अनुभावाः अन्यथाकरणान्यथाप्रेक्षणान्यथा
कथनादयः॥ मः॥सीताताहरणजन्यावमानना ऽत्रविभावः॥स्वप्रौढिप्रकाशन
मनुभावः॥सहोक्तिरलंकारः॥स्रग्धरावृत्तम्॥२६॥ अवहित्थमुदाहरति॥ ॥

त्यक्त्वेति॥ ॥सविभीषणः॥सद्यग्रहं त्यक्त्वा गतवान्॥कर्मणोऽविवक्षितत्वादत्राप्रयोगः॥तथा
सपाथोनिधिः समुद्रः बद्धः॥किंच ससारणिरपिसारणाख्यमंत्रिपुत्रोपिक्रुध्यति॥तुभ्यमिति
शेषः॥अतो हेतोः सीता परित्यज्यतां॥अनिष्टपरिहारार्थमिति भावः॥इतीत्थं सुकरुणस्येष्ट
जनसमूहस्य वचनमाकर्ण्य श्रुत्वा॥स्मेराननः सस्मितवदनः रावणः॥मुक्तादाम॥मौक्ति
यथा॥त्यक्त्वा सद्म विभीषणः सगतवान् बद्धः सपाथोनिधिः॥किंच क्रुध्यति सोपि सारणिरतः
सीता परित्यज्यतां॥इत्याकर्ण्य सुकरुणस्य वचनं स्मेराननो रावणो मुक्तादाम करेण कंठ
सविधे कीरस्य विन्यस्यति॥२७॥उग्रता निर्दया॥विभावा अपराधदोषकीर्तनचौर्यदो
र्जन्यादयोऽनुभावास्तज्जनिताडनादयः॥ कस्तनजं करेण कीरस्य पंजरस्य शुकस्य कंठस्य वि
धे कंठसमीपे विन्यस्यति। सीतां मुंचेत्यादिवाक्यश्रवणजन्यविकारं गोपयितुं शुकालापकौतु
कं दर्शयितुं हसता रावणेन तत्कंठे मुक्ताहारविन्यासः कृत इति भावः॥औद्धत्यं विभावः॥
हितश्रवणानादरोऽनुभावः॥अनेकदाकार्यहेतुकं काव्यलिंगं॥ चा० ह०॥२७॥उग्रतामु

पुष्करिणी

कोदंडमिति॥ ॥प्रचंडैः प्रौढैः रणे निन्नाये नृपतिभुजादंडास्तैः कृत्वा कोदंडं कार्मुकं लतमस्ति
धनुश्चापौ धन्वशरासनकोदंडकार्मुकमित्यमरः॥ तत्र कार्मुके॥ प्रतिपक्षाः॥ शत्रुभूता ये
राजानस्तेषां या रमण्यस्तासां या वेणी गुणाः केशपाशास्तत्राणि॥ तैर्ज्या मौर्वी गुंफिता रचि
ता॥ मौर्वी ज्या शिंजिनी गुण इत्यमरः तथा मया क्रूराकारो यः कुगरस्तस्मतारं तीक्ष्णो यत्स

कोदंडं रणनिन्नन्नृपतिभूजादंडैः प्रचंडैः कृतं तत्र ज्या प्रतिपक्षराजरमणी वेणी गुणे
गुंफिता। क्रूराकारकुगरेतारपतन प्रभृष्टदुष्टद्विपत्रुघ्नं तरलैः कृतोस्ति विशिख
स्तल्लक्षमुद्दीस्यते॥२०॥ ॥यथार्थज्ञानं मतिः॥ तत्र विभावाः शास्त्रचिंतनादयः॥
अनुभावाः॥ शिष्योपदेशाभ्रूक्षेपकरचातुर्यादयः॥ त्यतनं तेन प्रभ्रष्टा ये दुष्टद्विपास्ते
षां तुंद्यतियानिदंतदलानि तै विशिखो बाणः कृतोऽस्ति॥ तत्र स्माद्धेतोर्लक्ष्यं शरव्यं॥ उद्दी
स्यते॥ जमदग्निवधापराधोऽत्र विभावः॥ तर्जनोक्तिरनुभावः॥ परशुरामोक्तिरियं लक्ष्योद्दी
लक्षणं प्रत्यनेकवाक्यार्थस्य हेतुत्वात्काव्यलिंगमलंकारः॥ शार्दू॰॥२०॥ मतिमुदाहरति॥

लाटति॥ ॥मूढैः कविभिः॥ कोतिकवते कथ्यते वा इति कविः॥ कुशब्दे आशब्दिकः॥ कुङ् अ
व्यक्ते शब्दे ओवाशब्दिकः॥ अनयोरन्यतरस्मात् निक्वणादि सूत्रेण प्रत्यये रूपम्॥ लाट्यः॥ लाट
देशोद्भवो नार्यः॥ टिड्ढाणञित्यादिना ङीप्॥ तत्संबंधिनीनां नेत्रपुटीनां तथा पयोधरघटीनां
क्रीडाकुटीनां हास्तटीनां पाटीरद्रुमस्य च वर्णनेन॥ दिनं अहः नीयते॥ पुष्यादिषु जातिवा

॥यथा॥ लाटीनेत्रपुटीपयोधरघटीक्रीडाकुटीहास्तटीपाटीरद्रुमवर्णनेन कविभि
मूढैर्दिनं नीयते॥ ॥ चित्तात्जीवतस्मिन्नीश्वरे एकमविछिन्नं मनो येषां तथोक्तानां पुंसां
भक्तानामित्यर्थः॥ अत्रैक शब्दः केवलवाची॥ तथाच मेदिनीकोशः॥ एकोऽन्यार्थे प्रधाने च प्र
थमे केवले तथा॥ साधारणे समानेऽल्पे संख्यायां च प्रयुज्यत इति॥ अत्रैकशब्दस्य तच्छब्दार्थ
विशेषणत्वं न स्यात्॥ पूर्वकालैकेत्यादिना तत्पुरुषे तत्पूर्वनिपातत्वात्॥ ॥१२॥

गोविंदेत्यादिनाम्नां व्याहारैरुच्चारणैः ॥ अत्र हरासंबोधनाभावात् हराहूतेचेति प्लुताभावेस
धिः ॥ यद्वा प्लुतत्वेपीति शाष्ट्स्यानार्षत्वाद् प्लुतवदुपस्थित इत्यस्य प्रवृत्तिरिति ॥ समयः का
लः समयाः शपथाचारकालसिद्धांतसंविद इत्यमरः ॥ परिक्रामति ॥ परिवर्त्तते ॥ क्रमः पर

गोविंदेति जनार्दनेति गतीनाथेति कृष्णेति च व्याहारैः समयस्तदेकमनसां पुंसां
परिक्रामति ॥ २९ ॥ नयविनयानुनयोपदेशोपलंभाः अत्रैवांतर्भवंति ॥ उपदेशो

स्मैपदेष्विति दीर्घः ॥ अत्र शास्त्राध्ययनसत्संगादिकं विभावः ॥ सारासारविचारणमनुभावः ॥
अत्र दंडिमते विरोधालंकारः ॥ टकारस्यासकृद्वृत्त्यनुप्रासश्च ॥ व्या० ॥ २९ ॥ नयेति ॥
नयादयादयश्चत्वारोऽत्रैवांतर्भवितीत्यर्थः ॥ उपदेशमु० ॥९॥

वसु मिति॥ इति मेदिनीकृत्॥ वसु धनं॥ वसुतोये धने मणाविति वैजयंती॥ प्रदेयं॥ पात्रेभ्य इति शेषः॥ किंच॥ खलतः उर्जनात्॥ पंचम्यर्थे तसिल्॥ अवधेयं॥ सावधानतया स्थेयं॥ मया इति शेषः॥ तथा मनः स्वांतं॥ स्वांतं हृन्मानसं मनः इत्यमरः॥ हरस्य शिवस्य चरणे निधेयम्॥ तथा निजं विधेयं॥ स्वकीयं कार्यं॥ विधेयं कर्त्तव्यं॥ विधे ब्रह्मणो विधेयं कार्यं विधिरेव ब्रह्मैव वेत्ति वेद॥

यथा॥ ॥वसु प्रदेयं खलतोवधेयं मनो निधेयं चरणे हरस्य॥ निजं विधेयं कृतिभिर्विधेयं विधेयं विधिरेव वेत्ति॥३०॥ उपालंभो द्विविधः॥ प्रणयात्मा कोपात्मा च॥ प्रणयात्मा॥ ॥

विरोलटो वेति विकल्पाद्विडभावः॥ यद्यपि कथितप्रहेलिकापरंपरो यस्तथापि विषयभेदेन समाधेयं एवं श्लोकोक्तौ विभावानुभावावृत्तापित्तियौ॥ उपेंद्रवज्राजतजास्ततो गाविति लक्षणात्॥३०॥ उपालंभो द्विविधः प्रणयात्मा कोपात्मा च॥ तत्र प्रणयात्मा यथा॥ पाषाणा इति॥ पाषाणि माईवं यदि॥ स्यादिति शेषः॥ तथा कृतांतो हरे वह्निमध्ये॥ पयोधारा जलधारा यदि॥ ॥१

तयाव्यालीनां सर्पिणीनां ॥ जातिवाचित्वात्ङीप् ॥ आशीविषो विषधरश्चक्री व्यालः ॥ सरीसृप
इत्यमरः ॥ वदने मुखे सुधा अमृतं यदि ॥ तथा रवेः सूर्यस्य गर्भे मध्ये हिमानी ॥ महद्धिमं ॥ हि
मानी हिमसंहतिरित्यमरः ॥ इन्द्रवरुणेत्यादिना ङीषानुगागमश्च यदि स्यात् ॥ किंच समी
रणे वायौ यदि स्थैमा स्थैर्यं ॥ पृथ्व्यादित्वादिमनिच् ॥ प्रियस्थिरेत्यादिना स्थिरस्य स्थाद

॥ यथा ॥ पाषाणे यदि मार्दवं यदि पयोधाराऽऊ तानोदरे व्यालीनां वदने सुधा यदि रवेर्ग
र्भे हिमानी यदि ॥ स्थेमा किंच समीरणे यदि तदा स्वप्नेऽप्यवेक्ष्यस्त्वया किं नामस्मर भूमिपा
ल भगवन् क्रोधान्सुधा धावसि ॥ ३१ ॥ कोपात्मा चामर्ष एवांतर्भवति ॥
शौः ॥ तदा स्वप्नेऽप्यस
ता भवेत् ॥ हे भगवन् स्मर भूमिपाल कामदेव ॥ क्रोधात् किं नाम मुधा व्यवसि ॥ किमिति प्रश्ने ॥ ना
मेति संभावनायाम् ॥ कुत्साप्रश्नवितर्केषु क्षेपे किंशब्द उच्यत इति शाश्वतः ॥ तस्मात्स्वप्नेऽदृष्टां
प्रियतमां स्मरं ते मां प्रति तव प्रसरणमयुक्तमिति भावः ॥ काव्यप्रकाशमते अतिशयोक्तिरि

यं॥ कुवलयानंदमतेतु संभावनमलंकारः॥ साहि०॥ ३१॥ कोपात्मोपालंभो यथा॥ ॥ जनयसीति॥
॥ हे देवदेवस्याभरण॥ हे हिमांशो चंद्र॥ त्वमिति शेषः॥ जगदिदं॥ सुधारसेनामृतरसेन शीतलं॥
तृतीयांतकृतार्थेन गुणवचनेनेति तत्पुरुषः॥ एतादृशं जनयस्येव॥ तथापि मेम मउरसि दि
तापं॥ विरहज्वरलक्षणं वहसि॥ करोषीत्यर्थः॥ तेनाश्रांतं भावितव्यमर्थे यं॥ यतस्त्वयं उपतिव
क्रं रुक्मसुखं तस्य सखा असि अतः किं ब्रवीमि॥ प्रतीयमानरुक्मसुखसादृश्येन तन्मित्रत्वात्स
॥ यथा॥ ॥ जनयसि जगदेवदेवदेवाभरण सुधारसशीतलं हिमांशो॥ उरसि वहसि मे तथा
पितापं यदुपतिवक्त्रसखासि किं ब्रवीमि॥ ३२॥ ज्वरादिविकारो व्याधिः॥ कुपितधातुनयकाम
क्रैराग्रहयो विभावाः॥ अनुभावाः हृद्रोगप्रद्रवाः॥ यिपरुषोक्तिर्न घटते किं त्वपालंभमात्रमिति
भावः॥ अत्र प्रतीयमानस्य चंद्रोपमेयत्वस्य सत्वात्प्रतीपालंकारः॥ अत्र जगतश्चौत्संकरस्य
तापकरत्ववर्णनेन विभावनाभेदः॥ औपछंदसिकं वृत्तम्॥ ३३॥ एवं मतिप्रभेदाननुक्त्वा व्याधि
मुदाहरति॥ दातुमिति॥ ॥ १

तस्याः कुरंगीदृशः मृगीदृशः॥ अनर्घदीधिति॥ अतिशायितकिरणं॥ रत्नानामनर्घ्यदीधितिष्व
पचयति॥ भानुः करो मरीचिः॥ स्त्रीपुंसयोर्दीधितिः स्त्रियामित्यमरः॥ केयूरं कर्तृ॥ स्वीयं पदं
निजं बाहुरूपस्थानं॥ पदं व्यवसितत्राणस्थानलक्ष्मांघ्रिवस्तुष्वित्यमरः॥ हातुं॥ कुनस्यसु
यथा॥ हातुं स्वीयमनर्घदीधितिपदं तस्याः कुरंगीदृशः केयूरं कनकांगुलीयकमिवानेतुं बहि
र्गच्छति॥ अन्यत् कुस्मनि वेदृया मिकिमितो वेणीमिषात्काजियोदृष्टा जोचनवारिकालि
यस्तरोम्नां तस्यां परिभ्राम्यति॥ ३३॥ विनाविचारं आचारउन्मादः न चाऽगम्यागमनेऽतिव्याप्तिः
विनाविचारामिति परेन तथावर्तनात्॥ तत्र सुखमुद्दिष्टं पतंदृशो विचार एवं क्रियान। समी
चीनेत्यन्यदेतत्॥ अप्रेक्ष्यकारिता उन्माद इति यस्य मतं तत्रेदं दूषणं। तत्र विभावः प्रियवि
योगविभववस्त्रं शादयः॥ अनुभावाः वृथालपितवृथाहसितवृथारोदनादयः॥ सुवर्णस्यांगु
लीयकमूर्मिकां॥ केयूरमंगदं तुल्ये अंगुलीयकमूर्मिकेत्युभयत्राप्यमरः॥ आनेतुमिव

वहिर्गच्छति॥ गलतीत्यर्थः॥ यद्यपिश्वेन सह नित्यसमासो भवितुमर्हति तथापि शुशाऊरिव वामन इत्यादिविव सामर्थ्याभावान्न भवति॥ फलोत्प्रेक्षेयं॥ हेरुल्लइतोऽस्मात्कारणादित्यस्त रमधिकं॥ कष्टमितिशेषः॥ किन्निवेदयामि॥ अन्याराहिनापंचमी॥ यतः लोचनवारि रोदनोत्पन्नमश्रुजलं दृष्ट्वा॥ कालियो नागविशेषः॥ कालियसरोभ्रांत्या॥ कालियसर इति तस्य रूढस्य लोकप्रसिद्धाभिधानानुवादः॥ वेणीमिषात्केशपाशव्याजात्॥ परिभ्राम्यति॥ प्रचलति॥ विरहज्वरोऽत्र विभावः॥ रोदनकेशप्रसारशरीरचौर्यित्यादयोऽनुभावाः॥ अत्र वेणीत्वमपह्नुत्य कालियत्वाभिधानात् वेणीप्रचलनेतत्परिसर्पणसंभावनाच्च सापह्नवा क्रियास्वरूपोत्प्रेक्षा॥ कालियस्य निजरूढस्य नामाभिधानात् भ्रांतिमदलंकारश्चेति संक्षेपः॥ गाई०॥ २२॥ उन्मादमुद्दरति॥ ॥

नैषेति॥ ॥एषा काप्यनिर्वचनीया कांचनलता सुवर्णवल्ली॥ नं कास्ति॥ किंतु मे मदीया सेवा
नुभूता राधिका अस्ति॥ कुतोपि कारणात्॥ दृष्टा सती चेद्यदि न जल्पति॥ न भाषणं करोति॥
तर्हि सं मूर्छितावर्त्तते॥ हंत इति विस्मये॥ इत्थं विचिंत्य॥ हरिरिति प्रकरणाल्लभ्यते॥ दृशोः ने
त्रयोः धीरैर्बहुलैरित्यर्थः॥ नीरैः॥ अश्रुभिः सिंचति॥ स्वमिति कर्मणो गम्यमानत्वादयोग
यथा॥ ॥नैषा कापि च कास्ति कांचनलता सैवास्ति मे राधिका दृष्टा चेन्न कुतोपि जल्पति त
र्हि सं मूर्छितावर्त्तते॥ इत्थं हंत विचिंत्य सिंचति मुहुर्नीरैर्दृशोर्वीतिं वा तनुते करेण भुज
यो राधाय संभाषते॥ २४॥ प्राणनिष्क्रमणं निधनं॥ विभावानुभावौ स्पष्टौ॥ ॥
किंच॥ वा शब्दः समुच्चये॥ वास्यादिकल्पोपमयोरेवार्थेपि समुच्चये इत्यमरः॥ करेण कृत्वा
वीजनं तनुते॥ वीजयतीत्यर्थः॥ तया भुजयोर्मध्ये आधाय संश्लिष्येत्यर्थः॥ संभाषते संबोध
यति॥ राधावियुक्तस्य कृष्णस्योन्मादावस्थावर्णनं कृत्वा राधिकासमीपे कृतमित्यवधेयम्॥
राधिकावियोगोऽत्र विभावः॥ हृषालपितरोदनादयोऽनुभावाः॥ शार्दू०॥ २५॥ निधनमु०॥ ॥

पर्यस्तामिति॥ संग्राममन्वमौ रणांगणे। पर्यस्तांघ्रि विक्षिप्तचरणं॥ अंघ्रार्यस्त्रेत्यत्र णादिसूत्रेण निपात
ना साधुः॥ विकीर्णबाहू यस्य॥ पततो लंकेशस्य रावणस्य केशपाशस्पर्शं मनिलो भियाभयेन हेतु
ना न समाकांक्षति॥ नेच्छति॥ पदार्थहेतुकं काव्यलिंगं। तयोष्णकरः सूर्यः॥ तस्य वक्त्रारविंदे मुख
कमले॥ उष्णकरं किरणं न किरति न विक्षिपति॥ किंच॥ अपिशब्दार्थे॥ अपिः पदार्थेत्यादिसूत्रेतया
॥ पर्यस्तांघ्रिविकीर्णबाहू पततः संग्राममूर्मोर्भिया लंकेशस्य न केशपाशमनिलस्पर्शं समाकां
क्षति। उष्णनोष्णकरः करं किरति वा वक्त्रारविंदे न वा सुरैस्त्वेधाद्विमिथः कथामपि सुराः प्रव्यक्त
मातन्वते॥ ३५॥ मनोविक्षोभस्त्रासः॥ तथा च विचारोत्थो मनःक्षोभो भीतिराकस्मिकमनःक्षो
भे नैव द्वयोरप्येकत्वेनोपग्रहः॥ तत्र विभावाः॥ घोरस्वनश्रवणघोरसत्त्वदर्शनादयः॥ अनुभा
वाः स्तंभस्वरभेदरोमांचस्त्रस्तगात्रतादयः॥ दर्शनात्॥ से त्वेधा स्थिताः सुराः देवाः प्रव्यक्तं
प्रकटं यथा कथामातन्वते॥ मृतोऽयं जीवति वेत्यन्योऽन्यं वार्त्तां कुर्वते॥ व्यक्तत्वमनुव्यक्तमातन्व
ते इति पाठः साधुः॥ तत्पक्षे कथामपि न व्यक्तमातन्वत इत्यन्वयः॥ रामास्त्रप्रहारो विभावः स्थितौ

148

पतनकरचरणादिप्रसारणादिकमनुभावः॥व्याईं०॥३५॥त्रासमुदाहरण॥शृण्वानइति॥ ॥रामवृहना
त्रसंगतउच्चरितंहरिनामविष्णुनामकपिनामवाश्रृण्वान्॥अतएवेन्द्रशंकांवहन्नध्यायत्॥हरिश्चाष्ट
त्वानेकार्थत्वादितिभावः॥अतएवांतरंमानसंकातरंदीनंकुर्वन्॥पक्षछेदभयादितिभावः॥एता
दृशोभगवान्मैनाकभूमिधरःमैनाकाख्यपर्वतविशेषः॥कुंचत्पक्षतीति॥संकुचितपक्षमूलो॥प
क्षमूलंतुपक्षतिरित्यमरः॥भुग्नितेवक्रीकृतेश्रुतीयस्यां॥क्रियायांयथातथा॥तयाकृतप्रसंगत्वा
यथा॥शृण्वानोहरिनामरामवदनादिन्द्रस्यशंकांवहनकुर्वन्कातरमांतरंसभगवान्मैनाकभू
मीधरः॥कुंचत्पक्षतिभुग्नितश्रुतिकृतप्रत्संगचोजावृतिसक्तव्याहतिसिंधुपंककुहरेनिमंकु
माकांक्षति॥३६॥विचारोवितर्कः॥विभावाविप्रतिपत्तिसंशयसाधकमानेसमुद्भावनादयः॥
अनुभावाःशिरःकंपभ्रूचलनादयः॥कितर्कस्त्रिविधः॥विचारात्मासंशयात्माअनध्यवसायात्मा
विप्रतिपत्त्यात्माचेति॥ॐ जातृत्ति॥कृतप्रसंगवस्याच्छादनंयथा॥तथात्वक्ताव्याकृतयोपस्या
क्रियायांसिंधोःसमुद्रस्यपंकयुक्तयत्कुहरमध्येगर्तस्तस्मिन्विषयेनिमंक्तुंबुडितुं॥आकांक्षति॥
रक्षति॥हरिन्नाश्रवणमत्रविभावःपक्षतिसंकोचादयोऽनुभावाः॥ ॰ वाक्यार्थहेतुकंकाव्यलिंगं॥

७४

॥तन्निदा मूले एवस्पष्टः॥ क्रमेणोदाहरणानि॥ अद्योयथा॥ कालिंदीति॥ शंभोरिदं शांनवं धनुः कार्मुकं॥ तस्येद
मित्यण्प्रत्ययः॥ कालिंद्यां यमुनायां विलुठन् कमठो यः कमठः कूर्मस्तद्वत्क्रूरं भयंकरं॥ अत्रकालिंदी
त्यादिना कालियहृदो विवक्षितस्तत्र हि स्थिता जंतवस्सौभरिशापेन हिंसकप्रवेशाभावात् चिरजीविनो
भवंति तेन तत्रत्यानां कमठानामतिकाठिन्यद्योतनार्थं कालिंदीग्रहणं॥ तथारामः बालमृणालवत्को
मलवपुर्वत्तिः इति शेषः सर्पवंशः भुवः पृथिव्याः॥ अवतंसआभरणं॥ खलाः ऊर्जनाव्याहारे भाषणे प्र

अनध्यवसाय उत्कटकोटिकः संशयः॥ प्रत्येकमुदाहरणानि॥ कालिंदीविलुठत्कमठकमठक्रूरं
धनुःशांभवं रामो बालमृणालकोमलवपुर्वंशोवतंसो भुवः॥ व्याहारप्रखलाः खलाः क्षितिभृतां गोष्ठी
गरिष्ठा पुनस्तस्मात्केवलमेष तिष्ठति मम श्रेयस्करो भास्करः खलाः॥ रलयोरैक्यात्प्रखराः इत्यर्थः
॥ व्याहाराः उक्तिर्जल्पितं भाषणं वचनं वचः इत्यमरः॥ तथा क्षितिभृतां राज्ञां गोष्ठी वाग्गरिष्ठातिगुर्वी॥ भा
नभंगभयदेत्यर्थः॥ तस्मात मम पुनः ममतु॥ केवलं एषभास्कर एव श्रेयस्करः॥ रामवंशमूलपुरु
षत्वान्महाराधितत्वाच्चेति भावः॥ रामे धनुर्भंगं कर्तुमुद्युक्ते सति विश्वामित्रोक्तिरियं॥ महः श्रेयस्क
र इति पाठे तु महसा धनुःसारशोषणहेतुभूतेन श्रेयस्करत्वं बोध्यम्॥ अत्र धनुर्भंगानिश्चयो विभावः॥

150

रस॰रंगी ७५

तरंग॰५

आक्षिप्ताः शिरःकंपादयोऽनुभावाः॥ अनेकवाक्यार्थहेतुकं काव्यलिंगं समुच्चयश्च॥ ग्राह्य॥ ३४॥ ॥द्विती
यः सत्रायात्मायया॥ ॥सौंदर्यस्येति॥ मनोभवेन कामेन सौंदर्यस्य लावण्यस्य॥ एषा राधा हरेदृष्
मा एकागणनार्था॥ लेखा कृता किं॥ सौंदर्यमेकमत्रास्तीति परिगणनार्थमेका रेखा कामेन कृते
ति भावः॥ किं च विलोकितुं सामान्यतो दृष्टा॥ त्रिजगतां त्रिलोकानां लावण्यस्य सौंदर्यस्य॥ उद्ग्रीवि
का॥ उन्नमितोर्ध्वीकृता या ग्रीवा सैवोद्ग्रीविका॥ स्वार्थे कन्॥ प्रत्ययस्थात्कादिनाकारस्येकारः॥ ए
॥ सौंदर्यस्य मनोभवेन गणना लेखा किमेका कृता लावण्यस्य विलोकितुं त्रिजगतीमेषा किमुद्ग्रीवि
का॥ आनंदद्रुमकंदली नयनयोः किं वा समुज्जृंभते राधायाः किमु वा स्वभावसुभगा रोमालिरुन्मील
ति॥ ३५
षा किमुद्ग्रीवास्तीति शेषः॥ तथा नेत्रयोः संबंधिनी आनंदद्रुमस्य कंदप्ररोहः। कंदोऽस्ति अस्या
इत्यस्य येसिध्माहित्वाद्यच्॥ किं वा समुज्जृंभते॥ विकसति॥ अथ वा राधायाः स्वभावसुभगा स्वतः
सुंदरी॥ रोमालिः रोमावली॥ अयं चाष्टौ विलग्नमध्यस्य रोमपंक्तौ रूढः॥ उन्मीलति किमु॥ स्ववक्त्रमा
स्करः श्रेयस्करः इति विचारः॥ अत्र तु अनेकस्मात् छत्रेखनात् निश्चयाभावे संशय इति भेदः॥ कुवलया
नंदमते उत्प्रेक्षालंकारः॥ काव्यप्रकाशमते तु रूपकमिति विवेक इति दिक्॥ विभावानुभावौ पूर्वव

७५

१५

अनध्यवसायो ऽनिश्चयस्तं तृतीयं तर्कमेनमुदाहरति॥ कथयेति॥ खंजनं खंजरीटं॥ खंजरीटस्तु खंजन इत्यमरः॥ खेलयंती रमयंती इयं कावर्त्तते॥ कथय कथय॥ नृत्यार्थे द्विर्भावः॥ किंच यमुनायाः पाथसिज॥ पाथो ऽर्णः पयोंबु चेति त्रयम्मृतः॥ केयं स्वर्णवल्लिः सुवर्णलतिका विहरति क्रीडति॥ तथा अयं पुरो वर्त्ती को वा शारदः॥ शारदि भवस्तत्संबंधी॥ शीतभानुर्हिमांशुः उ

कथय कथय केयं खंजनं खेलयंती विहरति यमुनायाः पाथसि स्वर्णवल्लिः॥ अयमुदयति को वा शारदः शीतभानुस्तदुपरि तिमिराणामेष को वा विवर्त्तः॥ ३१॥ ॥ छ॥ ॥१

दयति॥ अयते एतस्मान्नेपदस्यानित्यत्वात्परस्मैपदं॥ याद्वाइटइटी तिदंडके प्रश्लिष्टस्य इधातोरिति बोध्यम्॥ तथा तदुपरि तदुपरि॥ एषतिमिराणां को वा विवर्त्तः॥ अन्यथाभासः॥ रूपांतरमिति यावत्॥ अत्र खंजनादि शब्दैर्नेत्रादिनामध्यवसानाद्रूपकातिशयोक्तिः॥ निश्चयाभावादनध्यवसायश्च मालिनी वृत्तम्॥ ननमयययुतेयं मालिनी भोगिलोकैरिति लक्षणात्॥३१

विप्रतिपत्तिर्विविधहेतूक्तिः सा यथा॥ ॥इयमिति॥ ॥इयं सुधाकरस्य चंद्रस्य याः कलाः षोडश कलास्तास्य अधिका उत्कृष्टा राधिका॥ न विलसति॥ कुत इत्यपेक्षायामाह॥ तस्याः वपुः शरीरं॥ किरणमालिनः सूर्यस्य करं किरणं सहेत किमु॥ अपितु नेत्यर्थः॥ तस्मादाधिकेयं न भवतीभावः वाप क्षांतरे॥ कनकमंजीरी॥ अत्र मंजरी शब्दे वद्दत्तरी वाचको लक्षणयेति

इयं न विलसत्सुधाकरकलाधिका राधिका करं किरणमालिनः
किमु सहेत तस्या वपुः॥ न वा कनकमंजरी वहति खंजरीटं यत
स्ततः स्मरमदालसा कथय केयमुन्मीलति॥४०॥ ॥ठ॥॥

ति बोध्यम॥ यद्वा वद्दत्तरीति पाठः॥ न भवति॥ यत इयमिति शेषः॥ खंजरीटं खंजनं वहति ॥चंचरीकमिति पाठः साधुः॥ तया सति सुवर्णलतायां सुगंधाभावाद्भ्रमरस्य नित्यसंबंधा भावोऽतुनतयेति भावः॥ ततस्तस्मात्स्मारमदेन अलसा मंथरा। न लसतीस्यलसा। स्मरमदेनाल्पविसवतीत्यर्थः॥

अल्यार्थेनत्त्र॥ इयं पुरोवर्तिनी का उन्मीलति॥ विलसति॥ केति प्रश्नो॥ त्वं कथय॥ अत्र चतुर्थपादस्वा
क्यमध्ये कथयेति वाक्यांतरप्रवेशात् गर्भिता ख्यदोषमाऊक्काव्याप्रकाशात्कृतः॥ एवं द्विकाव्यलिं
गं॥ उत्तरार्द्धे तु रूपकातिशयोक्तिकाव्यलिंगयोरंगांगीभावेन संकरः केयमिसेह श्लेषेति संक्षेपः॥ पृ
थ्वी वृत्तम्॥ जसौ जसयला वसुग्रहयतिश्च पृथ्वी गुरुरिति लक्षणात्॥ इति चत्वारो वितर्कप्र

ननु दशावस्थासु अभिलाषगुणकथाप्रलापा व्यभिचारिभावा अंतरेण गणितास्तत्किं स्वतंत्राए
वेति चेन्न॥ औत्सुक्येभिलाषस्य॥ वर्णनान्मकस्मृतौ गुणकथायाः॥ उन्मादे च प्रलापस्यांतर्भा
वात्॥ अत्र प्रतिमातिष्ठलमधिको व्यभिचारिभाव इति॥ तां बलाहरणच्छलेन रसास्लेषोपि संवि
ध्नितइति श्रृंगारे॥ रौद्रे चैंद्रजालाहयः॥ हास्ये च व्यपदेशान्यापदेशादय इति दर्शनात्॥ वीरे प्रिये भे
देन गणनाश्च॥ ॥ कारानिरूपिताः॥ ४०॥ नन्विति॥ अभिलाषादयस्त्रयः॥ दशासंख्याकाश्च वस्था
स्तास्विति मध्यमपदलोपी समासः॥ तत्र प्रतीयमानास्तथा सति व्यभिचारिभावमध्ये नोक्ताश्च
तः किमेते स्वतंत्रा भविष्यंतीति चेन्न। तेषामौत्सुक्यादिष्वंतर्भावात्॥

छन्नमप्यधिकोव्यभिचारिभावोनवितुमर्हतिशृंगारादिरसेषुतथार्ईशनादितितिभाकः॥ शृंगारेद्धुलं॥ ॥यथा॥ ॥संकेतीकृतेति॥असंकेतःसंकेतःसंपद्यतेतथासतयात्कानननतस्यविशातो
॥अत्रकाननविशेषणासंकेतशब्दात्कृञायोगेच्विप्रत्ययः॥ काननशब्दात्तुन॥ संपद्य
मानत्वाभावादभूततद्भावासंभवाद्वा॥ यतःप्राकसिद्धंकाननमुद्दिश्यसंकेतत्वंविधीयते
॥विधीयमानस्यैवसंपद्यकर्तृत्वंतस्यैवाभूततद्भावश्चसंभवति। नतुकाननरूपविशेष्य
॥गुप्तक्रियासंपादनंछलं॥विभावाअवमानप्रतिपक्षकुचेष्टादयः॥अनुभावावक्रोक्तिनिभृ
तस्मितनिभृतवीक्षणप्रकृतिप्रच्छादनादयः॥यथाशृंगारे॥यथा॥ संकेतीकृतकाननंप्रवि
ष्टातोरन्योन्यकौतूहलादन्यत्वप्रतिभानमारचयतोरन्योन्यमुत्कस्पतोः॥ स्पतस्यप्राकसिद्धत्वेना
भूतत्वायोगात्॥ संकेतत्वस्यचजायमानत्वेनप्रागभूततयाचतयानवन संभवाद्वेतिसर्वमनवद्य
म्॥अत्रेदमाकूतम्॥कृभ्वायोगेकर्मणएवसंपद्यकर्तृत्वंच्विप्रत्ययोगेचकर्तुरिवतयात्वं॥ ततःक
र्मविशेषणात्कृञायोगेस्वार्थेच्विःच्विप्रत्यययोगेतुकर्तृविशेषणात्स्वार्थेच्विरितिनिष्कर्षइति॥अ
न्योन्यंपरस्परंयत्कौतुकंतस्मात्॥अन्यत्वप्रतिभानंआरचयतोः॥ चेष्टयान्योन्यस्वस्मिन्नन्यथाबुद्धि

चकितयोः॥ तयाकुंचत्कायंसंकुचितदेहंयथातथाइतस्ततःकिसलयैःपल्लवैः॥ आत्मानंनिजदेहं॥
आत्मादेहेधृतौजीवेस्वभावेपरमात्मानीतिविश्वः॥ आवृण्वतोः॥ आच्छादयतोःराधामाधवयोः॥
निकुंजकुहरात्॥ उद्ग्रीविका॥ ऊर्ध्वग्रीवा॥ नोऽस्माकंपातु॥ अत्रान्योन्यकौतुकंविभावः॥ जासाद
योऽनुभावाः॥ शार्दूल०॥ ४१॥ रौद्रेछलंदर्शयति॥ सन्नापीति॥ ॥ पुनःसुखसमुद्रोद्धत्रेघनानंतरं॥
कुंचत्कायमितस्ततःकिसलयैरात्मानमावृण्वतोराधामाधवयोर्निकुंजकुहराउद्ग्रीविकापा
तुनः॥ ४०॥ ॥ संग्रामेयथा॥ सन्नापिक्रमानकपटांबुराशौ नृपुरोपकंठेपुनरीक्षमाणः॥ द्व
रौकपींद्रस्यमुखेसरवेलमायोजयामाससरामचंद्रः॥ ४२॥ पुरोपकंठेजंकासमीपे॥ अपिक्र
मान्॥ ससंख्याकान्॥ कपटांबुराशौनमायासमुद्रान्‌रक्षमाणःसरामचंद्रः॥ कपींद्रस्यहनुमतः
मुखेदृशौनेत्रेसखेदंसविषादंयथा॥ आयोजयामास॥ व्यापारयामास॥ अत्रमाययांबुराशिनि
मर्णविभावः॥ तदवलोकनेनखिन्नस्यरामस्यनेत्रव्यापारोऽनुभावः॥ उपजातिवृत्तम्॥ अत्रप्र
थमचतुर्थपादेइंद्रवज्राद्वितीयतृतीयपादेउपेंद्रवज्रास्तितेनोपजातिर्ज्ञेया॥ ४२॥ ॥

शृंगारादिरसेषु त्रस्त्रिंशद्व्यभिचारिभावानां यथासंभवं जनबुद्धुदृत्पायेनस्थितिसंभवमाह ॥ आलस्येति ॥ ॥ संभोगशृंगारे त्र्यालस्यौग्र्यजुगुप्सा इति त्रय एव वर्ज्यानि त्वन्ये ॥ तेन त्रिंशतां व्यभिचारि

आलस्यौग्र्यत्वजुगुप्सा संभोगे वर्ज्याः ॥ विप्रलंभे आलस्यग्लानिनिर्वेदश्रमशंकानिद्रौत्सुक्यापस्मारसुप्तविबोधोन्मादजाड्यासूया व्यभिचारिणः ॥ हास्ये त्र्यवहित्थालस्यनिद्राप्रबोधासूया व्यभिचारिणः ॥ करुणे मोहग्लानिनिर्वेददैन्यजाड्यविषादभ्रममरणास्मारोन्मादव्याध्यालस्यचेपथुस्तंभस्वरभेदाश्रूणि व्यभिचारिणः रौद्रे ॥ उत्साहस्मृतिस्वेदावेगामर्षरोमांचचंचलतोग्रत्वस्वरभेदकंपा व्यभिचारिणः वीरे ॥ उत्साहधृतिमतिगर्वावेगामर्षोग्रतारोमांचा व्यभिचारिणः ॥ ॥

भावानामुपयोगः ॥ विप्रलंभशृंगारे आलस्यादयस्त्रयोदश व्यभिचारिणः ॥ हास्ये अवहित्थादयः पंच ॥ करुणे मोहादयः पंचदश ॥ रौद्रे उत्साहादयो दश ॥ वीरे त्साहादयो ऽष्टौ

भये॥ स्तंभादयश्चतुर्दश॥ बीभत्सेपस्मारादयः षट्॥ अद्भुते स्वेदादयः षट्॥ अन्येति॥ अन्येरसा
नुकूलाः स्वयंविचारणीया इत्यर्थः॥ स्थायिनोपीत्यादि तरंगसमाप्तिपर्यंतं मूल एव स्पष्टं॥ ॥

भये॥ स्तंभस्वेदगद्गदत्वरोमांचवैवर्ण्यशंकामोहवेगदैन्यचापलत्रासापस्मारप्रलयमूर्छा व्यभि
चारिणः॥ बीभत्से॥ अपस्मारमतिव्याधिमोहावेगवैवर्ण्यानि व्यभिचारिणः॥ अद्भुते॥ स्तंभस्वे
दगद्गदतास्फुरोमांचविभ्रमा व्यभिचारिभावाः॥ अन्ये च व्यभिचारिभावा रसानुकूलाऊहनी
याः॥ स्थायिनोपि व्यभिचरंति॥ हासः शृंगारे॥ रतिर्हास्यकरुणशांतिषु॥ क्रोधो वीरे भये
शोकः॥ भयानकशृंगारयोर्जुगुप्सा॥ उत्साहविस्मयौ सर्वरसेषु व्यभिचारिणौ॥ उत्साहो रौ
द्रहास्ययोरिति॥ ॥इति श्रीभानुदत्तविरचितायां रसतरंगिण्यां व्यभिचारिनिरूपणं ना
म पंचमस्तरंगः॥५॥ ॥इति श्रीमहोपाध्यायावटंकानंदरामभट्टात्मजभगवद्भट्टविरचिता
यां रसतरंगिणीव्याख्यायां नूतनतरीसमाख्यायां व्यभिचारिभाव निरूपणे पंचमस्तरंगः स
माप्तः॥५॥

अथेत्यानंतर्ये॥ रसस्वरूपमाह॥ विभावेत्यादि॥ उपचीयमानोऽभिव्यज्यमानः॥ परिपूर्णः स्वातममभिव्याप्तः॥ रस्यमानः स्वाद्यमानः॥ अनुभवगोचरीक्रियमाण इतियावत्॥ शेषं स्पष्टम्॥ लक्षणस्य लक्षणांतराद्भूषकत्वात्प्रकारांतरमप्याह॥ भावेति॥ भावस्य रत्यादेर्यैस्तैर्विभा

अथ रसा निरूप्यंते॥ विभावानुभावसात्विकव्यभिचारिभावैरुपनीयमानः स्थायिभावः परिपूर्णो रस्यमानो रसः॥ भाव विभावानुभावव्यभिचारिभावैर्मनो विश्रामो यत्र क्रियते स वा रसः॥ प्रबुधः स्थायिभाववासना वा रसः॥ प्रबोधकाः विभावानुभाव सात्विकव्यभिचारिभावाः॥ नन्वेवं पूर्नः प्रथमानुरागेऽव्याप्तिः पूर्वानुभवाभावादिति वाच्यम्॥ तत्रापि जन्मांतरीयानुभावसत्वादिति॥ स च रसो द्विविधः॥

वा द्रयस्तैर्यस्तैर्यत्र यस्मिन् वस्तुनि मनसो विश्रांतिरास्वादातिशयं जायमित्यर्थः॥ शेषं सुगमं॥ ननु तर्हि निलाद्वीनां पूर्वानुरागस्यापि विप्रलंभत्वं कथं संगच्छते इत्याशंक्य समाधत्ते॥ न चेत्यादि॥ द्विविध इति॥ ॥

यि ७१

र

लौकिकः स्वकीयः ॥ अलौकिकः परकीयः ॥ कात्यनिक इतियावत् ॥ प्रत्यासत्तिः भोक्तृभोग्यसमवधा
नं ॥ औपनयिकेति ॥ उपनयः स्वस्य नलाघमेदमानंतउत्पन्नः ॥ विनयादित्वात्ठक् ॥ नन्विति ॥ ने

लौकिकः ॥ अलौकिकश्च ॥ लौकिकसंन्निकर्षजन्मा रसो लौकिकः ॥ अलौकिकं संनिकर्षजन्मा
रसश्चालौकिकः ॥ लौकिकः संनिकर्षः षोढा विषयगतः ॥ संयोगः संयुक्तसमवायः संयुक्तसम
वेतसमवायः समवेतसमवायः समवायो विशेषणविशेष्यभावश्चेति ॥ अलौकिकसंनिक
र्षज्ञानम् ॥ तेषु चानुभूतेषु ज्ञानमेव तज्जन्मा ननु भूतेष्वपि तेषु प्राक्तनसंस्कारद्वारा ज्ञानमे
व प्रत्यासत्तिकरणं ॥ अलौकिकरसस्त्रिधा ॥ स्वाप्निकः ॥ मानोरथिकः ॥ औपनायिकश्चेति ॥

औ

औपनायिकस्य काव्ये पदपदार्थचमत्कारेणाधेयश्च ॥ किंतु द्वयोरपि आनंदरूपतता ॥ ननु मानो
रथिको रसोऽनुप्रसिद्ध इति चेत्सत्यम् ॥ अस्माकं तु रमनोरथोपरिचितप्रासादवापीतटक्रीडा
काननकेलिकौतुकजुषामायुः ॥ परिक्षीयत इत्यादौ ॥ पथेमनोरथेन स्वपतीकृतं नलमित्यादौ ॥

तथा वर्णनीयत्वेति भावः॥ शास्त्र इति उक्तरीत्या त्रैविध्यगणनमित्यर्थः॥ रसविशेषानाह॥ शृंगारेति॥
सकलेति॥ श्रीकृष्णेनाहृतत्वादिति भावः॥ सकलस्य लोकस्य याकांक्षा तस्या विषयत्वेन गोचरत्वे
मनोरथिकः शृंगारस्य वर्णनात्॥ शास्त्रेषु सुखस्य त्रैविध्यगणनाच्च॥ रसेन च विना सुखानुपपत्ते
रिति॥ तत्र विशेषास्तत्र नव रसाः॥ शृंगारहास्यकरुणरौद्रवीरभयानकाः॥ बीभत्साद्भुतसंज्ञौ च
नाद्येवाष्टौ रसाः स्मृताः सकलाधिदैवतं विष्णुः॥ स च शृंगारदैवतं॥ तेन सकलाराध्यतया स
कलाकांक्षाया विषयत्वेन वा प्रथमं शृंगारस्योपन्यासः ननु वात्सल्यं लौल्यं भक्तिः कार्पण्यं वा क
थं न रसः॥ आर्द्रतानिलाषश्रद्धास्पृहानां स्थायिभावानां तत्र सत्वादिति चेन्न॥ तेषां व्यभिचा
रत्यात्मकत्वात्॥ ननु कस्य रसस्य ते व्यभिचारिभावा इति चेत्सत्यम्॥ वात्सल्ये करुणः॥
लौल्ये हास्यं॥ भक्तौ शांतिः॥ कार्पण्ये हास्यं॥ ॥ नाराध्यतया सेव्यतया प्रथमं शृंगारवर्णनमि
त्यर्थः॥ ननु कथमष्टावेव रसास्तदतिरिक्तानामपि संभवादित्याशंक्य समाधत्ते॥ ॥ ९

नन्विति॥ व्यभिचार्यात्मकत्वादिति॥ उक्तं च काव्यप्रकाशे॥ रतिर्देवादिविषया व्यभिचारी तथांजितः॥ भावः प्रोक्त इति॥ एवं च पुत्रादिविषयं वात्सल्यमस्फुटत्वान्न रसो नापि रत्याख्यः स्थायी तस्य रूपत्वेऽपि व्यस्थिरत्वादर्शनात्॥ तस्माद्वात्सल्याख्यो रतिभावः करुणस्य व्यभिचारीति संक्षेपः॥ एवमग्रेऽपि वि

नन्वेवं परत्र क्लृप्तत्वात् व्यभिचारित्वेनावच्छेदकत्वाद्धर्मिकल्पनातो धर्मकल्पनाया लघुत्वाच्च व्यभिचारिरतिरेवास्तु॥ किं करुणेनेति चेन्न॥ रतेः शोकः रतिशोककारणतायां रतेरुपजीव्यत्वात्॥ किं च॥ रतेः कस्य रसस्य व्यभिचारित्वम्॥ न शृंगारहास्यरौद्रवीराणां॥ युवमिथुनपरस्परप्रीतिहासक्रोधोत्साहानां तत्राभावात्॥ न बीभत्सस्य॥ जुगुप्सायास्तत्राऽभावात्॥ नाद्भुतस्य॥ तत्र विस्मयस्यानीयतत्वात्॥ तस्मात् शोकस्य स्थायितया शोकः स्थायिभावः॥ करुणाख्योऽतिरिक्तो रस इति॥ ननु रतिरेवास्तु॥ किं हास्येनेति चेत्तस्य कस्यास्तु व्यभिचारी॥ करुणरौद्रवीरभयानकबीभत्सानां तत्रानवकाशात्॥ नाद्भुतस्य॥ सतोऽपि विस्मयस्य तत्रास्थिरत्वात्॥ ॥
वेचनीयं॥ ननु सत्यैव रसाः॥ करुणाख्यो रसो मास्तु॥ तस्य करुणस्य वात्सल्यापरनाम्नो रत्याख्य

८

नन्वेवमिति॥ परत्र शृंगारे रक्तमत्वा स्थायित्वेनांगीकृतत्वात्तत्र करुणे व्यभिचारित्वेनावरूपकत्वा
त्॥ धर्मिकल्पनातः करुणरसकल्पनापेक्षया रतिभावे व्यभिचारित्वधर्मकल्पनाया लाघवादित्य
र्थः॥ करुणस्य तथास्वीकारे हेतुं दर्शयति॥ रतेरिति॥ रतेः शोक इति प्रागुक्तस्य विभावत्वस्य व्यभि
चारित्वकल्पनया नंगापत्तेरिति विभाक॥ रतेर्व्यभिचारित्वकल्पने विरोधमुद्भावयति॥ किंचेत्यादि॥

न शृंगारस्य॥ रतेः स्थायित्वापत्तेः॥ परंतु रत्यासमं हासस्य साकार्यं॥ ननु रतिहास्ययोरसंकी
र्णस्थायिभावात् पृथक्त्वं कुतः स्यादिति चेन्न॥ हेतोरसाधारण्यात्॥ असाधारण्यमत्र स्थायि
त्वम्॥ यथा रतेः सांकर्येपि स्थायिशोकादसाधारणात् करुणो भिद्यते॥ तथा तत्सांकर्येपि स्था
यिहासभावादसाधारणाद्धास्यं भिद्यते॥ चांतावप्येवमूह्यं॥ न च वात्सल्यादावपि असाधारण
हेतवः आर्द्रतादयः संति॥ तथा च तेषामपि रसापत्तिरिति वाच्यम्॥ आर्द्रतादीनामपि रतिला
त्॥ तस्याश्च तत्रासाधारणे शृंगाररसत्वापत्तिः॥ करुणाख्योऽतिरिक्तो रसो युक्त इति पर्यंतं मू
ले एव स्पष्टम्॥ एवं मग्रे हास्यादावपि योजनीयं॥ हास्ये विशेषमाह परं त्विति॥ संकर एव सा

कर्यं॥ चातुर्वर्ण्यादित्वात्स्वार्थे ष्यञ्॥ नन्विति॥ शांतावप्येवमिति पर्यंतं स्पष्टं ननु वीररौद्रयोर्विष
ये उत्साहक्रोधयोः सत्वात्तयोर्मध्येऽन्यतर एवास्त्वित्याशंक्य समाधत्ते॥ ॥ननूत्साहेति॥ ॥रसवि

ननु उत्साहक्रोधौ न यत्र तस्मान्न वीररौद्रयोरन्यतर एक एव वर्त्ततामिति चेन्न॥ स्थायिभेदेन भेदा
त् उत्साहवासना वीरे खुने रौद्रे॥ क्रोधवासना रौद्रे न तु वीरे॥ अनेन मन एव तत्र साक्षीति॥ यूनोः
ः परस्परं परिपूर्णः प्रमोदः शृंगारः॥ सम्यक्संपूर्णरतिभावो वा शृंगारः॥ यूनोरेकत्र प्रमोदस्य
रते वाधिकोऽन्यत्र न्यूनतायाव्यतिरेके परिपूर्त्तेरभावात् रसाभास इति॥ स च द्विविधः॥ संभोगो
विप्रलंभश्चेति॥ तत्र दर्शनस्पर्शनसंजापादिनिरितरेतरमनुभूयमानं सुखं॥ परस्परं संयो
गेनोत्पद्यमान आनंदो वा संभोगः॥ संभोगो बहिरिंद्रियसंबंधः॥ तस्य दैवतं विष्णुः॥ वर्णः
श्यामः॥ शेषं शृंगारलक्षणमाह॥ यूनोरिति॥ शृंगारद्वैविध्यमाह॥ संभोगेति॥ ॥

॥आद्योयथा॥ स्तंभेनेति॥ स्तंभेन जाड्येन मधुसूदनस्य रुक्मचाटुवचनानि प्रियवचनानि॥ यद्यपि चरुचाटुप्रियंवाक्यमित्यभिधानाद्वाटुनिकुर्वन्नपीत्यादिवक्ष्यादुराष्टमात्रप्रयोगेणेष्टसिद्धिस्तथापिकर्णावतंसादिवत्समाधेयं॥ तथा पयोधरगतः कुचगतः पाणिः करः जडतां निर्व्यापारतां॥ जगाम॥ परंतु लक्ष्म्याः पृथुवेपथुर्महान्कंपः नीवी॥ वसनग्रंथी॥ नी

॥यथा॥ ॥स्तंभेन चाटुवचनानि पराहतानि पाणिः पयोधरगतो जडतां जगाम॥ लक्ष्म्याः परंतु पृथुवेपथुरेव नीवीं विस्रंसयन्सुकृदन्मधुसूदनस्य॥ १॥ ॥ ॥

वी परिपणे ग्रंथोस्त्रीणां जघनवाससीति विश्वः॥ विस्रंसयन्॥ सुकृतमित्रमभूत॥ सुहृद्दुर्हृदौ मित्रामित्रयोरिति निपातनात्साधुः॥ अत्र राधामाधवयोः परस्परमालंबनत्वम्॥ स्तनादिरुद्दीपनं॥ वेपथुरनुभावः॥ जाड्यं व्यभिचारिभावः॥ एतैरत्र संभोगशृंगाराभिव्यक्तिः॥ वसंततिलकावृत्तम्॥ १॥ ॥८॥

द्वितीयोयथा॥ ॥निद्राणमिति॥ कांतेरुत्क्षेक्षणं॥ अत्यंतसंयोगे द्वितीया॥ निद्राणं लक्षणया मुकुलितं
॥ निपूर्वस्य द्रातेः कर्तरि क्तः॥ संयोगादेरातो धातोर्यण्वत इति निष्ठातस्य नः॥ रेषाभ्यामित्यद्भावा
येपि णत्वं॥ एवंभूतं वदनं मुखं॥ उन्नमय्य॥ ऊर्ध्वं कृत्वा॥ कुचयोरंतः अंतरालं ततस्पृशातीति त

निद्राणं क्षणमुन्नमय्य वदनं कांते कुचांतस्पृशि प्रस्तव्यस्त दुकूलदर्शितवलिप्रव्यक्तनाभिश्रियः॥
राधाया हर घूर्णदुत्पलदलद्रोणीमं दृक्कोहिमिर्दृक्कोणस्पंतरंगितैर्विरचितो दीर्घस्तुरेव स्मरः॥
॥२॥

योक्ते सति॥ स्रस्तं व्यस्तं यद्दुकूलं तेन दर्शिता या वलयस्ताभिः प्रव्यक्ता नाभिश्रीर्यस्याः॥ यद्वा दर्शित
वलि इति क्रियाविशेषणम्॥ तथाभूताया राधायाः दृक्कोणस्य नेत्रप्रांतस्य॥ दरमीषत्॥ ईषदर्थेत
द्व्यमित्यमरः॥ घूर्णत् यदुत्पलं तेन स्य दलानां या द्रोणी गर्तस्तस्या यो मदस्तस्य दोहिभिः सदृशैः मि
त्रैः शत्रुस्तातिसहोदराद्विहि

त्रासानां सहृदयार्त्वमित्यालंकारिकाः॥ तरंगितैः॥ गतागतैः॥ कत्ररितृतीया॥ स्मरः कामः दीर्घायुः चिरस्थायी विरचितः कृतः॥ घूर्णदित्यत्र यद्यपि घूर्णभ्रमणे इति धातुरात्मनेपदीत यापि तस्यानित्यत्वात् योषितामतिमदेन जूघूर्णुरितिमाघे प्रयोगदर्शनाच्च परस्मैपदम

देशानां समयानां नायकानां नायिकानां च भेदेन नायक योरवस्थाभेदेन बहवो भेदा रसमंजर्यां प्रदर्शिता इति॥

विरुद्धं॥ वस्तुतस्तु भ्वादिगणे पाठादात्मनेपदप्रयोगः अदादिगणेप्यस्य पाठात्परस्मैपद प्रयोगः तत्र उभयपदप्रयोगसिद्धिः॥ तेन घूर्णते दैपमर्चिरितियोषितामतिपदेन जुघूर्णु रितिचेतिमाघे प्रयोगद्वयमविरुद्धम्॥ विभावादयः स्पष्टाः॥ त्रार्दूलवार॥ ॥ ९८

८३

अथेति ॥ लीलेति ॥ योषितां स्त्रीणां लीलादयो दश विज्ञेया इत्यन्वयः ॥ सचेलादिस्त्रीणामित्यंतं सु
गमं ॥ नन्वेवमिति ॥ हावानाम् स्त्रीस्वभावत्वे सर्वदावस्थानमाशंक्य समाधत्ते ॥ उद्दीपकेत्यादि ॥ य

अथ हावलिख्यंते ॥ तत्र भरतः ॥ लीलाविलासो विछित्तिर्विभ्रमः किलकिंचितम् ॥ मोट्टायितं कुट्ट
मितं बिब्बोकं ललितं तथा ॥ विहृतं चेति विज्ञेया दश हावास्तु योषितां ॥ नारीणां शृंगारचेष्टा हावः ॥ स
च स्वभावजो नारीणामेव नन्वेवं यदि सदैव तासां तेकथं न भवंतिइति चेत्सत्यम् ॥ उद्दीपकान्व
यव्यतिरेकाभ्यां तासां हावाविर्भावतिरोभाव इति ॥ लीलाविलासविछित्तिविभ्रमललितानि शा
रीराणि ॥ मोट्टायितबिब्बिककुट्टमितविहृतानि आंतराणीति ॥ किलकिंचितमुभयसंकीर्णमि
ति ॥ प्रियभूषण वचनाद्यनुकृतिर्लीला ॥ तत्र विभावः सखीकौतुककलापः ॥ अनुभावः प्रियपरि हासः ॥
यद्वस्तुसत्वे यत्सत्वमन्वयः ॥ यदभावे वस्तुयदभावो व्यतिरेक इति तर्कप्रकारो द्वयो
र्लक्षणमुक्तं ॥ लीलेति ॥ लीलादि पंच शारीराणि मोट्टायितादि चत्वारि आंतराणि ॥ लीलामुदाहर
ति ॥

चंडांशाविति॥ चंडांशौ सूर्ये॥ चरमाद्रिमस्ताचलं चुंबतीति तथाभूते सति॥ सायंकाले जाते स
तीत्यर्थः॥ सुभ्रुवामन्यगोपिकानां मनो मानसं जिज्ञासितुं वेदितुं॥ न्येचल्कौतुकया॥ उत्पन्नकु
तूहलया॥ तया राधया॥ वंशीरवे विरचिते सति॥ कस्यैष निस्वनः शब्दः स्फूर्जति॥ स्फुरद्रू
पो भवति॥ यद्यपि स्फूर्जधातुर्वज्रनिर्घोषे प्रवर्त्तते तथापि धातूनामनेकार्थत्वादयमर्थः॥ इति

॥यथा॥ ॥चंडांशौ चरमाद्रिचुंबिनि मनो जिज्ञासितुं सुभ्रुवां न्येचल्कौतुकया तया विरचिते वंशीर
वे राधया॥ एषः स्फूर्जति कस्य निस्वन इति क्रोधात् व्रजन् काननं राधां वीक्ष्य लताप्रतानपिहि
तां स्मेरो हरिः पातु वः॥३॥ विचिंत्य क्रोधात्॥ क्रोधमाश्रित्य ल्यब्लोपे पंचमी॥ काननं प्रति॥ व्रज
न् गच्छन्॥ तया लताप्रतानैः॥ वल्लिकुटिलतंतुभिः पिहितामाच्छादितां॥ राधां वीक्ष्य दृष्ट्वा॥ स्म
यत इति स्मेरः नमिकम्पिस्म्यजसकमहिंसदीपो र इति रप्रत्ययः॥ हरिः कृष्णः पातु॥ गोपिकासु कौ
तुकं विभावः॥ प्रियपरिहासोऽनुभावः॥ अत्र नेहानुक्तेर्निश्चयोऽत्र रसः संशयालंकारः॥ तदुक्तं॥

८४

काव्यप्रकाशे ॥ स संदेहस्तु भेदोक्तौ तदनुक्तौ तु संशय इति ॥ श्लो ६० ॥ ३ ॥ विलासमुदाहरति
॥ कूजंती शब्दायमाना कांची रशना यस्यां क्रियायां ॥ ईषत्स्फुरत् वलितं दंत यस्यां तेषां भू
ताभ्केवल्ली यस्यां क्रियायां ॥ वेल्लन्त्वं चलत्वं पुर्यस्यां तस्यां ॥ वल्लाती चपला कुंडलकां निर्यत्र
गमननयनवदनभ्रूप्रभृतीनां यः कश्चिदुत्पद्यते विशेषः स विलासः ॥ अत्र विभावाः प्रिय
दर्शनिस्मरणादयः ॥ अनुभावा अभिलाषवैदग्ध्यसंकेतप्रकाशप्रीतिप्रकटनादयः ॥ य
ष्या ॥ कूजत्कांचि ईषत्स्फुरद्वलितदंत भ्रूवल्लिवेल्लद्वपुर्वल्गत्कुंडलकांतिसाचिवलि
तग्रीवं लपत्याः वचः ॥
क्रियायामिति ॥ तथा साचिवक्रं वलिता कृता ग्रीवा यत्रेति ॥ पंचै
तानि क्रियाविशेषणानि ॥ वचः वचनं ॥ लपत्याः भाषमाणयाः ॥ वरतनोः ॥ नायिकायाः ॥

प्रातः प्रभाते निर्वृतिं वायुनेत्यर्थ लिभ्यंयत्पुंडरीकंमुत्पलं ॥ पुंडरीकंसितांभोजमित्यमरस्त
याप्यत्रसरोजसामान्येलक्षणा ॥ वेदभाष्ये पुंडरीकत्राशेमर्कटगुहवाचकइत्युक्तंतदिहर
सानुगुणत्वान्नगृह्यते ॥ तस्य परिषत्सभासमूह इतियावत् ॥ तस्यायत्तांडित्यं चातुर्य
लालित्यमितियावत् ॥ तस्य पाटच्चरी ॥ दस्युः पाटच्चरः स्तेन इत्यमरः ॥ दृष्टिः यउहित्रपवक्रा

प्रातर्निर्वृतपुंडरीकपरिषत्पांडित्यपाटच्चरी दृष्टिर्यत्प्रतिजा
यते वरतनोर्वक्त्रा सदाक्राधिकः ॥ ४ ॥ ॥ ७ ॥ ॥ १ ॥

त्रपवक्त्रापांगप्रसारिणी जायते भवति ॥ स पुरुषः शताक्राधिकः इंशदप्यधिक इत्यर्थः ॥ वि
भावादयः स्वयमूह्याः ॥ खंडितायाएतेविलासाइतिबोध्यं ॥ तातेऽन्यासंगविन्नतेखंडि
तेप्यर्थकिंषायितेतितेह्नलक्षणात् ॥ अत्रेदमाकूतम् ॥ खंडितोदाहरणेप्रातःकालवाचिरा
ह्रप्रयोगःकलहांतरितोदाहरणेतुनेतिभेदोऽवगंतव्यः ॥ उदाहरण ॥ ७ ॥

८५

विछित्तिमुदा०॥ केयूरमिति॥ अस्याइतिशेषः अस्यानायिकायाः करेपाणौ केयूरमंगदंनास्ति॥ एव
मग्रेप्यस्तीत्यध्याहारः॥ पदेचरणे॥ हिरण्मयंवलयं॥ स्यात्कोशश्चहिरण्यंचहेमरूप्येकृताकृते
इत्यभिधानाद्रूप्यमयमितियावत्॥ नूपुरमित्यर्थः॥ कटकोऽस्त्रियामित्यमरः॥ ना
स्ति॥ पुनःसमुच्चये॥ मौलौशिरसि॥ माल्यं॥ माला माल्यं सौमनस्यमित्यमरः॥ नास्तित

कतिपयभूषणविन्यासोविछित्तिः॥ तत्रविभावाः॥ सौकुमार्यप्रियसौभाग्यसौंदर्यगर्वक्रो
धलेशाभ्रकोशादयः॥ अनुभावाः गर्वमानादयो॥ यथा॥ मंजीरंनपदेकरेनकटकं
मौलौनमालांपुनःकस्तूरीतिलकंतथापितनुतेसंसारसाराश्रियं॥ ॥ ॥ब॥ ॥

यापिसौंदर्यगर्वेणभूषणेष्वनादरात्केयूरादीनामभावेपीत्यर्थः॥ कस्तूरीतिलकंमृगमद
चंद्रकः॥ त्रैलोक्येसारांश्रेष्ठां॥ श्रियंशोभांतनुतेकरोति॥ अत्रोत्प्रेक्षते॥ यद्यस्मात्ब्रह्म
णासुभ्रुवः॥ अस्यानायिकायाः भालफलकेललाटपट्टे॥ ॥ब॥ ॥१

सवधिकं सर्वोत्कृष्टत्वं॥ अलेखि। लिखितं॥ लिखतेः कर्मणि चिण् चिणो लुगिति तस्य लुक्
॥ तस्मात्तत्राल फलके॥ मन्मथमहीपालेन॥ कंदर्पेण राज्ञा॥ मुद्रा कृता किमु॥ इति वयं
जातीमः संभावयामः॥ अन्यथेतरनृपाणां तत्रावस्थानस्याप्यभावप्रसक्तेरिति भावः॥ वस्तु
तस्तु सौभाग्यलक्षणत्वेनापरिहार्ये तस्मिन्काममुद्रोत्प्रेक्षा॥ सा च काममहीपालत्वारो
॥ सवधिकमलेखि भाल फलके यद्वेधसा सुभ्रुवो जानीमः किमु मन्मथेन जगतीपाले
न मुद्रा कृता ५
पाद्रूपकानुप्राणितेत्यनयोरंगांगीभावसंकरः॥ सर्वाधिरूपफलकारणा
भावनिबंधनाद्विभावनाभेदः॥ हेतूनामसमग्रत्वे कार्योत्पत्तिश्च सा मतेति तल्लक्षणा
त॥ इत्यनयोः संसृष्टिः॥ अत्र सौरभ्यगर्वो विभावः तत्प्रकाशनमनुभावः॥ उभावप्यतो
गम्यमानावित्यवधेयं॥ शा॰ वि॰॥ ५॥॥

173

विभ्रमस्तु॥ ॥त्यक्तमिति॥ केलिविधौसुरतव्यापारेत्यक्तंहरेरंशुकं॥ त्यक्ते इतिपाठेसुरतव्यापा
रेत्यक्तेसतीतियोजना॥ पीतांबरस्यविष्णोःअंशुकंचैलंनिजांशुकधिया॥स्वंशुकंदत्यर्थः॥
परिधायधृत्वाप्रातःप्रभाते॥ पद्मभवनात्॥ पद्मारव्यनर्मसदनात्॥ नर्मसदनादितिपाठांत
रं॥ बहिःप्रांगणे॥ प्रयांत्याःनिःसृतायाःपद्मायाःलक्ष्म्याःलक्ष्मीःपद्मालयापद्मापद्महस्ता
वस्त्राणांभूषणानांस्थानविपर्यासोविभ्रमः॥ विनाबाधनमहरागोत्कंठयोःअनुभावाः
प्रियसख्याद्युपहासादयः॥ यथा॥ त्यक्तेकेलिविधौनिजांशुकधियापीतांबरस्यांशुकं
पद्मायाःपरिधायसद्मशयनात्प्रातःप्रयांत्याबहिः॥ हरिप्रियेत्यमरः॥ संबधिवस
नांचलंचैलांचलं॥ चपलयन्॥ चंचलंकुर्वन्॥ तत्करोतितदाचष्टेइतिणिजंतात्शतृप्रत्य
यः॥ तथाहग्भ्यांदृष्ट्या॥ कोपक्रोधामिनयंहर्षयन्॥ वाचावाण्या॥ उभयत्रापिकरणेतृ
तीया॥ कौतुकंकुतूहलंआचरन्॥ तथास्मितसुधयाहास्यामृतेनस्निग्धोहरिरस्तुतः॥ नः

आश्लिष्टो ॥ अत्र गम्यमान मदो विभावः हासोऽनुभावः ॥ भ्रांतिमदलंकारः ॥ श्रा॥ ६०६ ॥ किलकिंचितमुदाहरति ॥ तल्लक्षणमाह ॥ श्रमेति ॥ प्राज्ञैर्बुधैः श्रमाभिलाषगर्वाणां ॥ तथा स्मितहर्षभयक्रुधां ॥ असकृत्त्वरुक्त्वाः ॥ संकरो मिश्रीभावः किलकिंचितं विज्ञेयं ॥ किलअलीकं किंचित

आहांतुं वसनांचलं च पलयन् कोपं दृशा दर्शयन् वाचा कौतुकमाचरन् स्मितसुधास्निग्धो हरिः पातु नः ॥ ६ ॥ श्रमाभिलाषगर्वस्मितहर्षभयक्रोधानां संकरः किंचितम् ॥ तदाह ॥ श्रमाभिलाषगर्वाणां स्मितहर्षभयक्रुधाम् ॥ असकृत्संकरः प्राज्ञैर्विज्ञेयं किलकिंचितम् ॥ अत्र विभावः नवयौवनोद्रेकचापलादयोऽनुभावाः ॥ कर्तव्यानिर्धारणादयो यथा ॥ ॥ कस्ताम्यं चितं व्याजं किलकिंचितं नानाचेष्टितमिति श्रीरस्वामीनाक्रोधास्कहर्षनीत्याहेः संकरः किलकिंचितमित्यत्र व्यातमिति दिक् ॥ ॥

कोदंडमिति। कोदंडं धनुः चंडिमाणं॥ विक्रिमाणं॥ आरोहति॥ कोदंडत्वेनाध्यवसितं कमंडलुं कुतो वक्रीभ
वतीति सख्याः प्रश्नः॥ परांगनोपभोगचिह्नावलोकनजन्माराधायाः क्रोधोऽभिव्यज्यते किंच मधुव्रतो
भ्रमरः॥ श्रोणिमानं रक्ततां कांक्षति॥ निजहेलनजन्यदुःखजन्याश्रुशउभविव्यज्यते॥ किंच पद्मम्मु
खकमलं वेपमानं कंपमानं सत्सुधां स्मितजलक्षणमृतं॥ वर्षति॥ स्वगृहागमनात् हर्षोत्पत्त्ये रिति
॥ यथा॥ ॥ कोदंडमारोहति चंडिमानं मधुव्रतः कांक्षति श्रोणिमानं॥ पद्मं सुधां वर्षति वेपमानं स्व
र्णाचलः स्विद्यति किं निदानं॥ ७॥
भावः॥ किंच स्वर्णाचलः कुचमंडलरूपः स्विद्यति चलति॥ मद्भूनं
गाढ़ दर्शमात्रस्यापि केधः स्यादिति शंकया कुचकंपइति भावः॥ हे सखि अत्रैस्सर्वोक्तिविषये किं
निदानं को हेतुः॥ अत्र गम्यमानान्योपभोगजन्यासूयाविभावः॥ परुषोक्तिभाषणोत्कंगतुभावः
॥ अत्र रूपकातिशयोक्तिः॥ इंद्रवज्रावृत्तम्॥ ७॥ ॥ ७॥ ॥ १ ॥ ॥ ॥

उदाहरणांतरमाह॥ ॥क्रोधागारेति॥ ॥क्रोध एवागारं गृहं तस्मात्समुत्थिताः प्रसृताः॥ तथा समभ्यु
दयता संत्रासरूपेण तेजेन॥ अर्दिता विलिप्ताः॥ तथा व्रीडाभिर्लज्जारूपाभिर्युवतीभिः परिमर्दि
ताः॥ तथा स्मितसुधाधाराभिः॥ हास्यामृतवृष्टिः॥ उद्वर्त्तिताः॥ उभयत्रापि कर्त्तरि तृतीया तथा स्ने
हजलैः प्रीतिरूपोदकैः कृत्वा॥ स्नाताः अत्राकर्मकत्वात्कर्त्तरि क्तः॥ तथा मनोभवस्य कामस्य यशः
कलाः शिल्पं तद्रूपाभिर्मालाभिः पुष्पस्रग्भिः आभूषिताः॥ प्रसाधिताः॥ णिजंतात्कर्मणि क्तः॥

क्रोधागारसमुत्थिताः समुद्यन्संत्रासतेजार्दिताः व्रीडाभिः परिमर्दिताः स्मितसुधाधाराभिरु
द्वर्त्तिताः॥ स्नाताः स्नेहरसैर्मनोभवकलामालाभिराभूषिताः पायासुर्मयि शैलराजदुहितुः स्फी
ताः कटाक्षच्छटाः॥ ८॥ कलास्यान्मूलरैवृद्धो शिल्पादावंशमात्रके षोडशांशेऽपि चंद्रस्येति विश्वः
एतादृशरूपः शैलराजदुहितुः पार्वत्याः कटाक्षच्छटाः अपांगावलोकनपरंपराः॥ मयि मद्विषये
स्फीताः पुष्टाः सत्यः पायासुः आशिषि लिङ्॥ विभावानुभावौ मूल एव स्पष्टौ॥ अत्र तत्तद्विशेष
णमहिम्ना नायिकाप्रतीतेः समासोक्तिश्चाहूं०॥८॥ ॥९

मोट्टायितलक्षणमाह॥ वार्त्तेति। मोट्टायितं प्रियं स्मृत्वा सांगभंगं विजृंभणमिति॥ मुटमर्दने इति श्री
रस्वामी। मोट्टायितमुदाहरति॥ न स्नेहेति॥ ॥राधास्नेहस्य प्रेम्णः॥ कथारसः स्वेत्स्रुपमित समास्रु॥
सुधारससहदृशां कथामित्यर्थः॥ कथमपि॥ गौरवेण॥ कथमपीति तयाप्यंतर्य गौरवबाढयोरिति
वैजयंती। श्रोतुं न समुत्कं वर्तेने इते॥ तर्हि किं करोती त्यत्राह। किंत्विति। विकीर्णरत्नकपटात्॥ त्रु
टितहाररत्नव्याजात्॥ तत्कपटं कृत्वा॥ ल्यब्लोपे पंचमी। सौधान्निजसदनात्। बहिः आगत्य। व
वार्त्ताविमुखे सति निभृतनृयोः रचनिस्पृहामोट्टायितम्॥ अत्र विभावाः सपत्नीत्रासलोकत्रास
लज्जादयः॥ अनुभावा मनः प्रेमकथनसंकेतनिवेदनोरथयः॥ यथा॥ न स्नेहस्य कथारसं
कथमपि श्रोतुं समुत्कवते राधा किंतु विकीर्णरत्नकपटादागत्य सौधाद्बहिः॥ नृत्यन्नेत्रपुटी
स्फुरत्कुचतटी स्वेदोद्भ्रसद्दोस्तटी व्यावल्गद्भृकुटी स्खलत्परिमुरुः कृष्णांतिके भ्राम्यति॥ (७)
हिः प्रदेशान्निर्गत्येत्यर्थः॥ नृत्यंती नेत्रपुटी यस्यां क्रियायामिति॥ स्फुरंती कुचतटी यस्यामिति॥ स्वे
देन घर्मोदकेन उद्भ्रसंती शोभमाना दोस्तटी हस्तप्रदेशो यस्यामिति॥ व्यावल्गंती चंचला भ्रुकुटी
यस्यामिति॥ स्खलंती भ्रश्यंती पटीशाटी यस्यामिति। पंचैतानि क्रियाविशेषणानि॥ पुनर्वारंवा

विभावानुभावौमूलएवस्पष्टौ॥ग्रा६॥९॥ ॥कुट्टमितलक्षणमाह॥सुखेति॥कुट्टछेदनादीतेनमितं
कुट्टमितं॥उःखोपचारःसोख्येपिहर्षात्कुट्टमितमतमितिसीरस्वामी॥तदुदाहरति॥रोद्धुमिति॥मु
तनोःकामिन्याःगाढाश्लेषेदृढालिंगनेविषये॥रोद्धुंनिषेद्धुं॥पाणिर्हस्तःप्रचलतिप्रसरति॥उःखलो
पचारसूचिकार्येचेष्टा॥किंचचिरात्चिरकालं॥असौअंगुलिर्निश्चलावर्त्ततइतिशेषः॥सुखसूचि

उःखेसुखचेष्टाकुट्टमितं॥अत्रविभावाः॥रागोत्कंठाग्रदर्शनकरजक्षतकुंतलाधरग्रहादयः॥
अनुभावाः॥कपटकायसंकोचकपटसीत्कारादयः॥यथा॥रोद्धुंपाणिःप्रचलतिचिरादंगु
लिर्निश्चलासौभ्रूविक्षेपोभवतिकुटिलोनेत्रमंतःप्रसन्नम्॥गाढाश्लेषेभवतिसुतनोरर्ध
मात्रोनकारःकंपोमूर्धःप्रसरतिमुखंसंमुखंचप्रयाति॥१०॥ कौचेष्टेयं॥एवमग्रेपिद्विर्वि
धंबोध्यं॥भ्रूविक्षेपोभ्रूभंगःकुटिलोभवति॥नेत्रंतुअंतःप्रगल्भंप्रसन्नं॥मूर्धःमस्तकस्यकं
पोधूननं॥प्रसरतिप्रवर्त्तते॥चपरंमुखमास्यंसमुखंअभिमुखंप्रयाति॥एवमितिशेषः॥अने
नप्रकारेणनकारोनिषेधः॥अर्द्धएवार्द्धमात्रोभवति॥अर्द्धमात्राउच्चारणकालविशेषोयस्येति

वा॥ विभावानुभावौ मूल एव स्पष्टौ॥ स्वभावोक्तिरलंकारः॥ मंदाक्रांता वृत्तं॥ १०॥ बिब्बोकलक्षणमाह॥
गर्वेति॥ विपक्षेपे॥ विपर्यस्य वुक्ततेवा॥ अपभ्रंशो बिब्बोको ऽभिमतप्राप्तावपि गर्वादिनादर इति स्वा
मी॥ उदाहरणमाह॥ कृतांजलिरिति॥ कृतो बद्धोऽञ्जलिर्येन निःसप्रणत इत्यर्थः॥ तथा कातरो दीनो
हक्कनिपातो यस्य स तथाभूतः प्राणेश्वरः कांतः पार्श्वं स्त्रीसमीपं॥ उपाजगाम प्रपेदे॥ प्रातः समये

गर्वाभिमानसंभूतो विकारो नादरात्मको बिब्बोकः॥ अत्र विभावा यौवनमदकुलमदधनमदप्रिया
पराधादयः॥ अनुभावा अवहित्थ्य दुर्वचनप्रेक्षणादयः॥ यथा॥ कृतांजलिः कातरहक्निपातः प्राणे
श्वरः पार्श्वमुपाजगाम॥ सखीमुखे कुंडलरत्नलेखामेषा पुनः प्रेक्षितुमाचकांक्ष॥ ११॥ ॥

तिशेषः॥ एषा पुनः॥ नायिका तु सखीमुखे॥ स्वकांतमुक्त्वा कामिनीवदने कुंडलरत्नसारे खातं
॥ चिह्नभूतामित्यर्थः॥ प्रेक्षितुं॥ वीक्षितुं॥ आचकांक्ष चकमे॥ अत्र प्रियापराधो विभावः॥ निजां
तिकागतकांतोपेक्षानुभावः॥ खंडिता चेयं नायिका॥ इंद्रवज्रावृत्तम्॥ ११॥ ललितलक्षण
माह॥

सकलांगेति॥ अनाचार्योपदिष्टंस्यात्कलितं रतिकूजितमिति॥ तदुदाहरति॥ कलक्वणितेति॥
कमलेक्षणा॥ काचिन्नायिका॥ कलं यथा तथा॥ क्वणिता मेखला यस्यां क्रियायामिति तथाभू
त॥ चपलः चारुः नेत्रांचलो नेत्रप्रांतो यस्या मिति तथाभूतं॥ प्रसन्नमुखमंडलं यस्याः क्रियाया
मिति॥ तथा श्रवणयोः कर्णयोः संचरंती चंचले कुंडले यस्या मिति॥ संचलदिति पाठः॥ स्फु

सकलांगसमीचीनविन्यासो ललितम्॥ अत्रैव स्मितादयोंतर्भवंति॥ तत्र विभावा मनः
प्रसादप्रियतमदृष्टानुरागधीरत्वादयः॥ अनुभावाः प्रियवशीकरणलोकानुरागचम
त्कारादयः॥ यथा॥ कलक्वणितमेखलं चपलचारुनेत्रांचलं प्रसन्नमुखमंडलं श्रवणसं
चरत्कुंडलं॥ स्फुरत्पुलकबंधुरं लपितशोनमानाधरं विहस्य कमलेक्षणा व्रजति कस्य के
लिगृहं
रत्पुलकैः बंधुरं सुंदरं यथा स्यात्तथाभूतं॥ लपितेन भाषणेन शोनमानः अधरो यस्याः क्रि
यायामिति षट्क्रियाविशेषणानि॥ विहस्य स्मितं कृत्वा॥ कस्य धन्यस्य कस्यचिदित्यर्थः॥ केलि
गृहं विलाससदनं प्रतिव्रजति गच्छति॥ अत्र प्रियतमं प्रति दृष्टानुरागो विभावः॥ प्रियावशीकरण॥

विरुतलक्षणमाह ॥ प्रियसन्निधेति ॥ अवसरागतवचनं व्याजादिना विशेषेण कृतं विरुतं ॥ वक्तव्या
भाषणं व्याजात् विरुतं दर्शितेर्दुहृत्तमिति स्वामी ॥ तत्र व्याजात् लज्जया चेति द्वे विध्येनोदाहरति । अभि
लषतीति । चंद्रचूडे शिवे कपोले वार्वती ललाटे तिलकपत्ररचनं विधातुं कर्तुं ॥ अभिषति इच्छा
ति सति । गंगोपभोगचिह्नदर्शनजन्यक्रोधापनोदेन विष्पतीति धिया शिवस्य पार्वती भाले पत्ररचने

प्रियसन्निधावभिलाषपरिहृत्तिर्विरुतम् ॥ अत्र व्याजलज्जादयो विभावाः ॥ अनुभावा अन्यथा चे
ष्टितान्यथा व्यवहारादयः ॥ व्याजाद्यथा ॥ अभिलषति कपोले चंद्रचूडे विधातुं तिलकमुदयद
तःकोपभाजा भवान्या ॥ फणिपतिभयकूटादंगमुत्कंपयंत्या प्रचलवसनवाते विघ्नितः केलि

दी प: १३

जातेति भावः ॥ उदयतयोतः कोपः सपत्नीसंभोगचिह्नदर्शनजन्यक्रोधस्तेन
भजतीति तया भवान्या पार्वत्या कर्त्र्या ॥ फणिपतेः शेषात् पन्नयंतस्य युत्कूटमिषं तस्मात् ॥ त
द्वयं निमित्तं कृत्वेत्यर्थः ॥ ल्यब्लोपे पंचमी ॥ माया निश्चलयंत्रेषु कैतवानृतराशिषु ॥ अ
योघने शैलशृंगसीरांगे कूटमस्त्रियामित्यमरः ॥ अंगमुत्कंपयंत्या ॥ भयसूचिकान्येयं चेष्टा ॥

प्रचलं यद्वसनं वस्त्रं तस्य वाताः वायवस्तैः कृत्वा ॥ केलिदीपाः संभोगोपयोगिनः प्रदीपाः ॥ विघ्नः सं
जातो येषामिति विघ्निताः ॥ नाशवंतः ॥ कृता इत्यर्थः ॥ तारकादित्वादितच् ॥ अत्र नयव्याजरूपो वि
भावः ॥ दीपनाशकरणचेष्टानुभावः ॥ मालिनी वृत्तम् ॥ १३ ॥ ॥ लज्जातउदाहरति ॥ ॥ आनंदे
ति ॥ ॥ त्वं आनंदभाजः अशेषानंदसेविनः ॥ यदुनंदनस्य कृष्णस्य ॥ करस्य पयोधरं प्रतिप्रस्ता

लज्जातो यथा ॥ ॥ आनंदभाजो यदुनंदनस्य करावरोधं न करेण कुर्याः ॥
सखीजल्पंतीमिति संजघान चकोरनेत्रा चुलकोदकेन ॥ १४ ॥ ॥

रितस्य ॥ अवरोधो निवारणं करेण स्वहस्तेन कृत्वा न कुर्याः ॥ मा कुरु ॥ प्रार्थनायां लिङ् ॥ च
कोरनेत्रा खंजननयना राधा ॥ इत्यनेन प्रकारेण भाषमाणां सखीं ॥ चुलुकोदकेन अंजल्युद
केन ॥ संजघान ताडयामास ॥ अत्र लज्जा विभावः ॥ ताडनमनुभावः ॥ उदाहरणद्वयेपि प्रिय
सन्निधावप्यभिलाषापरिहृत्तिरूपं विकृतमित्यवधेयं ॥ स्वभावोक्तिरलंकारः इंद्रवज्रा वृत्तम् ॥

१८

विप्रलंभलक्षणमाह॥ यूनोरिति॥ पुमान्स्त्रियेत्येकशेषः॥ नन्विति॥ विप्रयुक्तैवेत्यर्थः॥ तर्हि अश्रुपाताद
यः कथं न भवंतीत्यत्राह॥ अविरहदर्शनेति॥ विप्रलंभस्य पंच भेदानाह॥ देशांतरेति॥ अन्यान्यपि च न भेदा
नाइ समयेति॥ उद्देशक्रमेणोदाहरणानि॥ देशांतरगमनस्योदाहरणमाह॥ प्रस्थानायेति॥ प्रियतमेन
त्वरि प्रस्थानाय देशांतरगमनाय॥ कृतोद्यमे कृतादरे सति॥ वामे सुंदरे भ्रुवौ यस्याः वामभ्रुवः सुंदर्याः॥

यूनोरन्योन्यमुदितानां पंचेंद्रियाणां संबंधाभावो नाभीष्टप्राप्तिर्वा विप्रलंभः॥ नच मानात्मकेति व्याप्तिः॥
मुदितपंचेंद्रियसंबंधाभावरूपस्य विशिष्टाभावस्य तत्रापि सत्वात्॥ तदानीं यूनो रिंद्रियाणामुदित
त्वात्॥ ननु प्रियमभिसर्तुं या गच्छति सापि विप्रयुक्ता न वेति चेत् सत्यम्॥ सापि विप्रयुक्तैव॥ अवि
रहदर्शनप्रसादात्॥ प्रमोदेन विरहधर्मस्याश्रुपातादेरसंभवदिति॥ सेच विप्रलंभः पंचधा॥ देशांतरग
मनात् गुरुनिदेशाद्भिलाषादीर्ष्यातः शापाच्चेति॥ समयमहं दैवात् हूलादित्यादयोप्युन्नेयाः॥ देशांतरग
माह यथा॥ वामं सव्यप्रतीपे च दक्षिणे चातिसुंदरे इति विश्वः॥ होः कंकणेन हस्तवलयेन॥ दोर्ग्रहणं तत्र
हृदतरस्थितिसूचनार्थं॥ जातित्वादेकवचनम्॥ प्रस्थानवलयैः कृतमित्यत्र तु व्यक्त्यपेक्षया बहुत्वं॥ च्यु
तसत्वजिजितं॥ भावे क्तः॥ धैर्येण स्खलितं॥ च्युतमित्यर्थः॥ तथा महेन अवलेपेन गलितम्॥ ॥१८

रस॰रं॰गी॰टी॰
९२

तरंग॰६

तयानेत्रांभसा अश्रुधारया निःसृतम्॥ किंच शिवशिवेति खेदे॥ संभ्रमद्योतनाय द्वित्वं॥ चादीनामारु
तिगणत्वात्तद्ग्रहणेनैव ग्रहणमस्याः॥ गीतगोविन्दे हरिहरिहतादरतयेत्यत्र व्याख्यातं चैतत्तद्व्याख्यातृभि
रितिबोध्यम्॥ पिपासुना निस्सरणेच्छुना॥ अशोकायां सम्बन्धव्यतिसत्वात्यय॥ जीवेनापि प्राणे
नापि॥ कंपेनांदोलितायाः किंकिण्याः क्षुद्रघण्टिकायाः कलरवो मधुरशब्दस्तस्य व्याजेन मिषेण॥ आं
दोलनचलनमिति लौकिकाधातोः कर्मणि क्तः॥ वैन्यस्य वेनपुत्रस्य पृथोः स्मृतिः स्मरणमारंभि॥

"जीवेनापि पिपासुना शिवशिव प्रारंभि वामभ्रुवः कंपांदोलितकिंकिणीकलरवव्याजेन विन्यस्यति॥२५

आरब्धा॥ प्रयाणे पृथ्वादीनां स्मृतिः शुभहेति भावः॥ तथा चोक्तम्॥ वैन्यं पृथुं हैहयमर्जुनं
च शाकुंतलेयं भरतं नलं च॥ रामं च यो यः स्मरति प्रयाणे तस्यार्थलाभो विजयश्च हस्ते इति॥ अत्र प्रि
यप्रयाणे नायिकायाः कार्श्यं जातमिति विवक्षिते कंकणादीनां च्युतिस्खलनादि रूपकार्य निबं
धनाद्प्रस्तुतप्रशंसा नेदं कैतवापह्नुतिश्च॥ चाढुः॥ २५॥

मू॰१ ॥प्रस्य॥ नायकस्तोद्य मे प्रियतमे प्रियतमे दोःकंकणेन च्युतं धैर्येण स्खलितं मे हन्त गलितं नेत्रांबुसानि
स्रतं॥

पुनर्ग्रंथकारतातकृतश्लोकोदाहरणमाह॥ वीणामिति॥ सरसिजदृशा नायिकया सखी प्रार्थनाभिः सखीनर्मोक्तिभिः॥ करणे तृतीया॥ कथमपि महता ता प्रयत्नेन नतु सा हेनेत्यर्थः॥ वीणामंके उत्संगे निधाय कृत्वा॥ स्वैरं स्वैरं मंदं मंदं॥ प्रकीर्णविसा॥ स्वादेरेरिणेरितिवक्तव्यात् वृद्धिः॥ गातुं आरब्धमेव॥ किंच मूर्छना संगीतस्वरावयवविशेषः॥ मूर्छनेत्युच्यते ग्रामस्वरावयलक्षणेतितल्लक्षणात्॥ अवस्या विशेषश्च॥ किमपि किंचित्॥ तंत्रीबुध्यातती भ्रांत्या॥ क्षीणादीनां अंगवाद्धीयस्याः सा तया स्तू॥ यथा॥ वातातचरणा नाम। वीणामंके कथमपि सखीप्रार्थनाभिर्निधाय स्वैरं स्वैरं सरसिजदृशा गातुमारब्धमेव॥ तंत्रीबुध्या किमपि विरहक्षीणदीनांगवृद्धी मे नामे च स्पृशतीति बहूक्ता मूर्छना चित्रमेतत्॥ १६॥ गुरुनिदेशाद्यथा॥ भास्वान्न चूततरु गुरुर्मसिजः को प्ये षट्पदगस्तमोमेदोगंधावहः सितो मलयजो दोषाकरो माधवः॥ तां एनामेव॥ नायिकामेव॥ बहूक्ता अत्यंतं॥ स्पृशतीति॥ आश्रयति॥ एतच्चित्रं आश्चर्यं भाति॥ वाक्यार्थः कृत्वा॥ देशांतरप्रस्थितस्यापि यस्या वियोगात् दृढरूपवस्या तस्या जाजाता तिभावः परिकरसंकीर्णकाव्यलिंगम्॥ कविकल्पितत्वात्स्फस्यापिता संग

रस·रंगनी·
९३

तरंग ६

तिश्च॥एषां संकरः॥मन्दाक्रांतावृत्तम्॥१६॥गुरुनिदेशहेतुकस्योदाहरणमाह॥भास्वानिति॥चूत
तरुः आम्रवृक्षः॥आम्रश्चूतो रसालोसावित्यमरः॥भास्वान् देदीप्यमानः सूर्यश्च॥ वसंतिऽति
चोषः॥मनसिजातो मनसिजः॥कामः॥सप्तम्यां जनेर्डइतिड प्रत्ययः॥गुरुः महान् अनुल्लंघ्य
इत्यर्थः॥बृहस्पतिश्च॥कोप्यतिसुंदरः एष मंगोत्यमरः॥तमः॥तमस्समिश्रः॥अतिकृष्णवर्ण
इत्यर्थः॥राहुश्च॥वहतीतिवहः पचाद्यच्॥गंधस्य वहः गंधवहो वायुः॥मंदः॥अल्पः शनैश्चरश्च
॥मंदः शनैश्चरे मूर्खे चाल्पतंत्ररोगपीडिते इत्यमरः॥मलयजः चंदनलेपः॥चंदनवृक्षवाचिनाम

अंगारो नवपल्लवः परभृतो विज्ञो गुरो राज्ञया नियतोसि विचारितः कथममी क्रूरास्त्वया नग्रहाः
॥१७॥

लयजशब्देन कृतचंदनलेपलक्षणा॥सितः शुभ्रः शुभ्रस्वरूपत्वादिति भावः शुक्रश्च॥त
यामा घवो वसंतः॥दोषाणां विरहिणीप्राणहरणादिरूपाणां आकरः खनिरूपः॥चंद्रश्च॥तथा नव
पल्लवो नवांकुरः॥अंगारः॥अग्निस्फुलिंगो मंगलश्च॥परभृतः कोकिलः विज्ञः पचमोदंचननिपु
ण इत्यर्थः॥बुधश्च॥अत्र सर्वत्र क्रियाध्याहारः॥त्वया अमी सूर्यादयो ग्रहाः क्रूराः कथं न विचारिताः
विषयविषयिणोरभेदोपचारात् क्रूरत्वं बोध्यम्॥अत्र भास्वानिति श्लिष्टगु णानां सूर्यादीनां कवि

९३

१८७

नापुनर्ग्रहपदोपादानेन॥ विकृतत्वात् विवृतोक्तिरलंकारः॥ विवृतोक्तिः श्लिष्टगुप्तं कविना विकृतं यदीति लक्षणात्॥ गुणीभूतव्यंगत्वादस्य मध्यमकाव्यत्वम्॥ शार्दूल०॥ १७॥ ॥अभिलाषहेतुकस्योदाहरणमाह ॥आगारेति॥ ॥मुखं आस्य॥ आगाराभिमुख॥ निवासग्रहसन्मुखं॥ निवासग्रहसन्मुख॥ स्वपतोः कुर्वतोः॥ विघारगारमागारम पग्रामापगामपि॥ अराति मा रातिमयोअम आम स्वकीर्तिति इतिशब्द भेदप्रकारो॥ वक्रीकृतेग्रीवेयाभ्यां तौ तथाभूतयोः व्यस्तमनोऽन्यवे परीत्येन धृतमित्यर्थः॥ चोलं वसनं

अभिलाषाद्यथा॥ ॥आगाराभिमुखं मुखं रच यतोर्वक्रीकृतग्रीवयोर्व्यस्तचोलमजानतोः क्वचिदपि व्याजात्पुनस्तिष्टतोः॥ मार्गविस्मरतोः क्वचित्क्वचिदपि लक्षाक्षरं जल्पतोः साचिप्रेक्षितमावयोर्यदभवद्भूयस्तदाशास्महे॥ १८॥ अजानतोः॥ अपिच क्वचित् व्याजान्मिषात् पुनः अप्रयमंतिष्टतोः॥ क्वचित्कुंजादिषु मार्गविस्मरतोः॥ तथाच क्वचित्॥ अपिश्चार्थे॥ त्यक्ताक्षरं गजिताक्षरं यथा तथा जल्पतोर्वदतोः॥ आवयोः स्त्रीपुंसयोः॥ साचिप्रक्षितं यस्यां क्रियायामिति॥ यत् अभवत्॥ प्रियप्रस्यनास्मूर्वं यदासीत्॥ तत्तन्मयः॥ अत्यंतं॥ आशास्महे॥ वांछामहे॥ आङः॥ शासुरिच्छायामित्यात्मनेपदम्॥ शार्दूल॥ १८॥ ॥ईर्षाहेतुकमुदाहरति॥ ॥प्राणेशस्येति॥ हे सखि॥ चांडिमानं॥ कांतापराधजन्यं

प्राणेशास्यत्वत्कांतस्य ॥ मनसि प्रेम मनः प्रेमस्नेहः ॥ प्रेमानाप्रियताहार्दं प्रेमस्नेहोऽथ दोहदमित्यमरः ॥
हेमप्रसूनं ॥ सुवर्णकुसुमं ॥ प्रभवति ॥ तद्रूपेण परिणमतीत्यर्थः ॥ तथा चेतोऽतःकरणं ॥ चूतमाम्रकुसु
मं ॥ पुष्पमूलेषु बहुलमित्यणो लुक् ॥ अपि च दृक् नेत्रकमलं ॥ तद्रूपमित्यर्थः ॥ जीवनं प्राणनं ॥ बं
धुजीवं ॥ बंधूको बंधुजीवक इत्यमरः ॥ इहमखिलं कुसुमजातं ॥ वेधसा ब्रह्मणा ॥ आज्ञासूत्रे ग्रथित
म् ॥ आज्ञारूपे सूत्रे रचितमित्यर्थः ॥ तस्याज्ञासूत्रस्य भंगे विच्छेदे सति ॥ एतेषामपि पूर्वोक्तकुसुमा

इर्ष्यातो यथा ॥ ॥ प्राणेशास्य प्रभवति मनः प्रेम हेमप्रसूनं चेतश्चूतं दृगपि कमलं जीवनं बंधुजी
वं ॥ आज्ञासूत्रे ग्रथितमखिलं वेधसा तस्य भंगे स्यादेतेषामपि निप तनं चंडि मानं विमुंच ॥ १९ ॥

नामपि निपतनं पातो भविष्यतीति ॥ अतस्तदाज्ञाभंगो न कर्तव्य इति भावः ॥ वाक्यार्थहेतुकं का
व्यलिंगमलंकारः ॥ तस्याज्ञाविच्छेदे न प्रेमादीनां भंगो भवीष्यतीति वक्तव्ये भंग्यंतरेण कथनात् ॥
पर्यायोक्तरूपकानुप्राणितमित्यनयोस्तिलतंडुलवत्संसृष्टिः ॥ मंदाक्रांतावृत्तम् ॥ १९ ॥ ॥

शापहेतुकस्योदाहरणमाह ॥ अन्यत्रेति ॥ ॥ अन्यत्रस्थलांतरे निर्गंतुं ईछा यदि ॥ तव तिशे
षः ॥ तर्हि त्वं दूरतः ॥ दूरदेशो ॥ सप्रम्यर्थे तसिल् ॥ निर्गछि ॥ व्रयाहि ॥ कुतइत्यपेक्षायामाह
॥ त्वं प्रियाया यो विरहः ॥ स्त्रीसंबंधी यो वियोगस्तज्जन्यो यस्ताप स्तद्धेतुना शापेन दग्धः स्वेष्टा
वाग्निविरहितो भविष्यसि ॥ यद्वा ॥ केनचित् शापपुरुषं प्रतितन्मित्रस्येयमुक्तिः ॥ तव अन्य
त्रस्थलांतरे निर्गंतु भयातुं इछा यदि वांछा चेत् ॥ स्त्रीसंगे तव मरणं भविष्यतीति शापस्य मे
शापाद्भया ॥ अन्यत्र यदि निर्गंतुमिछा निर्गछ दूरतः ॥ प्रियाविरहतापेन शापदग्धो भवि
ष्यति २·
स्त्रीसान्निध्येपि किं निष्फलस्यित्येति धिया गमनेछा चेदित्यर्थः ॥ तर्हि दूरतः नि
र्गछि ॥ दूर एव प्रयाहि न समीप इत्यर्थः ॥ कुतः शापेन दग्धो ज्वलितस्त्वं ॥ प्रियाविरहतापेन स्त्री
संधिविरहाद्भावे जाते सति न भविष्यसि ॥ शरीरमात्रेण प्यवशिष्टो न भविष्यसीत्यर्थः ॥ लोके
हि गृहाद्बहिः समीपस्थं दह्यते न दूरस्थं तद्वदत्रापीति भावः शापास्संभोगानुकूल्याभावे पीये

त्सान्निध्येनात्मानं विनोदयिष्यतीति त्वयान्यत्र न गंतव्यमिति व्यज्यते युग्मविपुलावृत्तम् ॥ यस्या लः सप्तमो युग्मे सा युग्मविपुला मतेति लक्षणात् ॥ २० ॥ समयहेतुकस्योदाहरणमाह ॥ विश्लेति ॥ विश्लेषे जीवनं तेन या व्रीडा तया या पीडा तया विधुरं विकलं मानसं यस्याः सा तया नूतना चक्री रथांगनामांगना ॥ कोकीतियावत् ॥ प्रातः प्रातः समये ॥ प्रियं चक्रवाकं प्रेक्ष्य दृष्ट्वा ॥ अवक्रं तया नूतं कृतं आननं यया सा एताहशी सती तस्थौ ॥ अस्मिन्व्याख्याने दूषणमुद्याद्येप्रका

समयाद्यया ॥ ॥ विश्लेषजीवनव्रीडापीडाविधुतमानसा ॥ तस्थौ बाल प्रियं प्रातः प्रेक्ष्य वक्रीकृतानना ॥ २१ ॥

रांतरेण व्याख्यानमाकूराज्ञाधरनट्टा गुरवः ॥ तथाहि ॥ पश्वादीनां परस्परनिष्ठायाः प्रीतेराभासत्वमिति काव्यप्रकाशे ॥ निरूपणात् हस्य विप्रलंभशृंगारोदाहरणानौचित्यमिति ॥ प्रातःसमये प्रियं प्रेक्ष्य काचिन्नायिकेति शेषः ॥ चक्रा चक्राकारभ्रमणेन वक्रीकृतं आननं यया सेति योजना ॥ शेषं तु पूर्ववत् ॥ युग्मविपुलावृत्तम् ॥ २१ ॥ ॥

दैवहेतुकविप्रलंभशृंगारस्योदाहरणमाह॥ दैवादन्तर इति शेषः॥ द्वयोरप्यनयोरर्थयोर्विषये॥ अन्यादेशात्वादनादेशः॥ अहमेवनिदर्शनं दृष्टांतः॥ यथा ममेदमुत्तयं दैवाज्ज्ञातं तथा कयोश्चित्स्त्रीपुंसयोरिति भावः॥ युग्मविपुलाछंदम्॥ २१॥ विदूरहेतुकस्योदाहरणमाह॥

दैवाद्यथा॥ ॥जीवने सति विश्लेषो विश्लेषे सति जीवनं॥ द्वयो
रप्यनयोर्नूनामहमेव निदर्शन॥ २॥ ॥ द्विदराद्यथा॥ ॥के
लिगृहे वा मणिमंदिरे वा शशाम लंकानगरे कुताशः॥ ॥

विदूरदेशः शोभाषादेशः॥ इंगालदेश एवत्॥ केलीगृह इति॥ लंकानगरे विषये॥ केलीगृहेन
र्मसदने॥ तथा मणिमंदिरे मणिबद्धगृहे॥ कुताशोऽग्निः हनुमता प्रक्षिप्त इति शेषः॥ शश
म विरराम॥

इतिस्ततः क्वचित्क्वचित् प्रस्थितयोः यूनोः सामान्याभिप्रायमेतत् ॥ वह्निर्दाहोपद्रवास्सर्वत्र
पलायितानां स्त्रीपुरुषाणामित्यर्थः ॥ वियोगजन्मा वह्निः ॥ विरहजन्योऽग्निः ॥ नविररा
म ॥ न शशाम ॥ विरहजन्यतापे वह्नित्वारोपाद्रूपकातिशयोक्तिः ॥ इंद्रवज्रावृत्तम् ॥२२॥

इतस्ततः प्रस्थितयोर्न यूनोर्वियोगजन्मा विरराम वह्निः ॥
॥२३॥ ॥ इतिश्रीभानुदत्तविरचितायां रसतरंगि
ण्यां शृंगारनिरूपणं नाम षष्ठस्तरंगः ॥६॥ ॥ ॥

॥ इतिश्रीमहोपाध्यायटंकानंदरामभट्टात्मजभगवद्भट्टविरचितायां रसतरंगिणीव्या
ख्यायां नूतनतरीसमाख्यायां शृंगारनिरूपणे षष्ठमस्तरंगः ॥६॥ ॥ ॥

अथशृंगारं निरूप्य हास्यं निरूपयति ॥ हासस्येति ॥ स्थायिनो हासस्य पुष्टे ऽस्मिन् रसाभिव्यक्तिरित्य
र्थः एवं सर्वेषु रसेषु तत्तत्स्थायिपरिपोषात्तत्तद्रसाभिव्यक्तिरित्यवधेयम् । तद्भेदानाह स चेति ॥ स
हास्यः ॥ स्वनिष्ठः परनिष्ठश्चेति भेदद्वयेन द्विविधो बोध्यः तयोरपि भेदानाह ताविति ॥ तौ स्वनिष्ठपरनिष्ठौ प्र
त्येकमुत्तमादिभेदात्त्रिविधौ ॥ तेन षड्विधो ज्ञेयः ॥ स्वनिष्ठोपीति ॥ स्वनिष्ठोपि परनिष्ठोपि च प्रत्येकं स्मितहसि
तादिभेदद्वयेन द्वादशविधो भवति ॥ तथाहि इति ॥ तानेव भेदान्दर्शयति ॥ उत्तमानां स्वनिष्ठं स्मितमित्येको

हासस्य परिपोषो हास्यः ॥ वर्णोस्य शुक्लः ॥ दैवतं माया स च द्विविधः ॥ स्वनिष्ठः परनिष्ठश्च तावपि उत्त
ममध्यमाधमभेदात्त्रिविध इति षड्विधः ॥ स्वनिष्ठोपि षड्विधः ॥ एवं परनिष्ठोपि इति द्वादश भेदो हास्य
ः ॥ तथाहि उत्तमानां स्वनिष्ठे परनिष्ठे च स्मितहसिते मध्यमानां स्वनिष्ठे परनिष्ठे विहसितोपहसिते

भेदः ॥ उत्तमानां परनिष्ठं स्मितमिति तृतीयो भेदः ॥ उत्तमानां परनिष्ठं हसितमिति चतुर्थो भेदः ॥ इ
ति उत्तमानां चत्वारो भेदाः ॥ अथ मध्यमानां स्वनिष्ठं विहसितमित्येको भेदः ॥ मध्यमानां स्वनिष्ठं
विहसितमिति तृतीयो भेदः मध्यमाना परनिष्ठमुपहसितमिति चतुर्थो भेदः ॥ इति मध्यमानां च
त्वारो भेदाः ॥ ॥

अधमानांपरनिष्ठमपहसितमितितृतीयः॥अधमानांपरनिष्ठमतिहसितमितिचतुर्थः॥इत्य
धमानांचत्वारोभेदाः॥एवंसंकलनायांद्वादशभेदाभवंति॥उत्तमादिसंबंधिनांस्वनिष्ठपरनिष्ठ
स्मितादीनांस्वरूपमाह॥उत्तमानामिति॥उत्तमानांस्वनिष्ठपरनिष्ठचस्मितंईषद्विकसितक

अधमानांस्वनिष्ठेपरनिष्ठेचत्र्यपहसितातिहसिते॥उत्तमानांईषद्विकसितकपोलम
व्यक्तदशनमपांगसुष्टुवीक्षितंस्मितं॥स्वनिष्ठपरनिष्ठंच॥उत्तमानांविकसितकपो
लमुत्फुल्लाननमीषद्दृश्यितदंतहसितंस्वनिष्ठपरनिष्ठंच॥मध्यमानांसमयोचित
उत्तमस्वनमाकुंचितमुखमाविर्भवदनुरागंविहसितंस्वनिष्ठपरनिष्ठंच॥अधमा
नांउद्यदश्रुकंपितमौलिस्फुटतरस्वनमपहसितंस्वनिष्ठपरनिष्ठं॥ ॥छ॥ ॥

पोलसित्यादिविशेषणविशिष्टंभवति॥हसितंचविकसितकपोलासित्यादिविशेषणविशि
ष्टंभवतीत्यर्थः॥तथामध्यमानांस्वनिष्ठपरनिष्ठचविहसितंसमयोचितमित्यादि ॥ ॥

195

विशेषणविशिष्टं भवति॥ उपहसितं चोत्फुल्लनासापुटमित्यादिविशिष्टं भवतीत्यर्थः॥ तथा
धमानां स्वनिष्ठं परनिष्ठं चापहसितमुद्धसितमित्यादिविशेषणविशिष्टं भवति॥ तथाभूतम
तिहसितं चास्मुद्धतमित्यादिविशेषणविशिष्टं भवतीत्यर्थः॥ अथोत्तमादीनां स्मितहसितवि

अधमानामत्युधतमतिबहुलाश्रुस्फुटतरस्वनमाश्लिष्टपार्श्वजन
मारब्धकरतालमतिहसितं स्वनिष्ठं परनिष्ठं च॥ ॥ब॥ ॥१६॥

हसितोपहसितापहसितातिहसितानां षण्णां क्रमेण स्वनिष्ठपरनिष्ठभेदाभ्यामुदाहरणानि त
त्राद्यौ श्लोकद्वयेन स्वनिष्ठस्मितहसितयोरेकेन श्लोकेन परनिष्ठस्मितहसितयोश्चोदाहर
णमाह॥

स्वनिष्टस्मितमुदाहरति ॥ ॥लेखनीमिति ॥ ॥पयन्तुः श्रव्या ॥लिख्यतेऽनयेति लेखनी तां ॥
अक्षरलेखनशलाकां ॥ इतइत अस्मिन् अस्मिन्प्रदेशे भविष्यतीति विलोकयन् ॥ विलोकयि
तुं ॥ कुत्रकुत्रस्थलेननजगाम ॥ अपितु सर्वत्रेत्यर्थः ॥ अत्र धनमर्जयन्वसतीति वत्रहेत्वर्थे

स्वनिष्टंस्मितंयथा ॥ लेखिनीमितइतोविलोकयन्कुत्रकुत्रनजगामपथ्य
न्तः ॥ तां पुनः श्रवणसीम्नि संस्थितां प्राप्य संन्नतमुखः स्मितं दधौ ॥ १ ॥

लटः शत्रादेशः ॥ पुनः पश्चात्श्रवणसीम्निकर्णप्रदेशे योजितां स्थापितां तां लेखनीं प्राप्यल
धानतमुखः नम्रास्यः सन् ॥ यद्वासम्यक्ततंमुखंयस्यसएतादृशः सन् ॥ स्मितं दधौ हास्यं
चकारेत्यर्थः ॥ रथोद्धतावृत्तम् ॥ १ ॥

स्वनिष्टरुस्मितस्योदाहरणमाह॥रोमांकुरमिति॥ स्वीयंस्वकीयं॥विष्णुसंबंधीत्यर्थः॥रोमांकुरं॥शरीरलोमांकुरम्॥व्योमगतं॥आकाशगतम्॥तथारदाग्रं॥दशनाग्रं॥उग्रद्युतिप्रचंडं॥उद्दीक्ष्यदृष्ट्वा॥विष्णोर्नारायणस्य॥यत्तद्हास्यंआस॥बभूव॥तत्हास्यंअद्यापिसंप्रति॥पयो

स्वनिष्टहसितंयथा॥ ॥रोमांकुरंव्योमगतंरदाग्रमुग्रद्युतिंस्वीयमुदीक्ष्यविष्णुः॥
यद्दासहासःकिमुतस्ययोधावद्यापिफेनःस्तबकायमानः॥२॥ ॥

धौसमुद्रेविषये॥फेनस्तवकइवाचरतेइतितथाभूतंफेनस्तबकायमानं॥किमु॥अत्रहास्येफेनस्तबकसादृश्योत्प्रेक्षणाउक्तास्यहावस्तूत्प्रेक्षा॥इंद्रवज्राहत्तम्॥२॥ ॥ उंनमः॥॥

एवमर्धे परनिष्ठस्मितस्योत्तरार्धे परनिष्ठहसितस्योदाहरणमाह॥ हरवृषभेनेति॥ शिशुरजातदृशा
नः षडास्यः स्वामिकार्तिकः भवान्याः पार्वत्याः अंतिके समीपोस्थितः सन्॥ हरवृषभमुखे॥ शिव
नंदीश्वरवदने। पर्णपक्वपत्रं आयोजयति॥ निवेशयते॥ किंचभुजगपतेः शेषस्य दृशि नेत्रे॥ क
ज्जलं कलयति रचयति॥ अत्रोभयत्रापि विभावमात्रो निबद्धो। अनुभावव्यभिचारिणोतु नजि

परनिष्ठे स्मितहसिते यथा॥ ॥हरवृषभमुखे सखेलमायोजयति सुवर्णसवर्णकांति पर्णं॥
दृशि भुजगपतेः शिशुः षडास्यः कलयति कज्जलमंतिके भवान्याः॥३॥ ॥१

बद्धौ तथाप्याक्षेपलभ्यौ बोध्यौ॥ विभावानुभावव्यभिचारिसंयोगाद्रसनिष्पत्तिरिति भरतसूत्रो
क्तेरिति॥ एषां त्रयाणां मध्ये यस्यैकस्य द्वयोर्वानुपादानं तस्याध्याहारः कर्तव्य इति निर्णीतं भू
देवशुक्लेन रसविलासे॥ स्मितमपूर्वं वृषभमुखे शुष्कपर्णनिवेशनरूपां शेषनेत्रांजनरूपां च चे
ष्टां कुर्वंतं पुत्रं दृष्ट्वा पार्वत्याः स्मितहसिते जाते इति भावः॥ पुष्पिताग्रा वृत्तम्॥३॥ ॥

परनिष्टविहसितस्योदाहरणमाह॥ ।निशेति॥ ॥तरुण्योगोपवध्वः॥ निशायांरात्र्यां॥सुतैज
स्यसुगंधितैलस्यधियाभ्रांत्येत्यर्थः॥ हेतौतृतीया॥ गृहीतैः॥ करोधृतैर्मशीजलैः॥ करणेतृती
या॥धनाढ्यगृहेअट्टिकायांसुगंधितैलादिकंभवतीतिलोकप्रसिद्धिः॥ तैःकृत्वालिप्तमुखार
विंदंयस्यतंगोपश्रीकृष्णं॥प्रभातेप्रातःकाले॥ स्खलंतिअश्रूनीराणियस्यांक्रियायां॥तया

विहसितंपरनिष्टंयथा॥॥निशासुतैलस्यधियागृहीतैर्मषीजलैर्लिप्तमुखारविंदं॥ गोपं
प्रभातेस्खलदश्रुनीरमधीरनादंजहसुस्तरुण्यः॥४॥ ॥

अधीरोमहान्नादोयस्यांक्रियायांयथाजहसुः॥ मशीलेपेनातिकृष्णवदनंकृष्णंवीक्ष्यहा
स्यंचक्रुरित्यर्थः॥ अत्रनिशासुइतिपदच्छेदमाऊः॥ केचित्तन्नेदमाभाति॥ नसर्वदारात्रिषु
मशीजलेनमुखलेपस्तस्यकादाचित्कत्वात्॥ भ्रांतिमदलंकारः॥ उपजातिर्वृत्तम्॥ ७॥

परनिष्ठोपहसितमाह॥ योनिरोध इति॥ मयाकर्त्रा॥ यः निरोधः परोपमर्द्दः॥ निरोधः परपीडनमित्यभिधानात्॥ आरब्धः॥ उपक्रान्तः॥ इति एतावदेव पद्यं॥ स्लोकचतुर्थांशः पवनः अध्वरः नबुधः पंडितः कर्म॥ शाश्वत् चिरकालं उत्फुल्लत्वानासाय स्य सतथाभूतेन तत्स्थेन केनचित्पुंसा॥ उपहस्यते योनिरोधो न गरोधः इत्यपरार्थस्लेषेन परिकल्प्योपहसितमिति भावः॥ अत्रोक्तं

॥ उपहसितं परनिष्ठं॥ यथा॥ ॥ योनिरोधो मयालब्ध इति पद्यं पवनबधः॥
शाश्वदुत्फुल्लनासेन तटस्थेनोपहस्यते॥५॥ ॥

त्रेस त्रानुपसर्गात्फुल्लक्षीबेत्यादिना निषेधेपि उत्फुल्लसंफुल्लयोरुपसंख्यानमिति वार्त्तिकान्निपातः रोधश्चुमसानुमतः प्रफुल्लमिति रघुकाव्ये प्रयोगस्तु प्रफुल्लतीति प्रफुल्ल इति पचाद्याचि सिद्धः॥ वक्रोक्त्यलंकारः॥ वक्रोक्तिः स्लेषकाकुभ्यामपरार्थप्रकल्पनमिति॥ ५॥॥

परनिष्ठापहसितस्योदाहरणमाह ॥ ॥ रतोत्सव इति ॥ वारवधूः वेश्या रतोत्सवे सुरतक्रीडायां विषये ॥ वध्वजनस्य प्रियस्य यज्ञसूत्रं यज्ञोपवीतं निजकंठलग्नमिति शेषः ॥ परिमोचयती सा परिमोचयंती तं ॥ हेतुमणिजंतात् शतरि ङीप् ॥ द्विजांगनां विश्रब्धं ॥ दीर्घतरमसंतं श्वसंती वीक्ष्येति शेषः ॥ तारः प्रचंडः स्वरो ध्वनिर्यस्यां क्रिया यां यथा जहास उपजातिवृत्तम् ॥ ६ ॥ परनिष्ठस्यातिअपहसितं परनिष्ठं ॥ यथा ॥ रतोत्सवे वध्वजनयज्ञसूत्रकं गवसक्तं परिमोचयती म्? ॥ द्विजांगनां दीर्घतरं श्वसंती तारस्वरं वारवधूर्जहास ॥ ६ ॥ अतिहसितं परनिष्ठं ॥ यथा ॥ चौरः कामरिपोर्गृहं निशि गतः शूलं वहन् बीजं धूर्त्तफलस्यं तंडुलधिया नीत्वा पुनर्मुक्तवान् ॥ ॥

हसितस्योदाहरणमाह ॥ चौर इति ॥ ॥ कामरिपोः शिवस्य गृहं निशि रात्रौ गतः ॥ चौर्यं कर्तुं प्रवृत्त इत्यर्थः ॥ चोर एव चौरः स्वार्थेऽण् ॥ शूलं च पुरं कपालं भिक्षापात्रं हरन् गृह्णन् ॥ च पुरं धत्तूरस्य धत्तूरस्य यत्फलं तस्य यद्बीजं ॥ उन्मत्तः कितवो धूर्त्तो धत्तूरः कनकाह्वय इत्यमरः ॥ तंडुलधिया

रस·रंगी·
१०१

तंडुलक्रमेण नीत्वाकृत्वा॥ पुनरनंतरं॥ भुंक्ते इति मुक्तवान्॥ व्रियंतेऽनुदंतेते तन्मते ताद्यंतेवा तंडुलाः
संस्कृताः चालयः॥ वृद्धः जुदितनिताडिमउलचूर्णफणादिहपाद्यामुलेच प्रत्ययेरूपं यद्यपि पचपा
द्यानि पातितस्तथापि स्वरार्थं स्युत्पादनमिति॥ ततो व्यावल्गान् वल्गानां कुर्वन्॥ तथा प्रचलन्॥ त
था स्खलन्॥ तथा परिपतन्॥ तथा मुह्यन्॥ तथा विघूर्णन्॥ तथा विशीर्णन्॥ एतादृशः सन् हृष्टर
व्यावल्गन प्रचलन स्खलन परिपतन मुह्यन विघूर्णन वमन्नल्हादहध्वनिमौलिमुक्तकुसुमं स्वर्वैरूप
या हस्यते॥ ७॥ इति शेषः ततः स्वर्वैरूपया॥ कर्तरि तृतीया॥ अट्टाट्टोऽतिप्रस्वरो ध्वनिः चाश्रय
स्यां क्रियायां तथा मुक्तानि पतितानि मौलिकुसुमानि यस्यां क्रियायामिति॥ हस्यते॥ यद्वा॥
अट्टाट्टध्वनि॥ तथा मुक्तमौलिकुसुमं यथा तथा विशीर्णन् इति योजना कनकबीजभक्षणजन्य
मत्ततया तिहसंतं चौरं हृष्ट्वा स्वर्वैरूपया प्रतिहसितमिति भावः॥ शार्दूलः॥ ७॥ ॥

त·रं·८
१०१

एवं दशविधं हास्यं निरूप्य करुणरसं निरूपयितं तल्लक्षणमाह ॥ शोक इति ॥ शोकस्य दुःख स्य परिपोषः संपूर्णपुष्टिः करुणरसो ज्ञेयः ॥ अथ लक्षणस्य लक्षणांतराद्दूषकत्वात् लक्षणांत रमाह ॥ आशाविच्छेद इति ॥ विप्रलंभशृंगारे स्वामिजीविताशासत्वं करुणे तु न स्वाम्यादिजीवि

शोकस्य परिपोषः करुणः ॥ आशाविच्छेदे सति सर्वेंद्रियक्षोभो वा करुणः ॥ न च वि प्रलंभेऽतिव्याप्तिः ॥ तत्रेष्टाशायाः सत्वात् ॥ तद्विच्छेदे सति स च विप्रलंभः करुण एव ॥ शोकोऽरवं वर्णोऽस्य कपोतचित्रितः ॥ दैवतं वरुणः । स च करुणः स्वनिष्ठः परनिष्ठ श्चेति ॥ स्वशापस्वबंधनस्वक्लेशाः स्वानिष्टैर्विभावैः स्वनिष्ठः ॥ परेष्टनाशापरबंधन परबंधनपरक्लेशादीनां दर्शनश्रवणस्मरणविभावैः परनिष्ठः ॥ ॥ ७ ॥ ॥

ताशोतिभेदो बोध्यः ॥ शेषं मूले स्पष्टम् ॥ अस्यापि स्वनिष्ठपरनिष्ठभेदेन द्वैविध्यं ॥ ॥ ९

स्वनिष्ठस्योदाहरणमाह॥ तवनाथेति॥ ॥ कुमारसंभवे कामदाहावसरे रतेरियमुक्तिः॥ हे नाथ स्वामिन्॥ शरो बाणाः॥ शरासनं धनुः तवैव॥ त्वदीयमेवेत्यर्थः॥ कुत इत्यपेक्षायामाह॥ यतस्त्वं देहेन सहैव भस्मसात्॥ सर्वं भस्मजातमित्यर्थः॥ कार्त्स्न्ये सातिः॥ अतो हेतोः॥ अहमस्मि छृष्टवाच्यारहितेतिः॥ अस्मि जीवितास्मीत्यर्थः॥ तेन हेतुना तव नास्मि त्वदीया न भवामीति प्रतीयते॥ अनुमानेनैवेति॥ शरशरासने कामसंबंधिनी कामदाहे तद्दाहात्स्याति

स्वनिष्ठो यथा॥ ॥ तव नाथ शरः शरासनं तव देहेन सहैव भस्मसात्॥
अहमस्मि ततः प्रतीयते तव नास्मीति किमुच्यतामतः॥ ८॥ ॥७॥ ॥

रेरेकेण यथा रतिः॥ रतिः कामसंबंधित्वाभाववती कामदाहे तद्दाहाभावात्॥ अन्वयदृष्टान्तेन यथा शरः शरशरासने इति॥ अत्रानुमानालंकारः॥ अनुमानं तदुक्तं यत्साध्यसाधनयोर्वचः इति लक्षणात्॥ यत्र प्रसिद्धसाहचर्यनियमरूपा व्याप्तिस्तत्रानुमानप्रामाण्यं॥ यत्र कविकल्पितत्वमरूता व्याप्तिस्तत्रानुमानालंकार इति वैचित्र्यं श्रीवत्सलांछनेन॥ केचित्तु काव्यलिंगमेतदित्याहुः॥

परनिष्टस्योदाहरणमाह॥ अनुवनमितिः॥ ॥वनेइतिअनुवनं॥विभक्त्यर्थेऽव्ययीभावः॥अ
नुयांतंगछंतं॥सीतान्वेषणार्थमित्यर्थः॥बाष्पवारिअश्रुजलंत्यजंतं॥सीतासमागमाभावाद्वि
छेदेनदुःखोद्रेकाद्रुदंतमित्यर्थः॥मृदितंयत्कमलदाम पद्ममालिकातद्वत्सम्लानदेहरामंदशर
थात्मजं॥विलोक्य॥दृष्ट्वा॥दिनमपिदिवसोपि॥रवेःसूर्यस्यरोचिस्तेजस्तदेवतापःसंतापस्त

परनिष्टेयथा॥ ॥अनुवनमनुयांतंबाष्पवारित्यजंतंमृदितकमलदामम्लानमालोक्यरामं
॥दिनमपिरविरोचिस्तापमंतःप्रसूतेरजनिरपिचधत्तेतारकाबाष्पबिंदून्॥१॥ ॥

॥अतमनसिप्रसूयते॥जनयति॥चपरंरजनिरपिरात्रिरपि॥तारकाएवबाष्पबिंदवोऽश्रुक
णास्तान्॥धत्तेधारयिति॥अत्रदिनरजन्योस्तापतारकाधारणेस्वतःसिद्धेअपिरामदुःखावलोक
नस्यहेतुत्वोत्प्रेक्षणाद्धेतूत्प्रेक्षा॥साचरविरोचिषिसंतापत्वारोपात्तारकासुबाष्पबिंदुत्वारोपाच्चरू
पकातिशयोक्त्यनुप्राणितेत्यनयोरंगांगीभावसंकरः॥मालिनीवृत्तम्॥१॥ ॥२

रौद्ररस्योदाहरणमाह ॥ चंडांशुरिति ॥ चंडांशुः सूर्यः चक्रं न वर्त्तते किं ॥ अपितु वर्त्तत एवेत्यर्थः ॥ किं
च ॥ असौ भुजगपतिः शेषः ॥ पाशाः न वर्त्तते किं ॥ तथा दंति दंताः हस्तिरदाः कुंताः न किं ॥ अपितु
वर्त्तत एव ॥ गिरिः पर्वतः अशनिर्वज्रं न किं ॥ अन्यैर्लोके प्रसिद्धैः शास्त्रैरायुधैः किं साध्यं न किं
चिदित्यर्थः करणे तृतीया ॥ किंच दुष्टो यो दुर्योधनस्तस्य यन्निधनं नाशस्तस्मै समुद्दंडौ यौ बा

परिपूर्णः क्रोधो रौद्रः ॥ सर्वेंद्रियाणां मौद्धत्यं वा ॥ वर्णोस्य रक्तः ॥ देवतं रुद्रः ॥ यथा ॥ चंडांशुः
किन्न चक्री भुजगपतिरसौ वर्त्तते किं न पाशाः कुंताः किं दंतिदंता न च गिरिरशनिः किं न
शस्त्रैः किमन्यैः ॥ भीमोहं दुष्टदुर्योधननिधनसमुद्दंडबाहुप्रकांडप्रत्याहत्तिप्रकोपप्रल
यहुतवहो नास्मि कस्यापि वश्यः ॥ ९० ॥ ऊरुप्रकांडौ स्तंभसदृशौ हस्तौ ताभ्यां प्रत्यावर्त्तितः अं
तर्भावितण्यर्थोयम् ॥ प्रकोपः क्रोध एव प्रलयहुतवहः संकर्षणाग्निर्येन स तथाभूतः ॥ अस्त्री
प्रकांडः स्कंधः स्यान्मूलाच्छाखावधिस्तरोरित्यमरः ॥ भीमो भीमसेनोहं कस्यापि वश्योवास्मि ॥

नकस्याप्यधीनो भवामीत्यर्थः॥ वरांगद इतियत्र त्वत्यः स्त्रग्धरावृत्तम्॥१०॥ ॥रौद्ररसस्यैवोदाह
रणमाह॥ क्रीडेति॥ क्रीडयाउत्तुंगायेतुरंगास्तेषांयान्टापपटलानिःखुराघातश्रेण्यस्ताभिःखर्वीकृतो
न्यक्कृतायेउर्वीधराःपर्वतास्तेषांयाःश्रेण्यस्ताभ्यःस्फूर्जिताउत्पतितायाधूलयःतासांघोरणिःश्रे
णिःसैवतमस्तोमस्तेनांधकारपटलंतेनावलीढंव्याप्तंजगत्॥ कर्मविशेष्यं॥ बद्धस्पर्धायेकरींद्रास्तान्गा
ययावत्॥ क्रीडदुत्तुंगतुरंगटापपटलीखर्वीकृतोर्वीधरश्रेणीस्फूर्जितधूलिघोरणितमस्तोमावली
ढंजगत्॥ बधस्पर्धकरींद्रवृंदचरणव्यालुग्नभोगीश्वरव्यग्रोद्यच्छिरोग्ररत्नरुचिभिर्विद्योतया
मोवयम्॥११॥ परिपूर्णउत्साहःसर्वेंद्रियप्रहर्षोवावीरः॥ वर्णोस्यगौरः॥ दैवतंशक्रः॥ सचत्रिधा॥
युधवीरदानवीरदयावीरनदात्रिधा॥ इयांस्तुविशेषः॥ सचोत्साहोयुधवीरे प्रतापाध्यवसायादिप्र
भवः॥ तेषांयद्वृंदंपटलंतस्ययेचरणाःपादास्तैर्व्यालुग्नोनम्रीकृतोभोगीश्वरःशेषस्तस्यव्यग्राउद
ग्रायाफणास्तासांयदग्रंतत्रयानिरत्नानितेषांयारुचयस्ताभिःकृत्वाविद्योतयामः॥ प्रकाशयामः॥
अत्रसंनद्धकौरवसैन्यमाकर्ण्यक्रुद्धस्यभीमसेनस्येयमुक्तिःशार्दू०॥११॥ वीररसलक्षणमाह॥ ॥

रस॰ रती॰ टी॰
१०४

परिपूर्ण इति ॥ अस्य युद्धवीर दानवीर दयावीर भेदात्रैविध्यं ज्ञेयं ॥ ॥ तत्रादौ युद्धवीरस्योदाहरणमा
ह ॥ संग्रामेति ॥ दशमुखे रावणे ॥ संग्रामांगणं रणांगणं ॥ आगते प्राप्ते सति ॥ यस्य च भावेन त्या
हि नास भ्रमी ॥ सौमित्रिणा लक्ष्मणेन विस्मितं ॥ भावेक्तः ॥ तथा सुग्रीवेण विचिंतितं विचारितं ॥
तथा हनुमता ॥ आंजनेयेन व्यालोलं चंचलं यथा तथा आलोकि ॥ विलोकितं ॥ चिण्भाव कर्मणो
रिति भावे चिण् ॥ चिणो लुगिति तस्य लुक् ॥ लक्ष्मणादीनां भयसूचिका चेष्टा जातो स्यैर्यः परं तद

दानवीरे वानाध्यवसायादि भ्रमवः ॥ दयावीरे आ ताध्यवसायादि भ्रमवः ॥ अत एव पुत्रजन्म
निनातिव्याप्तिः ॥ ॥ युद्धवीरो यथा ॥ संग्रामांगणमागते दशमुखे सौमित्रिणा विस्मितं सुग्रीव
ण विचिंतितं हनुमता व्यालोलमालोकितम् ॥ श्रीरामेण परं तु पीनपुलकस्फूर्जत्कपोलश्रि
या सांद्रानंदरसोल्लसानि हृदि रे बाणासने दृष्टयः ॥ १२ ॥ नंतरं ॥ पीनाः पुष्टा ये पुलकारोमांचास्तैः

स्तैः स्फूर्जती स्फुरद्रूपा कपोलश्री यस्य स तथाभूतेन श्रीरामेण तु शरासने धनुषि विषये ॥ सांद्रः
परिपूर्णो य आनंदरसः ॥ युद्धोत्साहरसस्तेन अल्लसा मंथराः दृष्टयः दृग्व्यापारा निरुद्धि रनि र्मिताः ॥

तरंग॰ ७

१०४

युद्धोद्यतं रावणं वीक्ष्य हेलया धनुषोऽवलोकनेन रामस्य निर्भीकता धीरोद्धतता च व्यज्यते ॥ श्लो॰ १२ ॥

॥ १२ ॥ दानवीरस्योदाहरणमाह ॥ अम्मा गच्छतीति ॥ द्विजकुले विप्रवंशे ॥ मंदिरं निजाश्रमं ॥ अम्मा गच्छतीति ॥ खंडाय शार्कराय ॥ खंडांबुधिं ॥ इक्षुरसोदधिं ॥ लवणाय ॥ लवणाय ॥ लूञ् छेदने इति धातोर्नंद्यादित्वात्ल्युः गणेनिपातनात्सलम् ॥ क्षाराब्धिं ॥ लवणार्णवं ॥ तथा दुग्धाय ॥ पयसे ॥

दानवीरो यथा ॥ ॥ अम्मा गच्छति मंदिरं द्विजकुले खंडाय खंडांबुधिं क्षाराब्धिं लवणाय दुग्ध जलधिं दुग्धाय चेद्दास्यति ॥ दर्शाविरहो भवेदिति भिया दीनवदिव्यापगा यस्याघ्रिं न ज हातिवि प्रवपुषे रामाय तस्मै नमः ॥ १३ ॥ दुग्धाबुधिं क्षीरसमुद्रं चेत् यदि दास्यति ॥ तदा दु र्वरो दुःसहो विरहः पतिवियोगो भवेत् इति भिया भयेन दीनाइव खिन्नेव दिव्यापगा स्वर्धु नी ॥ यस्य भार्गवस्य विष्णोः ॥ अंघ्रिं चरणं न जहाति ॥ न त्यजति ॥ तस्मै विष्णुरूपिणे रामाय परशुरामाय नमः ॥ अत्र दैन्यहेतोर्भयस्यासिद्धत्वादसिद्धास्पदा हेतूत्प्रेक्षा ॥ श्लो॰ ६० ॥ १३ ॥ ॥

दयावीरस्योदाहरणमाह ॥ दयाबीजमिति ॥ हरेर्विष्णोर्नेत्रं नयनं दयाबीजं करुणाकारणं ॥ वर्त्तत इति शेषः ॥ तत्र बीजे भास्करः सूर्य अंकुरः प्ररोहः ॥ दक्षिणनेत्रस्य सूर्यात्मकत्वादित्यर्थः ॥ ततो भास्कराङ्कुरात् ॥ एतौ रामलक्ष्मणौ ॥ अल्पाच्तरं पूर्वमिति रामशब्दस्य पूर्वनिपातः ॥ पक्षवीप्रवाजौ समुत्थितौ समुत्पन्नौ ॥ उदः स्थास्तंभोरिति सलोपः ॥ पौलस्त्यपराभवा

दयावीरो यथा ॥ दयाबीजं हरेर्नेत्रमंकुरस्तत्र भास्करः ॥ ॥
ततः समुत्थितौ वेतौ पक्षवौ रामलक्ष्मणौ ॥ १४ ॥ ॥ ॥

पन्नानां सुरस्त्रीणां दयया दुःखदारणाय रामलक्ष्मणौ जाताविति भावः ॥ अत्र रूपकमलंकारः ॥ रसविलासे तु दयावीरस्य स्पष्टतरमेवोदाहरणं ॥ तथाहि ॥ तथेति गामुक्तवते दिलीपः सद्यः प्रतिष्टंभविमुक्तबाहुः ॥ सन्यस्तशस्त्रो हरये स्वदेहमुपानयत्पिंडमिवामिषस्येति ॥ १४ ॥ ॥ भयानकरसस्य लक्षणमाह ॥ ॥ भयस्येति ॥ ॥ अयमपि स्वनिष्टप

रनिष्टभेदेन द्विविधः॥ स्वानिष्टभयानकरसस्योदाहरणमाह॥ गोपीति॥ शिशुवपुर्बालमूर्त्तिः
देवः श्रीकृष्णः गोपी राधिका तस्याः क्षीरघटी दुग्धघटस्तस्या विलुंटनविधिर्हठात् हरणविधानं स
एव व्यापारस्तस्य यावात्रातिं वित्रस्तो॥ तथाभूतयो पित्रोर्नंदयशोदयोः ताडनशंकया प्रहरणभि
या॥ ज्वरं प्रकम्पं॥ रोमांचं रचयन्॥ तथा दृशौ मुकुलयन्॥ प्रत्यंगं वीप्सायामव्ययीभावः उत्कंप
नं यस्य परिपोषः सर्वेंद्रियविक्षोभो वा भयानकः॥ वर्णः श्यामः॥ दैवतं यमः॥ स च स्वानिष्टः परनि
ष्टश्च॥ अपराधात्स्वनिष्टो यथा॥ गोपीक्षीरघटीविलुंटनविधिव्यापारवात्रासितो पित्रोस्ताड
नशंकया शिशुवपुर्देवः प्रकम्पज्वरं॥ रोमांचं रचयन् दृशौ मुकुलयन् प्रत्यंगमुत्कंपयन्
सीत्कुर्वन्तमसि प्रसर्पति गृहं स्वीयं समागच्छति॥ १५॥ पयन्॥ तथा सीत्कुर्वन्॥ सीत्कारं
कुर्वन् एतादृशः सन्॥ सायं संध्याकाले सायं सायं प्रगे प्रातरित्यमरः॥ तमसि अंधकारे प्रस
र्पति सति॥ गृहं निजमंदिरं समागच्छति॥ स्वीयमित्यपि पाठः॥ स्वभावोक्तिरलंकारः॥ श्लो
कः॥ १५

परनिष्ठनयानकस्मोसाहरत्नमाह॥ ॥गंगायाइति॥ ॥गंगायामंदाकिन्याः सलिलेजलेविषये॥
हरेइतिशेषः॥ निमज्जतिस्नानंकुर्वतिसति॥ जटाजूटैकपदे॥ जटासंभारेइतियावत्॥ कप
र्दोऽस्यजटाजूटइत्यमरः॥ परिभ्राम्यतिसमंतात्भ्रामणंकुर्वतिसति॥ तथाअलिकुतान्हाने
नेत्राग्नौभ्रत्रपतिनत्रपतिसति॥ तथाफणिफणाशेषफणाकचित्भोगेदेहेलीयतेलीनाभव
ति॥ भोगः सुखेस्त्रियाहिभृताबहेश्च फणकाययोरितिवैजयंती॥ ॥बालेकालोरूपंतुषारद्युतिः
परनिष्ठेययया॥ गंगायाःसलिलेनिमज्जतिजटाजूटे परिभ्राम्यतिभ्रत्रपत्यलिकुतान्हानेफणि
फणाभोगेक्वचिल्लीयते॥ कुब्जीभूयहरस्यकर्णसुषिरंनिर्गंतुमुत्कंठतेराहोरास्यमुदीक्ष्य
किंनकुरुतेबालस्तुषारद्युतिः॥ १६॥ शीतांशुः॥ कुब्जीभूयदेहसंकोचंकृत्वाहरस्यशिवस्य
कर्णसुषिरं। कर्णछिद्रंनिर्गंतुंप्राप्तुंउत्कंठते॥ तत्र प्रवेष्टमिच्छतीत्यर्थः॥ उषस्तुषीत्यादिनाम
त्वर्थयोरप्रत्ययः॥ किंचराहोराहोः सैंहिकेयस्य। आस्यंमुखंवीक्ष्य। आशंकांनकुरुते
प्रवेशमितिशेषः। बालस्याल्पज्ञत्वेनताहकृज्ञानाभावेभ्रमसंभवादित्यर्थः॥ अत्रबालइतिसा

भिप्राय विशेषणात्परिकरः॥ अलंकारः परिकरः साभिप्राये विशेषण इति लक्षणात्॥ तदुक्त्यापि
तोत्प्रेक्षेत्यनयोरंगांगीभाव संकरः॥ शार्दूल॥ १६॥ विकृतनिनदहेतुकं परनिष्टम्भयानकं स्योदाहरण
माह॥ कुर्वाणि इति॥ दशमुखे रावणे॥ दशानि मुखैर्दशसंख्याकैर्वक्त्रैः कृत्वा नादं शब्दं कुर्वाणे सति
सुरैर्देवैः कंपितं॥ भावे क्तः॥ दिग्नागैर्दिग्गजैः चकितं सहसा चलितं॥ किंच रवेः सूर्यस्य हयैर्वाहै
रपि॥ ऊर्ध्वं पुच्छं यस्यां क्रियायां यथा तथा॥ आधावितं॥ पलायितं॥ सुग्रीवो वानरराजस्तस्य सेनायां
विकृतनिनादात् परनिष्ठो यथा॥ ॥ कुर्वाणे दशानि मुखैर्दशमुखे नादं सुरैः कंपितं दिग्नागैश्च
कितं रवेरपि हयैरूर्ध्वपुच्छमाधावितं॥ सुग्रीवस्तु समुच्छलज्जलनिधिव्यालोलवीचिभ्रमिभ्रश्य
त्सेतुविशंकया हनुमतो वक्त्रे दृशौ संदधे॥ १७॥ जुगुप्सायाः परिपोषो वा सर्वेन्द्रियसंकोचो वा बी
भत्सः॥ वर्णो नीलः॥ दैवतं महाकालः॥ स च स्वनिष्ठः परनिष्ठश्च॥ समुच्छलत् उच्छलत्
च्छलन् यो जलनिधिः समुद्रस्तस्य व्यालोलाया वीचयस्तरंगास्तासां या भ्रमिर्भ्रमणं तया भ्रश्य
न् यो सेतुस्तस्य या विशंका संभावना तया हेतुना हनुमतो वक्त्रे मुखे विषये दृशौ संदधे॥ व्यापा
रयामास स्त्रियां वीचिरथोर्मिर्द्वयोर्मिरिति मरः॥ शार्दूल॥ १७॥ अथ बीभत्सरसलक्षणमाह॥ जुगु

स्येति॥ अयं स्वनिष्ठपरनिष्ठभेदेन द्विविधः॥ तत्र स्वनिष्ठस्योदाहरणमाह॥ कालीति॥ काली कालिका कुंडलिनी अपराद्देवीताभ्यां कुतुहलेन मिथ अन्योन्यं प्रारब्धा कृताः याः थूत्कृतयः थूत्काराः अनुकरणशब्दोयं॥ तानि निर्भर्त्सयन्तः स्वं चलतायाः यावीचयऊर्मयः॥ स्त्रियाः पुंवद्विदिना निप्रवर्वस्मा च तेः शब्दैस्तस्य पुंवद्भावः॥ तानि द्विलल्लोलं विहाय प्रतिबिंबिता काशं यस्मिन् तादृशि॥ विषयदिस्मु परं वातु पुंस्याका

स्वनिष्ठो यथा॥ कालीकुंडलिनीकुतूहलमिथःप्रारब्धथूत्थूत्कृतिर्भर्त्सचद्वीचिचलल्लोलं विहाय सिचलत्खिल्लीनिपातस्पृशि॥ बधस्पर्धिविपक्षपक्षरुधिरस्रोतस्विनीस्रोतसि भ्रूरपत्युग्रमतिस्खलत्परणक्रोधाकुलो भार्गवः॥१८॥ ॥१॥ ॥ ॥१॥

शं विहायसीत्यमरः॥ तथा च लखिल्लीनां चंचलरूपेनी पक्षिणीनां ये निपातास्तान् स्पृशतीति तथा भूते॥ तथा बद्धस्पर्धयो विपक्षपक्षाः शत्रुपक्षीया राजानस्तेषां यद्रुधिरं तस्य स्रोतस्वती नदी तस्याः स्रोतसि प्रवाहे॥ रणक्रोधाकुलो भार्गवः परशुरामः॥ भ्रूरपति॥ अयोग्रमति॥ तथा स्खलन्ति॥ यद्वा क्रोधाकुलः सन्निति विधेयविशेषणं॥ ॥ शार्दूलः॥१८॥ ॥१॥

परनिष्टबीजस्वरसस्योदाहरणमाह॥ छत्रमिति॥ ॥कुंभींद्रकर्णे हस्तिकर्णे छत्रं विरचय कुरु॥
तथा वाजिपुच्छे हयपुच्छे॥ चामरं वालव्यजनं॥ तनुतां॥ तथा प्रचंडे मुंडे शिरोनिर्मलिं सुजं स्रज
रचय॥ तथा गजजघने हस्तिपादे मंडपं विवाहमंडपं योजयस्व कुरु॥ अत्र सर्वत्र विध्यर्थे लो

परनिष्ठे यथा॥ छत्रं कुंभींद्रकर्णे विरचय तनुतां चामरं वाजिपुच्छे मलिं मुंडे विशा
लां स्रज गजजघने मंडपं योजयस्व॥ अंत्रैर्नीराजनायाः कलय विधिमिति प्रेत
वृधांगनानामालापः कुंडलिन्यास्तनय परिणयारंभजन्मा बभूव॥ १९॥

इ॥ तथा अंत्रैः शरीरनाडिभिः नीराजनायाः विधिं विधानं॥ कलय रचय॥ प्रेतेषु या वृद्धां
गनास्तासां मध्ये कुंडलिनी काचिद्योगिनी तस्याः तनयपरिणयारंभजन्मा॥ पुत्रविवा
हसमारंभारब्ध आलापः व्यग्रराष्ट्रः बभूव॥ स्रग्धरावृत्तं॥ शार्दूलः॥ १९॥ ॥ ॥१

अथाद्भुतरसस्यलक्षणमाह॥ विस्मयस्येति॥ ॥ अस्यवर्णो दैवतंच मूलएवस्पष्टं॥ अयंस्वनि
ष्टपरनिष्ठभेदेन द्विविधः॥ अत्रेदमवधेयं॥ स्वनिष्टविभावादिभिः स्वनिष्ठोरसः॥ परनिष्टविभा
वाद्यवलोकनेन परस्यविभावाद्यभिव्यक्तेः परनिष्ठोरस इतिज्ञेयं॥ तत्रस्वनिष्ठाद्भुतरसस्योदा

विस्मयस्यसमाकस्तमृद्दिरद्भुतः॥ वर्णोस्यपीतः॥ दैवतंब्रह्मा॥ सचस्वनि
ष्टपरनिष्ठश्च॥ स्वनिष्ठोयथा॥ ॥ लीलानिबधपायोधिं हेलाहतदशाननं
॥ सरामः सीतयाश्लिष्टमात्मानं बहुमन्यत॥ २०॥ ॥ ठ॥ ॥ ॥ ठा॥ ॥

हरणमाह॥ लीलानिबद्धेति॥
सरामो रामचंद्रः॥ लीलयानिबद्धः पायोधिः समुद्रो येनतं। तथा हेलया लीलया हतो व्यापादि
तः रावणो येन स तथाभूतं॥ हेलालीलाश्च मीडावाद्रत्यमरः॥ तया सीतयास्वकांतया आश्लिष्टं आ
लिंगितं आत्मानं निजदेहं बहु अत्युत्कृष्टं॥ अमन्यत॥ आत्मा देहे धृतौ जीवे स्वभावे परमात्मनीत्य
मरः॥ २०

परनिष्ठाद्भुतरसस्योदाहरणमाह ॥ त्यक्तेति ॥ येनेति शेषः ॥ येन वसुमती जीर्णकुजवत् त्यक्ता
उत्सृष्टा पितुः प्रतिज्ञापालनापरेणेत्यर्थः ॥ येनाम्बुधिर्बिंदुवत् बद्धः ॥ पंचभिर्दिनैः कपीति
ग्रामं ग्रामणीरिति वत् हनुमत्प्रमुखवानरकर्तृकसेतुबंधनं रामे उपचर्यते ॥ किंच बाणाग्रेणत्र
राग्रेण कृत्वा जरंश्चासौ कपोतश्च स एव जरत्कपोतकः ॥ पूर्वकालिकेत्यादिना तत्पुरुषसमासः ॥
स्वार्थे कन्प्रत्ययः ॥ स इव रावणः व्यापादितो विदारितः ॥ किंच विभीषणाय निजभक्ताय ॥ कापि र

परनिष्ठो यथा ॥ त्यक्ता जीर्णकुजवद्वसुमती बद्धोऽम्बुधिर्बिंदुवत् बाणाग्रेण जरत्कपोतक इव
व्यापादितो रावणः ॥ लंका कापि विभीषणाय सहसा मुद्रेव हस्तार्पिता श्लाघ्यं वै रघुनंदनस्य च
रितं को वा न रोमांचति ॥ २१ ॥ अत्युक्तिभ्रमोक्तिचित्रोक्तिविरोधाभासप्रभृतयोऽद्भुता एव ॥

णीयापि लंका रावणनगरी सहसा अकस्मात् ॥ मुद्रेव निजनामाक्षरांकिता सुवर्णोर्मिकेव हस्ता
र्पिता करे दत्ता ॥ एवमनेन प्रकारेण रघुनंदनस्य रामचंद्रस्य चरितं आचरणं श्लाघ्यं कर्ण्यं ॥ को वा पु
रुषः रोम ॥ जातित्वादेकवचनं ॥ लक्षणया रोमोद्गमं ॥ न अंचति ॥ अपि तु सर्वः प्राप्नोतीत्यर्थः ॥ रो
मांचन इत्यपि पाठः ॥ अत्रोपमानोपमेयवाचकसाधारणधर्मवाचकानां चतुर्णां जीर्णकुजादि

परानामुपारानात्स्वर्णोऽपमाजं का रः त्राह्॥२१॥ अयात्कन्याद्रीनां शृंगारादिषु षट्विधरसेषु कुत्रं
तमविश्ल्कत्यापितां कांक्षायां अद्भुतेऽवेत्ता रायेनाह॥ अत्युक्तिरिति॥ तत्राद्यावत्स्कक्तिमुदाह
रति॥ भूयादिति॥ कोलस्यावतारो यस्य स तथाभूतः॥ वराहमूर्त्तिः॥ वराहः सूकरो घृष्टिः कोलः
पोत्री कटिः किरिरित्यमरः॥ भगवानेष हरिर्विष्णुः सतां हिताय श्रेयसे भूयात्॥ आशिषि लिङ्
सिंधोः समुद्घात्॥ उद्धृतायाइति शेषः॥ केतुं हिरण्याक्षहरणाउत्सन्नं उःखं॥ अपास्य तत्काय
अत्युक्तिर्यथा॥ भूयादेष सतां हिताय भगवान्कोलावतारो हरिः सिंधोः केतुमपास्य यस्य दशना
नप्रांते स्थितायाभुवः॥ ताराहारति वारिदस्तिलकति स्ववाहिनी माल्यति क्रीडादर्प्पणति क्षपाप
तिरहर्द्देवश्च ताटंकति॥२२॥ स्य वराहमूर्त्तेः॥ दशनप्रांते दंष्ट्राग्रे स्थितायाभुवः भूम्याः॥ कर्मणि ष
ष्ठी॥ ताराः नक्षत्राणि॥ जातित्वादेकवचनं॥ हारति हारस्वाचरतीति आचारक्विबंताद्द्र॥ एवम
ग्रेऽपि बोध्यं॥ वारिदो मेघस्तिलकति॥ कस्तूरीचंद्रकस्वाचरति॥ तिलकः स्त्रियामित्यमरः॥ त
थास्ववाहिनी मंदाकिनी॥ मालानां समूहो माल्यं मालामिवाचरतीति माल्यति॥ तथा क्षपापतिः
चंद्रः क्रीडादर्पणस्वाचरतीति क्रीडादर्पणति॥ दर्पणे मुकुरादर्शावित्यमरः॥ तथा अहर्देवः सूर्यस्ता

टंकति॥ ताटंकं कर्णभूषणं तद्वदाचरति॥ अत्रोपमेयभूतानां ताराद्दीनामुपमानभूतानां हाराद्दीनां चोपादानाद्धर्मवाचकानुपादानाच्च धर्मवाचकलुप्तोपमानेदं॥ शार्दूलं॥ २२॥ ॥अस्यैवोदाहरणांतरमाह॥ ॥शिवेति॥ ॥शिवहरे नृसिंहस्य विस्तीर्णे विशाले॥ मुखकुहरे वदनकुहरे॥ व्योमाकाशं पर्णति॥ पर्णसदृशं भवति॥ नागवल्लीदलमिवाचरतीत्यर्थः॥ तथा चंद्रः चूर्णति श्वेतचूर्णमिवाच

शिवहरे मुखकुहरे विस्तीर्णे पर्णति व्योम॥ चूर्णति चंद्रः क्रमु
कति कनकगिरिः खदिरैसारति खरांशुः॥ २३॥ ॥ ॥ ९९

रति॥ तांबूलवाटिकायां श्वेतचूर्णादिकं निक्षिप्यते इति लोकप्रसिद्धिः तथा कनकगिरिः सुवर्णाद्रिः क्रमुकति पुगमिवाचरति॥ द्योतातु पुगः क्रमुकइत्यमरः॥ खरांशुः सूर्यः खदिरसारति॥ आत्मानमिति शेषः॥ अन्यथा कर्मत्वस्यापायोगात्॥ आत्मानं खदिरसारः खदिरवृक्षर

सः कस्यामितियावत्॥ तद्दाचरतीत्यर्थः॥ आर्याछंदः॥२३॥ भ्रमोक्तेरुदाहरणमाह॥ ॥तीव्रैरिति
॥तीव्ररुचः॥ भास्करस्य तीव्रैः करैः उल्लांशुभिः परिचितां संतप्तामित्यर्थः॥ कपोलस्थलीं गंड
स्थलीं सेक्तुं॥ करेण शुंडादंडेन कृत्वा नीराणां जलानां निकरं समूहं हरता हेरंबेणेति शेषः
नीरधौ समुद्रे॥ तुच्छीकृते रिक्तीकृते सति॥ तत्र पंकपतितं। पक्षछेदभयादित्यर्थः॥ मैनाकाद्रि

॥भ्रमोक्तिर्यथा॥ ॥तीव्रैस्तीव्ररुचः करैः परिचितां सेक्तुं कपोलस्थलीं नीराणां निकरं
करेण हरता तुच्छीकृते नीरधौ॥ मैनाकं समुदीक्ष्य पंकपतितं शाल्लूकशंकाजुषो हेरं
बस्य पुनातु दंतशिखरव्यापारलीलारसः॥२४॥ भवतु तं समुद्रीस्यावलोक्य॥ शाल्लूक
शंकाजुषः॥ उत्पलकंदभ्रांतिभाजो हेरंबस्य॥ शाल्लूकमेषां कंदः स्यादित्यमरः॥ दंतशि
खरं दंताग्रं तस्य यो व्यापारः प्रसारः स एव लीलारसः क्रीडारसः पुनातु॥ आशिषि लोट्॥ भ्रां
तिमदलंकारः॥ ॥शार्दूल०॥२४॥ उदाहरणांतरमाह॥ अंतः क्रोधाग्नीति॥ ॥ ४॥ ११

221

॥अंतर्मनसिस्थितःक्रोधाग्निःकोपानलस्तेनजाग्रत्देदीप्यमानःसचासौकपटेनहिरण्यकशिपुवधमि
षेणनरहरिर्नृसिंहस्तस्यस्फाराबहुलायेनिश्वासवातास्तैर्व्याधूताःकंपिताअतएवकुलधरणि
भृतःकुलाचलस्यसानुषुशिखरेषुप्रस्खलंतःप्रपततःवारिवाहाःमेघाःकर्म॥दिग्नागैःदिग्गजैः
॥नागबुध्यागजशंकयावीक्षिताः॥वनेयानिहरिणकुलानिमृगकदंबानितैःशाद्वलानांनडुला
नांनडशाद्वलंनडुलंचरइतिडुलच्प्रत्ययः॥डित्वादिलोपः॥एतोमध्यतवर्गीयोवैडूर्यमणिशाद्वला
अंतःक्रोधाग्निजाग्रत्कपटनरहरिस्फारनिश्वासवातव्याधूतावारिवाहाःकुलधरणिभृतःसानुषु
प्रस्खलंतिः॥दिग्नागैर्नागबुध्यावनहरिणकुलैःशंकयाशाद्वलानांछायाभ्रांत्याकिरातैःक्षिति
वसनधियावीक्षिताःस्वर्वधूभिः॥२५॥ वितिशाष्टभेदप्रकारो॥शंकयावीक्षिताः॥तथाकिरा
तैःशबरैः॥किरातशिक्षशबरपुलिंदम्लेच्छजातयइत्यमरः॥छायाभ्रांत्याअनातपभ्रमेणवी
क्षिताः॥छायात्वनातपेकांताविल्यमरः॥तथास्वर्वधूभिर्नाकिनितंबिनीभिः॥क्षितिवसनधि
यारुक्मवस्त्रपुंजभ्रांत्या॥वीक्षिताइतिपदंसर्वत्रयोज्यम्॥अत्रैकस्यमेघरूपवस्तुनोदिग्ग

जातिमि बठुधो छत्रे खाउछत्रे खाकारः॥ बठुमि बठुधो छत्रेखारे कस्योछत्रेखर ष्पतरतिलक्षणात्॥ स्त्र
ग्धराष्टृतम्॥ २५॥ ॥ शार्दूलं॥ चित्रोक्तेरुदाहरणमाह॥ ॥ गिरिरिति॥ ॥ गिरिः पर्वतस्त्वेनाध्य
वसितं कुचमंडलं॥ मौक्तिकावलिस्सेहोर बिंदुश्रेणिव मृत्कृदिरति॥ अत्र वमतीति गौणहत्त्वाश्र
यणान्नाश्लिलहोषः॥ यथाहदंडी॥ निष्ठ्यूतोद्गीर्णवांतादिगौणणवृत्तिव्यपाश्रियात्॥ अतिसुंद
रमन्यत्र ग्राम्यकक्षां विगाहत इति॥ त घा अलिद्वयं नेत्रयद्वयं॥ स्थावरं स्थिरतरं नवति॥ इति
चित्रोक्तिर्यथा॥ ॥ गिरिर्वमति मौक्तिकावलिमलिद्वयं स्थावरं शारत्तुहिनदीधितिर्व्यजनमा
रुतं वांछति॥ धनुः स्वपिति मान्मथं शिथिलबंधमेधं तमो नमो मनसिजाय ते किमपि कौतु
मुरव पार व त्रपादिति भावः॥ शारतुहिनदीधितिः शास्त्रं इत्वेनाध्यवसितमाननं॥ कंतन्वेते॥ रह
व्यजनमारुतं धवित्रानिलं॥ धवित्रताजहंतंस्याऽऽक्षेपो व्यजनं च तदित्यमरः वांछति॥ रतिर
भसश्रम घर्मापनोदार्थमिति भावः॥ किं च मान्मथं मन्मथसंबंधिधनुः भ्रूयुगं स्वपिति॥ नि
श्चलं नवति॥ अंधयतीति अंधं एतादृशं तमः केशपाशरूपं॥ शिथिलबंधं श्लथबंधनं॥ अस्ति

223

॥ किमप्युनीर्वचनीयं कौतुकं निधुवनात्मकं तन्वते ॥ कुर्वति ॥ मनसिजातो मनसि तस्त स्मे ॥ स
म्रम्यां जने ईः ॥ तत्पुरुषे कृति बहुलमिति सलुक ॥ तेभ्यस्तु नमः ॥ अत्र रूपकातिशयोक्तिरलंकारः ॥
पृथ्वी वृत्तम् ॥ २६ ॥ विरोधाभासस्योदाहरणमाह ॥ ॥ कोप्यसाविति ॥ ॥ हे मुकुंद विष्णो ॥ अत्र हे
त्वाष्ट्र प्रयोगे विधायक सूत्राभावेपि हैहै प्रयोगे हैहयोरिति नाप्रकास्त्र योगः ॥ त्वं कोप्यलौकि
कोनंदको नंदकनामा खड्गः श्लेषेणानंदकर्त्ता च ॥ कंसस्य संपत्लक्ष्मीस्तस्या निंदको द्वेषकर्त्ता
लोक्षाणि कमखिलं चित्रोक्तिरवे ॥ विरोधाभासो यथा ॥ ॥ कोप्यसौ तव मुकुंद नंदको निंदकोन
वतिकंससंपदः ॥ कुंडलीत्वमसि कालियं कुतो दूरतो नयसि तन्निवेदय ॥ २७ ॥ ॥
भवति ॥ यात्र्यानंदकरी स एव द्वेषकर्त्रेति विरोधः ॥ अस्य रूढनामेति तत्परिहारश्च ॥ किंच हे
विष्णो त्वं कुंडली ॥ मकराकृति कुंडलवान् फणी चासि ॥ कुंडली गूढपाच्चक्षुःश्रवाः काकोदरः फ
णीत्यमरः ॥ तस्मात्कालियं सर्पं कुतः कस्मात् दूरतो दूरदेशं नयसि त्वं एवमहिमा कुंडलीत्वेन
सजातीयं कालियं सर्पं कुतः कालिंदीह्रदात्स्य जातरंभो पयसीति एवं व विरोधाभासः ॥ नय

॥स्थायिभावविभावानुभावाः किंमूलएवस्पष्टम्॥ मायारसस्योदाहरणमाह॥

नशृंगारस्यतद्वैरिणोबीभत्सस्यतत्रसत्वात्॥ अतएवनबीभत्सस्यापि॥ नहास्यस्य॥ तद्वैरि
णः करुणस्यापितत्रसत्वात् अतएवनकरुणस्यापि॥ नरौद्रस्यतद्वैरिणोऽद्भुतस्यापितत्रस
त्वात् अतएवनाद्भुतस्यनवीरस्यतद्वैरिणोभयानकतत्रसत्वात्॥ अतएवनभयानकस्यापि॥
नशांतस्यतद्विरोधित्वात्॥ नचसमान्यएवरसः तद्विशेषाइतरेभवंत्विति॥ शांतरसस्यर
साभावत्वापत्तेः किंतु॥ विद्युतइवरतिहासशोकक्रोधोत्साहभयजुगुप्साविस्मयास्तत्रोत्प
द्यंतेविलीयंतेच॥ तत्रतेव्यभिचारिभावाइति॥ लक्षणंचप्रबुधा मिथ्याज्ञानवासनामायारसः
मिथ्याज्ञानमस्यस्थायिभावः विभावाः सांसारिकभोगार्जकधर्माधर्माः अनुभावास्तत्र
पुत्रकलत्रविजयसाम्राज्यादय॥ ॥ ॥

वाटीनि॥ ॥जाटिर्जाटदेशोद्भवा कामिनी तस्याः हंगंमोरु हंसनेत्रकमलं तस्याः रम्भसकरी हर्षजि
नी वाटी वाटिका॥ रम्भसो हर्षवेगयोरित्यमरः॥ कापि कांता रमणीया वापिका गृहदीर्घिका
किंच चंद्रानुकल्पं चंद्रसदृशं तल्पं शय्या॥ तल्पं शय्यदारयोरित्यमरः॥ किंच कामिनी ना
यिका॥ मिथ अन्योऽन्यं॥ कामी विलासी तस्य यानि तिस्ताः प्रकटयति कामानुरूपं रूपं ला

॥यथा॥ ॥वाटी जाटी हंगंमोरु हरम्भसकरी वापिका कापि कांता तल्पं चंद्रानुकल्पं प्र
कटयति रहः कामिनी कामिनीति॥ रूपं कामानुरूपं मणिमय भवनं बंधुरं बंधुरागो
लोके लोकेश कस्य त्वमसि न भवने सर्वदा सर्वदाता॥२९॥ ॥

वर्णप॥ तथा बंधुरं मनःकृष्टं मणिमय भवनं॥ तथा बंधुरंगः स्वजन सौहार्दं॥ एतल्लोके
दृश्यते॥ हे लोकेश ब्रह्मन्॥ त्वं कस्य जनस्य भवने सर्वदानि॥ सर्वदा निरंतरं॥ सर्वदाता स
कलप्रदः॥ न असि अपि तु सर्वस्यापीत्यर्थः॥ अत्र संकलमिथ्याज्ञानवासनास्थायिभावः
विभावानुभावौ स्फुटौ नेस्पष्टौ॥ स्रग्धरा॥ २८॥

अथ शांत रसस्योदाहरणमाह ॥ हेयमिति ॥ इदं हर्म्यं गेहं हेयं त्याज्यं ॥ निकुंजभवनं लतागृहं त्त्रेयं ॥ चीर्न्नव्रयनेत्रं चोयं हि
तियनमयः ॥ धनं द्रव्यं प्रदेयं न तु रक्षणीयं ॥ किंच तीर्थपयस्तीर्थोदकं पेयं ॥ सर्वदैवेति शेषः ॥ किंच भगवतो हरेः पदां
भोरुहं चरणकमलं गेयं ॥ गातुं योग्यं ॥ किंच चिराय चिरकालं जन्म हरं भेशायनेहं भक्तिस्तरणे नेयं ॥ त्रेतमितिशे
षः किंच मनः संकल्पविकल्पात्मकं धर्मे निधेयं ॥ किंच तत्रासिता चासिता चेत्सनायोः समाहारः सितासि

नाद्यन्निस्थले निर्वेदः स्थायिभावः शांतोपि नवमो रसः निर्वेदस्य परिपोषः शांतः रसः होषप्रशमोवा
॥ दोषाः कामक्रोधलोभादयः ॥ अत्र विषयदोषविचारविरक्तादयो विभावाः ॥ अनुभावाश्च नेत्राश्रुपु
लकहर्षगद्गदवचनादयः ॥ यथा ॥ हेयं हर्म्यमिदं निकुंजभवनं श्रेयं प्रदेयं धनं पेयं नीर्थपयो हरेर्भगव
तो गेयं पदांभोरुहं ॥ नेयं जन्म चिराय दर्भशायने धर्मे निधेयं मनस्स्येयं तत्र सितासिनस्य सविधे ध्येयं पु
राणं महः ॥ २९ ॥
तं तस्याः प्रयागस्येत्यर्थः ॥ सविधे समीपे स्थेयं ॥ नित्यं स्नातुमिति शेषः ॥ तथा च श्रुतिः ॥ सि
तासिते सरिते यत्र संगते तत्राप्लुतासो दिवमुत्पतंति ये वै तन्वं विसृजंति धीरास्ते जनसो ॥ मृतत्वं भजंत
इति ॥ किंच पुराणं महः परं ब्रह्म ध्येयं ॥ कस्यचिद्विरक्तस्येयमुक्तिः ॥ अत्र स्थायी निर्वेदः ॥ विषयदो
षविचारादयो विभावाः ॥ गृहादित्यागोपदेशोक्तिरनुभावः ॥ शार्दूल ॥ २९ ॥ अथ वीरोदाहरणांतरमाह ॥

228

रसत.टी.
११८

वेदस्येति॥ वेदस्य अध्ययनं यत्कृतं तथा शास्त्रं यत् परिचितं परिशीलितं॥ किंच पुराणं यत् श्रुतं इदं सर्वं
पूर्वोक्तं पुराणाध्ययनादिकं व्यर्थमस्ति॥ चेत् यदि कमलाकांतस्य विष्णोः पदं॥ पदं व्यवसितत्राणस्थान
लक्ष्माघ्रिवस्तुष्वित्यमरः॥ न कीर्तितं॥ ईश्वरचरणारविंदध्यानेन वेदाध्ययनादिकं सफलमितिभावः॥
अत्र दृष्टांतमाह॥ भूमितलमितिशेषः उत्खातकर्मणिक्तः॥ तथा सदृशीसमीकृतं॥ तथा भूयसा प्रचु
रेणांभसा सेकः सिंचनं विरचितः॥ इदं सर्वं निष्फलं यदि बीजं श्रा[illegible]लवालैर्लयं मंडलं तस्मिन्नविषयेन

वेदस्याध्ययनं कृतं परिचितं शास्त्रं पुराणं श्रुतं सर्वं व्यर्थमिदं पदं न कमलाकांतस्य चेत्कीर्तितमु
त्खातं सदृशीकृतं विरचितः सेकोंऽभसा भूयसा सर्वं निःफलमालवालवलये क्षिप्तं न बीजं यदि॥ ३७॥
॥ ॥ इति श्रीभा० विरचितायां रसतरंगिण्यां रसनिरूपणे सप्तमः स्तरंगः॥ ७॥

क्षिप्तं नारोपितं
॥ सति बीजप्रक्षेपे जलसिंचनादिकस्य सफलमिति भावः॥ अत्र विभावो पूर्ववत्॥ अत्र कम
लाकांतपदकीर्तनस्य बीजप्रक्षेपस्य च बिंबप्रतिबिंबभावात् दृष्टांतालंकारः चेद्बिंबप्रतिबिंबत्वं दृष्टां
तस्तदलंकृतिरिति लक्षणात्॥ शार्दू॥ ३७॥ ॥ इति श्रीमहोपाध्यायवटकानंदरामात्मजभगवद्भट्ट
विरचितायां रसतरंगिणीव्याख्यायां नूतनतरीसमाख्यायां शृंगाराभिनिरूपणे सप्तमस्तरंगः॥ ७॥

तरंग ७
स्पयद ५
११८

ञ यसंगीतशास्त्रोक्ता रसादिदृष्टयः कथ्यंते॥ ॥स्थायीति॥ ॥तत्र स्थायिभावदृष्टिरष्टधा॥व्य
भिचारिभावदृष्टिर्विंशतिधा॥ रसदृष्टिरष्टधेति संकलनया षट्त्रिंशद्भेदा दृष्टयो भवंति॥ तासां प
स्थायिभावजा दृष्टिरष्टधा॥ स्निग्धा हृष्टा दीना क्रुद्धा दृप्ता भीता जुगुप्सिता विस्मिता चेति॥ व्यभिचा
रिभावजा दृष्टिर्विंशतिधा॥ शून्या मलिना श्रांता लज्जिता शंकिता मुकुलिता अर्द्धमुकुलिता ग्ला
ना जिह्माकुंचिता वितर्किता अभितप्ता विषण्णा ललिता केकरा विकोशा विभ्रांता विधुता स्र
स्ता मदिरा चेति॥ रसभेदादष्टधा रसदृष्टिः॥ कांता हास्या करुणा रौद्रा वीरा भयानका बीभत्सा
अद्भुता चेति॥ षड्त्रिंशद्भेदादृष्टे रूहनीयाः कुणिता विकसिता अर्द्धविकसिता चकिता सुप्ता घू
र्णिता अलसा विवर्तिता अर्द्धविवर्तिता आवर्तिता नर्तिता अर्द्धनर्तिता पर्यस्ता शून्या स्तिमि
ता चेति॥ दृष्टिभेदा ऊहनीयाः॥
रिगणनं तु मूल एव स्पष्टम्॥ अन्या अपि कूणिताद्या दृष्टयः सं

तत्रललितोदाहरणमाह ॥ ॥मनसिजेति॥ ॥मनसिजः कामः स एव नृपतिर्वाक्यइतिशेषः॥ अत्र सर्वत्र वाशब्दः समुच्चये॥ वास्यादिकल्पोपमयोरेवार्थेऽपि समुच्चय इत्यमरः॥ मंडनं आभूषणं वा॥ तथा महो वा॥ तथा भवनं वा स्थानं॥ यौवनं वा॥ वयं वा॥ इदमखिलं पूर्वोक्तं सकलम

ललिता यथा॥ ॥मनसिजनृपतिर्वा मंडनं वा महो वा शशिमुखि भवनं वा यौवनं वा वयं वा॥ अखिलमपि कृतार्थं वीचिविक्षेपखेलत्कमलविजयलीलाशालिना लोचनेन॥ १॥ ॥ ॥

पिडे शशिमुखि॥ वीचिविक्षेपेन तरंगक्षोभेण खेलत् विलसत् यत् कमलं तस्य यो विजयस्तस्य या लीला तया शालत इत्येवं शीलेन लोचनेन कृत्वा कृतार्थं सफलमित्यर्थः॥ एतेनास्यां रसादिदृष्टीनां तदुपयोगित्वमिति ज्ञेयं॥ मालिनी वृ॰॥ १॥ ॥

ग्जानोदाहरणमाह ॥ ॥ पर्यस्तेति ॥ ॥ पर्यस्ता विकीर्णा ये ऽलकास्तेषां रोनिर्यस्यास्तयान्तताया ॥ किंचत्र
मजुषः सुरतातिशयात् श्रांतायाः ॥ तथा प्रस्वेदेन स्वेदोद्गमेन गंडयोः कपोलयोस्तिलकं यस्यास्तद्रूपा ॥
शैलराजदुहितुः पार्वत्याः श्रांतोदरे ॥ शीकरवत् शीतलेन शशिना वातं ॥ समातन्वति ॥ विजयती स
ग्लाना यथा ॥ ॥ पर्यस्तालक रोचिषस्य मजुषः प्रस्विन्नगण्डतिलकः श्रांतोदः शीकरशीतलेन शशि
ना वातं समातन्वति ॥ जीयास्तामचलाधिराजदुहितुर्निस्यन्दनीलोत्पलच्छायानिद्रितचञ्चरीकमि
थुनस्यर्शसमृद्धेः हृद्रोगो ॥ २ एवमन्याअप्युदाहरणीयाः ॥ अथ रसानां जन्यजनकभावः ॥ तत्र भर
तः ॥ शृंगाराननुभवेद्धास्यो रौद्राच्च करुणो रसः वीरात्स्याद्भुतोत्पत्तिर्वीभत्साच्च भयानकः ॥ अय
मुत्सर्गः ॥ परेषामपि रसानां कार्यकारणभावदर्शनात् ॥ प्राचीनग्रंथकारसंमतिरपि ॥ कथानु
ग्राहयोगाच्च विवक्षावशातः कवेः ॥ अन्योन्यजन्यजनका रसा भावाश्च वंत्यमी ॥ तीत्पर्यः ॥ निस्पं
दं निश्चलं यन्नीलोत्पलं तस्य या छाया तत्र निद्रितं यच्चञ्चरीकमिथुनं भ्रमरयुग्मं तस्य स्पर्शसमृद्धेब
द्ध स्पर्द्धे तत्सदृशी तिया वृत ॥ एतादृशी दृग्गौ जीयास्तां ॥ सर्वोत्कर्षेण वर्तेतां वयूर्यत इति चञ्चरीकः
पक्षरीकाहयश्चेत्फणादिस्मूत्रेण कन्प्रत्ययेन निपातितः ॥ व्या ६० ॥ २ ॥

अथ रसानां जन्यजनकभावमाह ॥ शृंगारेति ॥ ॥ स्पष्टम् ॥ उदाहरणमाह ॥ मातुरिति ॥ ॥ मातुर्रेणुकायाः ॥ उदारां महतीं दृगम्भोरुहयुगजनेत्रोत्पलयुग्मं तस्मादुल्लसितीया बाष्पधारा तां दृष्ट्वा ॥ तथा तातस्य जमदग्नेः ॥ वक्षःस्थले यो रुधिरचयस्तं प्रेक्ष्य दृष्ट्वा क्रुध्यता भार्गवेण सहस्रार्जुनस्य यो दमनसमारंभस्तस्मिन् गंभीरं दृढं खगाहं वीर्यं यस्य स तादृशः ॥ तथा स्फूर्जंतः स्फुरन्तः प्रदोर्वल्ल्यो बाहु

यथा ॥ ॥ मातुर्दृष्ट्वा दृगंभोरुहयुगजगजबाष्पधारामुदारां तातस्य प्रेक्ष्य वक्षःस्थलरुधिरचयं क्रुध्यता भार्गवेण ॥ हस्तन्यस्तः सहस्रार्जुनदमनसमारंभगंभीरवीर्यस्फूर्जद्दोर्वल्लिरिद्धश्रीः सकलकलासूत्रधारः कुठारः ॥ ३ ॥

लतायायत इद्धश्रीसकं नृत्यं तस्या सकलकलातस्याः सूत्रधारः नाटकाचार्यः ॥ इद्धश्रीसकशास्त्रसंगीतशास्त्रे नृत्यविशेषे रूढः रंगाजन्ता इव ज्ञाषाराष्ट्रीयमिति केचित् ॥ एतादृशः कुठारः ॥ हस्तन्यस्तः धृत इत्यर्थः ॥ अत्र मातुः परिदेवनावलोकनेन करुणः पितृहृदयरुधिरावलोकनेन बीभत्सः रत्नयोर्वीरं प्रति कारणता ॥ स्रग्धरा छ० ॥ ३ ॥ ॥

उदाहरणांतरमाह॥ कुरंगाक्ष्या इति॥ ॥ हे सुभगराजन्॥ अरिभटस्तव चमूः॥ कुरंगाक्ष्याः॥
निजकांतायाः विपरीतरतिविधौ सुरतव्यापारे पुरुषायिते इति यावत्॥ अधिस्कंधं॥ स्कं
धयोर्विषये॥ किमपि निपतंतीं वेणीं दृष्ट्वा॥ अधीग्रीवं॥ उभयत्रापि विभक्त्यर्थेऽव्ययीभावः॥

अत्र वीरं प्रतीकरुणबीभत्सयोः कारणता॥ यथावातातचरणानाम्॥ कुरंगाक्ष्या वेणीं सुभ
गविपरीतरतविधावधिस्कंधं दृष्ट्वा किमपि निपतंतीमरिभटः॥ अधिग्रीवं युष्मत्प्रचलक
रवालव्यतिकरस्मरन्नतः सद्यो विरमति परीरंभरभसात्॥ ४॥ ॥ १

युष्मत्कं प्रचलोयः करवालः खड्गस्तस्य व्यतिकरः॥ संबंधस्तं स्मरन्नसद्यस्तत्कालमेव प
रीरंभरभसात्॥ आलिंगनहर्षात्॥ विरमति॥ अत्र भयानकं प्रति शृंगारस्य कारणता कंचित्
राजानं प्रति तदाश्रितपंडितस्येयमुक्तिः॥ शिखरिणीवृत्तम्॥ ४॥ ॥

युधीति॥ ॥ दशकंठो रावणः युधि संग्रामे कुपितकृतांतस्य यः स्यंदनो रथस्तस्य द्वीनादोय
स्पतत् एतादृशं वारिदास्त्रं मुक्तवान् किंचतडिति विद्युति॥ जनकपुत्र्याः सीतायाः साम्यमा-
लोकमानः॥ अत एव स्विन्नपाणिः राघवो रामः पवनास्त्रं॥ मेघास्त्रनिवारकं वायव्यास्त्रं न

अत्र शृंगारस्य भयानकं प्रतिकारणता॥ ॥ यथा॥ वा॥ युधि कुपितकृतांतस्यंद
नस्य ध्विनादं दिशि दिशि दशकंठस्सक्तवान् वारिदास्त्रम्॥ तडिति जनकपुत्र्याः
साम्यमालोकमानस्त्यजति न पवनास्त्रं राघवः स्विन्नपाणिः॥५॥ ॥ ॥

त्यजति॥ न प्रक्षिपति॥ अत्र वीररसस्य शृंगारं प्रतिकारणता स्पष्टं॥ मालिनी वृ॥५॥ ॥

एवमेषामंगांगीभावेसंकरः॥एषांपरस्परंविरोधमाह॥शृंगारेति॥ ॥स्पष्टंत्रोषां॥विरोधमुदाहरति

अत्रशृंगारंप्रतिजनकपुत्र्याःसाम्यमालोकमानस्यजतिनपवनास्त्रराघवःखिन्नपाणिः॥अत्रशृं
गारंप्रतिवीरस्यकारणता॥एषामंगांगिभावापन्नानांरससंकरइतिनामवदंतिलोकाः॥रसानां
नियोविरोधस्थापितत्रभरतः॥शृंगारवीभत्सरसौतथावीररभयानकौ॥रौद्राद्भुतौतथाहास्यकरुणौ
वैरिणौमिथः॥वैरिरसइववैरिरसस्यविभावानुभावव्यभिचारिभावाअपिरसहानिकराइतित
त्रधारयेत्॥तत्रप्राचीनसंमतिः॥नचवैरसंब्रूयादैरीणांनापिभावकम्।नविभावनसंचारीभावं
नैवकदाचन॥किंत्वंगांगिभावापन्नयोरेकदेशोएकदा॥एकदेशेसतिनवैरंदेशभेदेसतिनवै
रम्।कपिसंयोगतद्भाववयोरिव।समयभेदसत्त्वपिनवैरम्॥नूतलेघटतद्भाववयोरिव॥वै
रंयथा॥ ॥प्रियेणालिंग्यमानायाःप्रियायाःकुचकुम्भयोः॥कस्त्नेहतेनिर्मुक्तरुधिरंकुंकुमायते
॥६॥ ॥प्रियेणेति।अत्रशृंगारबीभत्सयोःपरस्परंवैरं॥६॥ ॥१

विरोधाभावमुदाहरति॥ एक इति॥ ॥अब्धिमंथनसमये विष्णोश्चतुर्णां भुजानां मध्ये॥ एकः भुजः॥
सिंधुभुवः लक्ष्म्याः करे पाणौ विलुलितः॥ तथा द्वितीयः॥ चक्रे सुदर्शने स्थितः राऊ शिरश्छेदार्थमि
त्यर्थः॥ कालकूटकवलेन हालाहलभक्षणेन क्लिष्टे दुःखिते कामध्वंसिनि शिवे तृतीयः पाणिर्धृ

हे त्राभेदे सति विरोधाभावो॥ यथा॥ ॥एकः सिंधुभुवः करे विलुलितश्चक्रे द्वितीयः
स्थितः कामध्वंसिनि कालकूटकवलक्लिष्टे तृतीयो धृतः ~~भ्य्येव्स्य~~ भूयः क्षीरनिधे
र्घनप्रमथने पाणिस्तुरीयस्ततो व्यासक्तः कमलापतेर्भगवतो नानारसाः पातु वः॥७
अत्र शृंगार रौद्र करुणाद्भुत रसानां विरोधाभावः॥ ॥ ॥छ॥ ॥

तः॥ तथा तुरीयश्चतुर्थः॥ भूयः पुनः क्षीरनिधेर्दुग्धसमुद्रस्य घने निबिडे प्रमथने मंथने सक्तः॥
ततस्तस्मान्नानारसाः॥ अनेकरसाः कमलापतेर्भगवतः॥ विष्णोः पाणयश्चत्वारो हस्ताः पाया
सुः॥ अत्र शृंगारादीनां चतुर्णां रसानां विषयभेदेन विरोधाभावः॥ श्लोक ०॥७॥ ॥

तेर्द्विकर्मकत्वम्॥ तन्निवेदयकथय॥ रथोद्धता वृत्तम्॥२७॥ नाट्येचेति॥ ॥नाट्येनतु काव्ये॥ का
व्येहि नैषधादौ वर्णनीयो नलादिरेव रसाश्रयः॥ तत्राभिधीयमानो रसोहि तन्निष्ठत्वं नजहाति
॥ नाट्येतु नर्तकेन नलादित्वमारोप्याभिनीयमानो रसो नर्तकसंबंधित्वं जहात्येव॥ सामाजिकाना
मेव रसोदयस्वीकारात्॥ अधुनामुख्यनलादिचारीराणामविद्यमानत्वेपि ब्रूत्सूनृतस्य तदात्म
नः सामाजीकात्मना सह भेदाभावात्काव्येस्वनिष्ठ एव रसः॥ तथा च श्रुतिः रसो वै स रसं ह्येवा
नाट्येच सर्वे रसा आनंदरूपा अनुभूतारव्या॥ परिनिष्ठा एवेति प्रवृत्ति निवृत्तिश्च निवृत्तौ यथा शांत
रसः प्रतीतस्तथा माया रस इति प्रतिभाति॥ एकत्र रसोत्पत्तिरन्यत्र नेति वक्तुमशक्यत्वात्॥ नच
सरतिरेव॥ सकस्यास्तु व्यभिचारि॥ यंलध्वानंदीभवतीति॥ रसो रसिक इत्यर्थः॥ गुणवचने
भ्यो मतुपो लुगिष्ट इति भाष्यकारोक्तेः॥ रसीहि म्यस्वेति सूचनप्रवर्तत इति विभाषाधिकरात्॥ ए
वं चानित्यरसिकस्यात्मनो रसाश्रयमस्तीत्याह॥ प्रवृत्तिर्निवृत्तिश्च॥ वक्तृतस्तु प्रवृत्तौ माया
रसो निवृत्तौ शांतरस इति रसद्वयमेव॥ मायारसस्य रत्यादयोऽष्टौ व्यभिचारिभावाः॥ ॥

१२

समयभेदेनविरोधाभावस्योदाहरणमाह॥ ॥भग्नमिति॥ ॥धनुर्भंगादिकंयत्क्रमेणकृतंतत्रस्वि

समयःभेदेन॥ ॥यथा॥ ॥भग्नंकामरिपोर्धनुःपरिकृतंराज्यंपास्थितंकाननेनिर्भिन्नस्त्रिशिराः
खरस्यपिशितंस्यष्टकपिर्लालितः॥लंकेशोहेलितस्त्रिरायरहितंलंकावधूनांकृतंनीतासम्र
विदेहभूरेस्तेखिलंरामस्यजोत्ररमू॥८॥अत्राद्भुतभयानकरौद्रबीभत्सहास्यवीरकरुणशृंगा
राणांविरोधाभावः॥अंगांगिभावापन्नानांरसानामेकत्रसमावेशोयत्रसत्वरसत्त्वाबलइतित
स्याप्यतद्देवोदाहरणं॥अंगयोर्वैरेपिनरसस्यहानिनटयोर्वैरेपिप्रभोरिव॥ ॥

लमस्यलोकोरुरमितिभावः॥अत्रनवानामद्भुतरसादीनांकालभेदाद्विरोधाभावगम्यताहं॥८

पुनरप्यविरोधविषयमाह॥॥सीतामि॥॥वीचिनिस्तरंगैःप्रचलंलोलंयत्कुवलयंतेनसदृस्पर्द्धतीतत्॥एतादृशंचक्षुःक्षिपंतीसीतांसंस्मर्य॥किंचरक्षःशरैःरक्षसबाणैर्दलिता नियानिवपुंषितेभ्योयःशोणितासारःरुधिरधारासंपातस्तेनसिक्ता॥धारासंपातस्तेनसिक्ता॥धारासंपातआसारइत्यमरः॥सेनांवाहिनींसंवीक्ष्यदृष्ट्वारामेण॥क्रोधेनदृप्यन्त्योस्त्रामुखोरावणस्तस्य

॥यथा॥सीतांसंस्मृर्यवीचिप्रचलयस्पर्द्धिचक्षुःपिपंतीसेनांसंवीक्ष्यरक्षःशारदलितवपुःशोणितासारावसिक्तां॥रामेणक्रोधदृप्यदृशामुखनिपतन्मुण्डजालप्रमोदक्रीडत्कालीकरालभ्रुकुटिसहचरीसंदधेचापयष्टिः॥९॥अत्रशृंगारबीभत्सयोर्वैरेपिनरसहानिः॥

निपतंतियानिमुण्डानितेषांयोलोभस्तेनयःप्रमोदस्तेनक्रीडंतीयाकालीतस्याःकरालायाभ्रुकुटीतस्याःसहचरीतत्सदृशीवक्रेतियावत्॥एतादृशीचापयष्टिःसंदधे॥बाणेनसहेतिशेषः॥अत्रशृंगारबीभत्सयोःसहजविरोधेपिवीररसस्यमुख्यत्वान्नहानिःसंध्यराद्वन्त्रं॥९

११९

अंगांगीभावापन्नयोर्नित्यमविरोधिनोरेकत्रभावेपिन हानिरितितदुदाहरणमाह॥ भौजंगममिति॥ ॥दशकंधरेणरावणेन॥ भुजंगमस्येदंभौजंगमं॥ सर्पास्त्रमित्यर्थः॥ गिरिमयंपर्वतास्त्रं॥ तथाजलदास्त्रंमेघास्त्रं॥ चपरंशास्त्रं॥ यत्मंत्रेणप्रपुज्यतेतदस्त्रं॥ यत्करस्थमेवायुधंप्रहरति तच्छस्त्रं॥ यन्मुक्तंसत्पुनरायातितन्मुक्तं॥ यन्मुक्तंसत्तन्पुरायातितत्त्वमुक्तमितिभेदः॥ त एवमंगांगिभावापन्नयोरविरोधिनोरेकत्रभावेपिनरसहानि॥ ॥यथा॥ ॥भौजंगमं गिरिमयं जलदात्मकंचास्त्रंत्वयुदवमुमुचेदशकंधरेण॥ सर्वविदेह तनयाविरहातुरेणरामेणवह्नि मयमस्त्रमिवव्यलोकि॥ १०॥ आद्यंसर्पास्त्रादिद्वितीयंखड्गादि॥ तृतीयंबाणादि॥ चतुर्थंभुशुं ड्यादीतिमेदोदाहरणानि॥ यदैवयस्मिन्नेवसमयेमुमुचेतस्मिन्नेवावसरे॥ शार्वंशास्त्रास्त्रं ॥ विदेहतनयाविरहाकुलेनरामेण॥ वह्निमयमिव॥ व्यलोकि॥ दृष्टं॥ यद्वाभौजंगमादिशास्त्रं सर्पास्त्रादीत्यर्थः शस्त्रशब्देनायुधसामान्यलक्षणं॥ अत्ररामनिष्ठवीरविप्रलंभशृंगारयोरेकत्र समावेशेपिपरस्परमविरोधान्नरसहानिः॥ वसंततिलकावृत्तम्॥ १०॥ ॥ ९९ ॥ ९

ननु बीभत्सशृंगारयोः कुतो वैरमित्याशंक्याह॥ ॥मधुनीति॥ ॥मूलेस्पष्टं शेषं॥जुगुप्सा तु तट
स्थस्यैव न यूनोरिति भावः॥बीभत्सशृंगारस्योदाहरणमाह॥ ॥यदपीति॥ यदपि यद्यपि रुद्रिहि

ननु शृंगारबीभत्सयोः सह वैरं कुतः मधुनिः पीय निष्ठीवतोः संभोगदर्शनादिति चेत्सत्यं॥बी
भत्सस्य जुगुप्सा स्थायिभावः॥सा च तद्दर्शनेन तटस्थस्य भवति न तु तयो॥रागोत्कंठ्या हि
ति॥ ननु तथापि सति शृंगारो बीभत्सेद्दृश्यते॥ तथाहि॥ यदपि रुद्रिहि विशालामुंडमाला
न पाणिस्त्यजति नरकपालं रौरव चर्मचैलम्॥ तदपि गिरिसुतायाः पक्षपातः पुरारौ समु
द्यति विचित्रः कामिनोः प्रेमबंधः॥इत्यावितिचेत्सत्यम्॥निजभर्तुरधमेपि भूषणे भक्त्यति
शायेन पत्न्यास्तदपि जुगुप्सैव न भवति॥जुगुप्सितत्वेन प्रतीयमानम्॥जुगुप्सोत्पादकम्॥

वस्येति शेषः॥विशालामुडमाला॥ ॥अस्तीति शेषः॥ ॥श्रीरामकृष्णगोवर्द्धहरे॥ ॥छ॥

किंचपाणिः शंभुकरः कपालं भिक्षापात्रं नत्यजति॥ तथा रुरोः कृष्णसारस्येदं रौरवं चर्म॥ अजिनं॥ तदेव चेलं वस्त्रं वर्त्तते॥ तदपि तथापि गिरिसुतायाः पार्वत्याः पुरारौ शिवे पक्षपातोऽस्यादरोऽस्तितया ह्विकामिनोः विलासिनोः पुमान् स्त्रिये त्येकशेषः॥ केवलं बंधः किंतासंबंधः विचि

किंचप्रियसंबंधोपाध्यधिकतरं प्रेमनत्रोत्पद्यते॥ न नस्यायिनावाभावात्तबीभत्सस्तत्र न भवति॥ ११॥ ननु वीरस्य युधि गच्छतः सर्पस्पर्शचकिततारोदेचाकस्मिकोत्पातेविस्मय इति चेत्सत्यम्॥ ॥ त्रोनानाविधः समुदयति॥ अत्रसामान्येन विशेषस्य समर्पनादर्थांतरन्यासः॥ अत्र पार्वती परमेश्वरयोर्जुगुप्साभावे स्थायिनावाभावान्न बीभत्सः॥ किंतु शृंगार एवेत्यवधेयं॥ मालिनी वृत्तम्॥ ११॥ नन्विति॥ युधि वीररसाविष्टस्य वीरपुरुषस्य सर्पाहिस्पर्शोऽपि न विस्मयो भवतीत्यर्थः॥ ॥ ॥छ॥ ॥ ॥ ॥

अथवा। विषयभेदेन दोषपरिहारो भवतीत्याह। वीरस्येति॥ ॥अत्र प्राचीनानां सिद्धांतमाह। अ
न्यस्त्वे॥ ॥नाट्यशास्त्रविशारदैर्भरतादिभिः। रसवैरस्योत्पादकं वचनं न वाच्यमिति योजना॥ र

चकितता। विस्मयश्च तत्र तत्र रसावेशान्न भवत्येवं सति वा विषयभेदः॥ वीरेन प्रतिभट
द्वयम्॥ किंतु भुजंगमात्॥ रौद्रेन प्रतिबलबलाधिक्यात्॥ किं तु त्यात् अद्भुत विस्मय इति॥ रसवै
रस्योत्पादकमखिलमबंधेयम्॥ तत्र पुराणाचार्याः॥ ॥अन्यच्च रसवैरस्योत्पादकं वचनं
तथा॥ नवाच्यं रसभाववत्तैर्नाट्यशास्त्रविशारदैः॥ वचनमित्युपलक्षणम्॥ एवं भाव विभा
वानुभावेष्वपि द्रष्टम्॥ ॥ ॥श्रीराम॥ ॥श्रीकृष्ण॥ ॥ ॥ १

सवैरस्योत्पादकमखिलवचनमुदाहरति॥ ॥ॐ नमः श्री परमात्मने नमः॥ ॥छ॥ ॥

का.हमिति॥ ॥मानिनीमानमपनेतुं प्रवृत्तस्य कस्यचिदियमुक्तिः॥ हे मानिनी। अहं क्व तया सह
॥किंच मधुसमयो वसंतः क्व तया सोऽस्ती चांमली कुत्र॥ किंच मेघछायो वत्सति चंचलेंचले॥ यूनो वि
लासिनो॥ इदं प्रेम कुत्र॥ अत्र वा शब्दो विकल्पे समुच्चये वा॥ किंच प्रचलांचलजाया नलिनी तत्र यो

यथा॥ क्वाहं क्व त्वं क्व मधुसमयः कुत्र वाऽस्ति कासौ मेघच्छायाप्रविचलमिदं कुत्र वा प्रेम यूनोः॥
आयुर्वायुप्रचलबिसिनीवारिबिंदूपमानं मानं मुग्धे विसृज सकलं तुच्छमेतत्स्वतीमः॥ १२
अत्र निर्वेदप्रतिपादकमखिलं शृंगारविरोधि॥ ॥

वारिबिंदुःस एवोपमा सादृश्यं यस्य तत्॥ एतादृशमायुः क्वा नैतच्चिरस्थायीति भावः॥ तस्मात्
हे मुग्धे बाले॥ मानं विसृज॥ वयं इदं सकलं तुच्छमसारमेव प्रतीमः॥ जातीमः॥ अत्र निर्वेदप्रति
पादकमखिलवचनं शृंगारविरोधीत्यवधेयं॥ मंदाक्रांतावृत्तं॥ १२॥ ॥ १ ॥ ॥ छ॥॥

अनौचित्याद्रसभंगइतिवक्तुंप्राचीनाचार्यसंमतिमाह॥अनौचित्यादिति॥अनौचित्याद्रसभंग
औचित्याद्रसनिष्पत्तिरित्यर्थः॥अथरसाभासस्योदाहरणमाह॥॥सीतेति॥सीतायायःसमा
अनौचित्यंचसर्वथावधेयम्॥तत्रप्राचीनग्रंथकृतः॥अनौचित्यादृतेनान्यद्रसभंगस्यकार
णम्॥प्रसिद्धौचित्यबंधस्तुरसोत्कर्षायजायते॥उद्वेगकरमनौचित्यम्॥लोकयात्राप्रसिद्ध
मौचित्यम्॥तस्मात्यूनोर्यत्रमिथोरतिस्तत्रैवरसः॥एकस्यैवरतिश्चेत्॥रसाभासएव॥
एकस्याएवरतिश्चेत्रसाभासएव॥क्रमेणोदाहरणे॥सीतासमागमश्लाघाबंधुरंदशकं
धरम्॥प्रहर्तुमक्षमतेकामोरामोवानिशितैःशरैः॥१३॥अत्ररावणस्यैवरतिर्नतुसीतायाः॥
गमस्तेनयाश्लाघाकीर्तिस्तत्रबंधुरंलोलुपंदशकंधरंप्रहर्तुंकामोमन्मथः॥अथवानि
शितैःशरैर्बाणैःकृत्वारामःक्षमतेनान्यइत्यर्थः॥अत्ररावणनिष्ठायारतेराभासत्वं॥१३

१२२

॥अथनायिकानिष्टरतेराभासत्वमाह॥निधुवनेति॥हेमुग्धे॥निधुवनस्यव्यवायस्ययोवन
प्रांतोवनप्रदेशः॥ग्राम्यधर्मोनिधुवनंव्यवाायोमैथुनंचेतदित्यमरः॥तस्मिन्विषयेयांतंकम
पिपुरुषं॥चलैर्लोलैर्नयनांचलैःकृत्वा॥मुहुर्मुहुर्वलितग्रीवं॥पुनःपुनर्विवर्तितग्रीवंय
थातथा॥किमितिईक्षसे॥त्वमितिशेषः॥कुतइत्यपेक्षायामाह॥चेदारिर्यूनोःस्त्रीपुंसयोःप

निधुवनवनप्रांतेयांतंचलन्नयनांचलैःकिमितिवलितग्रीवंमुग्धेमुहुर्मुहुरीक्षसे॥१६
विफलमखिलंयूनोर्नोचेदुदेतिपरस्परंइतिरथमनोजन्मादेवःसएवनिषेव्यताम्॥१८
अत्रनायिकायाएवइतिर्नतुनायकस्य॥एवमेकस्मात्रनेकविषयाइतिराभासएव॥ ॥

रस्परंरतिःप्रीतिर्नउदेति।तदाखिलंनिष्फलमस्ति॥अथानंतरं॥मनोजन्मादेवःकामदेव
सएवनिषेव्यतां॥कामस्यदेवत्वात्तदाराधनेनतवेप्सितंभविष्यतीतिनतत्पुरुषावलोक
नेनेतिभावः॥अत्रनायिकानिष्ठयारतेराभासत्वं॥ ॥हरिणीवृत्तम्॥ १४॥ ॥२

विशेषमाह॥ ॥यस्येति॥ ॥यद्यपिकस्यचित् बह्व्योनायिकाः संतितथापिस्नेहेनव्यवस्थिता
श्चेन्नतत्ररसाभासः॥ तस्मादिति॥ ॥वैशिकपारदारिकवेश्यानांव्यवस्थाविरहान्नतेराभास

परंत्वेषविशेषः॥ ॥यस्यव्यवस्थिताबह्व्योनायिकास्तत्रनरसाभासः॥तथासतिकृ
ष्णस्यापिसकललोकनायकोत्तमस्यबहुकामिनीविषयायाएवरतेराभासापत्ति
॥दक्षिणनायकस्याभासापत्तेः॥तस्माद्व्यवस्थितबहुकामिनीविषयकवैशिक
नायकपरमेतत्॥अतएववैशिकानांवेश्यानांचरसाभासइतिप्राचीनमतं॥ ॥
एकस्याअनेकविषयाइति॥ ॥

त्वम्॥ वेश्यांगच्छतीतिवैशिकः॥ गच्छतोपरदारानिम्
रतिवक्र॥अस्योदाहरणमाह॥ ॥ ॥

247

संपदि॥ ॥अद्यकस्य संपदत्र श्मीस्ताराम हतीवत्र्तते॥ कुतः पत्युरग्रस्याग्रे॥ नेत्रतारानयनकनीनि
का॥ तरसाऽकृता इति तरज्जिता॥ कामिन्येति शेषः॥ तत्करोतितद्वाचष्टेइतिणिजंतात्कर्मणिक्तः॥
किंचाद्यकेनसुकृतिनाकांची शिवकांची विष्णुकांची च दृष्टा भवति॥ यतः यस्याग्निमुखइतियद्दग्नि
मुखतः संभ्रम्यर्पेतस्मिन्॥ रत्नखचिताकांची॥ वेपतेकांयते॥ मध्यमपदलोपी समासः॥ किंचहे
यपा॥ संपत्कस्याद्य ताराभवतितरज्जितायत्पुरोनेत्र तारादृष्टाकेनाद्यकांचीयद्दग्निमुखमयो वे
पते रत्नकांची॥ उग्रः कस्याद्यतुष्टः सखियद्दनुगमे कश्चिदुग्रोनिपातः स्नातं केनाद्य वेणीपय
सि विज्जुजितायक्रूतेकापि वेणी॥५५॥ सखि॥ अद्याधुनाउग्रः शिवः कस्यतुष्टः संतुष्टः॥ कुतः
यद्दनुगमेयस्य प्रयाणे॥ कश्चित्कोपिउग्रः॥ क्रूरोऽभितापः पश्चात्तापोभवति॥ किंचअद्यवे
णीपयसि प्रयागे केन स्नातं॥ कुतः य क्रूतेयदर्थं काप्यतिरमणिया वेणी केशवंधः॥ वेणीतुसं
यताः केशाइतिशाश्वतः प्रकारः॥ विज्जुजिता विकीर्णा॥ एतत्सर्वं सुकृतीनामेवानुकूलं नान्ये
षामितिभावः॥ अत्रोनेकनायकविषयाएकनायिकानिष्ठाया रतेराभासत्वंस्रग्धरावृत्तम्॥५६

रसत० टी
१२८

तर० ८

एकनायकनिष्ठायारतेरुदाहरणमाह ॥ ॥ पंचेषिति ॥ ॥ पंचेषुस्मिति पंचेषुः कंदर्पस्तस्य याल
हरीरूपा तदीयाप्रीतिः पुनः रतिरुक्त ॥ कासांस्त्रीणां स्तनकांचनाचलतटे विषये नका ॥ काश्मीरपं
केऽवकुंकुमकर्दमइवाचरति काश्मीरपंकायते ॥ किंच तदीयाप्रीतिः कासां नीरजदृशां मूर्द्ध

एकस्यानेकविषयाइतिर्यथा ॥ ॥ पंचेषुस्मिति पंचेषुतापल्लहरीप्रीतिस्तदीयापुनः का
सां नस्तनकांचनाचलतटे काश्मीरपंकायते ॥ कासां मूर्द्धनि नैवनीरजदृशां सिं
दूरलेखायते कासां वा न च कर्णयोः ॥ प्रियसखे माणिक्यभूषायते ॥ १६ ॥ ॥ ॥

नि त्रिरसि नैव सिंदूररेखायते ॥ किंच हे प्रियसखे कासां वा स्त्रीणां कर्णयोर्विषये माणिक्यभू
षा इवाचरतीति माणिक्यभूषायते ॥ अत्र सर्पत्राचारार्थेक्यङ्प्रत्ययः ॥ अत्रानेकनायिकावि
षया एकनायकनिष्ठायारतेराभासत्वं ॥ स्राग्ध० ॥ १६ ॥ ॥ ॥

१२८

249

[OrderDescription]
,CREATED=30.09.20 17:00
,TRANSFERRED=2020/10/01 at 10:34:31
,PAGES=249
,TYPE=STD
,NAME=S0003793
,Book Name=M-1703-RASTARDINI STIKA
,ORDER_TEXT=
,[PAGELIST]
,FILE1=00000001.TIF
,FILE2=00000002.TIF
,FILE3=00000003.TIF
,FILE4=00000004.TIF
,FILE5=00000005.TIF
,FILE6=00000006.TIF
,FILE7=00000007.TIF
,FILE8=00000008.TIF
,FILE9=00000009.TIF
,FILE10=00000010.TIF
,FILE11=00000011.TIF
,FILE12=00000012.TIF
,FILE13=00000013.TIF
,FILE14=00000014.TIF
,FILE15=00000015.TIF
,FILE16=00000016.TIF
,FILE17=00000017.TIF
,FILE18=00000018.TIF
,FILE19=00000019.TIF

FILE20=00000020.TIF
,FILE21=00000021.TIF
,FILE22=00000022.TIF
,FILE23=00000023.TIF
,FILE24=00000024.TIF
,FILE25=00000025.TIF
,FILE26=00000026.TIF
,FILE27=00000027.TIF
,FILE28=00000028.TIF
,FILE29=00000029.TIF
,FILE30=00000030.TIF
,FILE31=00000031.TIF
,FILE32=00000032.TIF
,FILE33=00000033.TIF
,FILE34=00000034.TIF
,FILE35=00000035.TIF
,FILE36=00000036.TIF
,FILE37=00000037.TIF
,FILE38=00000038.TIF
,FILE39=00000039.TIF
,FILE40=00000040.TIF
,FILE41=00000041.TIF
,FILE42=00000042.TIF
,FILE43=00000043.TIF
,FILE44=00000044.TIF
,FILE45=00000045.TIF
,FILE46=00000046.TIF
,FILE47=00000047.TIF

FILE48=00000048.TIF
,FILE49=00000049.TIF
,FILE50=00000050.TIF
,FILE51=00000051.TIF
,FILE52=00000052.TIF
,FILE53=00000053.TIF
,FILE54=00000054.TIF
,FILE55=00000055.TIF
,FILE56=00000056.TIF
,FILE57=00000057.TIF
,FILE58=00000058.TIF
,FILE59=00000059.TIF
,FILE60=00000060.TIF
,FILE61=00000061.TIF
,FILE62=00000062.TIF
,FILE63=00000063.TIF
,FILE64=00000064.TIF
,FILE65=00000065.TIF
,FILE66=00000066.TIF
,FILE67=00000067.TIF
,FILE68=00000068.TIF
,FILE69=00000069.TIF
,FILE70=00000070.TIF
,FILE71=00000071.TIF
,FILE72=00000072.TIF
,FILE73=00000073.TIF
,FILE74=00000074.TIF
,FILE75=00000075.TIF

FILE76=00000076.TIF
,FILE77=00000077.TIF
,FILE78=00000078.TIF
,FILE79=00000079.TIF
,FILE80=00000080.TIF
,FILE81=00000081.TIF
,FILE82=00000082.TIF
,FILE83=00000083.TIF
,FILE84=00000084.TIF
,FILE85=00000085.TIF
,FILE86=00000086.TIF
,FILE87=00000087.TIF
,FILE88=00000088.TIF
,FILE89=00000089.TIF
,FILE90=00000090.TIF
,FILE91=00000091.TIF
,FILE92=00000092.TIF
,FILE93=00000093.TIF
,FILE94=00000094.TIF
,FILE95=00000095.TIF
,FILE96=00000096.TIF
,FILE97=00000097.TIF
,FILE98=00000098.TIF
,FILE99=00000099.TIF
,FILE100=00000100.TIF
,FILE101=00000101.TIF
,FILE102=00000102.TIF
,FILE103=00000103.TIF

FILE104=00000104.TIF
,FILE105=00000105.TIF
,FILE106=00000106.TIF
,FILE107=00000107.TIF
,FILE108=00000108.TIF
,FILE109=00000109.TIF
,FILE110=00000110.TIF
,FILE111=00000111.TIF
,FILE112=00000112.TIF
,FILE113=00000113.TIF
,FILE114=00000114.TIF
,FILE115=00000115.TIF
,FILE116=00000116.TIF
,FILE117=00000117.TIF
,FILE118=00000118.TIF
,FILE119=00000119.TIF
,FILE120=00000120.TIF
,FILE121=00000121.TIF
,FILE122=00000122.TIF
,FILE123=00000123.TIF
,FILE124=00000124.TIF
,FILE125=00000125.TIF
,FILE126=00000126.TIF
,FILE127=00000127.TIF
,FILE128=00000128.TIF
,FILE129=00000129.TIF
,FILE130=00000130.TIF
,FILE131=00000131.TIF

FILE132=00000132.TIF
,FILE133=00000133.TIF
,FILE134=00000134.TIF
,FILE135=00000135.TIF
,FILE136=00000136.TIF
,FILE137=00000137.TIF
,FILE138=00000138.TIF
,FILE139=00000139.TIF
,FILE140=00000140.TIF
,FILE141=00000141.TIF
,FILE142=00000142.TIF
,FILE143=00000143.TIF
,FILE144=00000144.TIF
,FILE145=00000145.TIF
,FILE146=00000146.TIF
,FILE147=00000147.TIF
,FILE148=00000148.TIF
,FILE149=00000149.TIF
,FILE150=00000150.TIF
,FILE151=00000151.TIF
,FILE152=00000152.TIF
,FILE153=00000153.TIF
,FILE154=00000154.TIF
,FILE155=00000155.TIF
,FILE156=00000156.TIF
,FILE157=00000157.TIF
,FILE158=00000158.TIF
,FILE159=00000159.TIF

FILE160=00000160.TIF
,FILE161=00000161.TIF
,FILE162=00000162.TIF
,FILE163=00000163.TIF
,FILE164=00000164.TIF
,FILE165=00000165.TIF
,FILE166=00000166.TIF
,FILE167=00000167.TIF
,FILE168=00000168.TIF
,FILE169=00000169.TIF
,FILE170=00000170.TIF
,FILE171=00000171.TIF
,FILE172=00000172.TIF
,FILE173=00000173.TIF
,FILE174=00000174.TIF
,FILE175=00000175.TIF
,FILE176=00000176.TIF
,FILE177=00000177.TIF
,FILE178=00000178.TIF
,FILE179=00000179.TIF
,FILE180=00000180.TIF
,FILE181=00000181.TIF
,FILE182=00000182.TIF
,FILE183=00000183.TIF
,FILE184=00000184.TIF
,FILE185=00000185.TIF
,FILE186=00000186.TIF
,FILE187=00000187.TIF

FILE188=00000188.TIF
,FILE189=00000189.TIF
,FILE190=00000190.TIF
,FILE191=00000191.TIF
,FILE192=00000192.TIF
,FILE193=00000193.TIF
,FILE194=00000194.TIF
,FILE195=00000195.TIF
,FILE196=00000196.TIF
,FILE197=00000197.TIF
,FILE198=00000198.TIF
,FILE199=00000199.TIF
,FILE200=00000200.TIF
,FILE201=00000201.TIF
,FILE202=00000202.TIF
,FILE203=00000203.TIF
,FILE204=00000204.TIF
,FILE205=00000205.TIF
,FILE206=00000206.TIF
,FILE207=00000207.TIF
,FILE208=00000208.TIF
,FILE209=00000209.TIF
,FILE210=00000210.TIF
,FILE211=00000211.TIF
,FILE212=00000212.TIF
,FILE213=00000213.TIF
,FILE214=00000214.TIF
,FILE215=00000215.TIF

FILE216=00000216.TIF
,FILE217=00000217.TIF
,FILE218=00000218.TIF
,FILE219=00000219.TIF
,FILE220=00000220.TIF
,FILE221=00000221.TIF
,FILE222=00000222.TIF
,FILE223=00000223.TIF
,FILE224=00000224.TIF
,FILE225=00000225.TIF
,FILE226=00000226.TIF
,FILE227=00000227.TIF
,FILE228=00000228.TIF
,FILE229=00000229.TIF
,FILE230=00000230.TIF
,FILE231=00000231.TIF
,FILE232=00000232.TIF
,FILE233=00000233.TIF
,FILE234=00000234.TIF
,FILE235=00000235.TIF
,FILE236=00000236.TIF
,FILE237=00000237.TIF
,FILE238=00000238.TIF
,FILE239=00000239.TIF
,FILE240=00000240.TIF
,FILE241=00000241.TIF
,FILE242=00000242.TIF
,FILE243=00000243.TIF

FILE244=00000244.TIF
,FILE245=00000245.TIF
,FILE246=00000246.TIF
,FILE247=00000247.TIF
,FILE248=00000248.TIF
,FILE249=00000249.TIF
,